Shri ... TH ... Mathura (U.P.)

AMEYA-RATNAVALĪ

ary treatise on Vaishnava philosophy of Bengal")

OF

ADEVA VIDYĀBHŪSHAṆA

I AN OLD COMMENTARY KANTIMĀLĀ, AND A NEW
L COMMENTARY AND BENGALI TRASLATION.

BY

SHAYA KUMAR SHASTRI

Bengali Translation of Vedāntadars'ana,
Upades'asahasrī etc. etc.

REVISED BY

RSUNDARA BHAGAVATADARSHANACHARYA

PUBLISHED BY
SANSKRIT SAHITYA PARISHAT.
Shyambazar, Calcutta.

Price { *for members* 1/0/- ; *for others* 1/4/- }

संस्कृतसाहित्यपरिषद्ग्रन्थमालायाम् [illegible]८श संख्या

Mathura (U.P)

प्रमेयरत्नावली

(गौड़ीयवैष्णवदर्शनप्रकरणग्रन्थः)

बलदेवविद्याभूषणविरचिता

कृष्णदेववेदान्तवागीशविरचित-कान्तिमालाख्यटीकोपेता

प्रभाख्यनवीनटीकया वङ्गानुवादेन च समलङ्कृत्य उपदेशसहस्री-
वेदान्तदर्शनादि-विविधग्रन्थसम्पादयित्रा काव्य-
सांख्य-वेदान्त-मीमांसा-सर्वदर्शनतीर्थ-
विद्यारत्नोपनाम-भारद्वाज—

श्रीमद्-अक्षयकुमारशर्मशास्त्रिणा

सम्पादिता

वैष्णवदर्शननिष्णात-

श्रीमद्गौरसुन्दरशर्म-भागवतदर्शनाचार्येण परिदृष्टा

संस्कृतसाहित्यपरिषदा प्रकाशिता ।

मूल्यं सपादरूप्यकम् । सदस्यानां रूप्यकमात्रम् ।

PRINTED BY A. C. MANDAL AT THE
"SIDDHESWAR PRESS"
29, Nandakumar Choudhury 2nd Lane, Calcutta.

Published by P. Shastri
Secretary, Sankrit Sahitya Parisat,
Shymbazar, Calcutta.

Sh... MATH
Mathura (U.P)

উৎসর্গপত্র

এই গ্রন্থ

স্বনামপ্রসিদ্ধ ভগবদ্‌ভক্ত

পরলোকগত

৺ভূপেন্দ্রনাথ বসু এম্. এ., বি-এল্

মহোদয়ের নামে

উৎসৃষ্ট হইল।

Swami P.N. Narayan

FOREWORD

The literature of the Vaishnavas in Bengal is very scanty so far as books composed in Sanskrit are concerned. The works on philosophy can be counted on fingers' ends. The present work is one of them. It is an elementary treatise representing the tenets of the school of Sri Chaitanya-Deva, which, though founded on the doctrines of the Madhva school of Vedanta philosophy, is peculiar in many respects. Its author is Baladeva Vidyabhushana. To him several other books are ascribed. He is a prominent figure amongst the Vaishnava philosophers and flourished about three hundred and fifty years ago. There is a commentary on the work, called Kantimala. Its author styles himself 'Vedantavagisha' who is generally identified with one Krishnadeva Vedantavagisa.

As there is no good edition of this important Vaishnava work available, the Sanskrit Sahitya Parishat undertook to publish it together with Kantimala. The editor has added to it a new commentary of his own containing, references etc. Besides, the purport of every paragraph has been given in Bengali for the benefit of Bengali readers.

It is hoped that this publication will interest all students of Indian philosophy.

P. Shastri

April, 1927. *Jt, Secretary,*

Sanskrit Sahitya Parishat.

भूमिका

श्रीभगवतो वासुदेवस्याऽनुकम्पया कान्तिमालाख्यया प्राचीन-टीकया समन्विता प्रभया समुद्भासिता वङ्गानुवादेन च समलङ्कृता श्रीमद्बलदेवविद्याभूषणविरचिता गौड़ीयवैष्णवदर्शनसारभूता रत्नावलिरिव प्रमेयरत्नावली साम्प्रतं प्रकाशतां नीता। परं स्वल्पविद्येनापि मया मासेनैकेन विरचितौ प्रभाभिधा काचन टीका वङ्गानुवादश्च।

भगवत्पूज्यपादजगद्गुरुशङ्कराचार्यमतमवलम्बमानानां तन्मतं सादरमातिष्ठमानानामस्मादृशां कदाचित् पक्षपातो भवेत् सिद्धान्त-हानिर्वा घटेतेति गौड़ीयवैष्णवमतं सेवमानः परमभागवतः कश्चन परीक्षकत्वेनाऽपेक्षणीय इति सुनिपुणं समीक्ष्याऽन्ते तादृशः कश्चित् समासादितः। स खलु प्रायेण सर्वेषां विदुषां परिचितः स्वर्गगतनैया-यिकवर्यानन्दचन्द्रसार्वभौमभट्टाचार्यात्मजो वैष्णवशास्त्रपारावारपारीण-विविधवैष्णवग्रन्थप्रकाशक-स्वधामगत-सिद्धान्तवाचस्पति-प्रभुपाद-श्याम-लालगोस्वामिशिष्यः साधकप्रवरो निखिलशास्त्रविशारदो गौड़ीयवैष्णव-मतनिष्णातः श्रीयुतगौरसुन्दरभागवतदर्शनाचार्यमहाशयो नाम। तस्य च महात्मनः सङ्गेन तद्गुणपरम्परापरिशीलनेन तत्पाण्डित्य-चारित्रावलोकनेन विनयमधुरव्यवहारेण च नितरामानन्दपाथोनिधौ निमग्नोऽभूवम्। मासषट्केन च मत्कृतां प्रभाभिधां टीकां वङ्गानु-वादञ्च समालोच्य बहुषु स्थलेषु पूर्तिः सम्पादिता, कुत्रचिदंशविशेषश्च परिहृतः। सर्वथा तदुपासनाफलमेतदिति सुधीभिर्निर्मत्सरैर्भवि-तव्यम्।

आदर्शग्रन्थपरिचयः

ग्रन्थोऽयं प्राक् स्वधामगतप्रभुपादगोकुलचन्द्रगोस्वामिमहाशयेन कान्तिमालया विस्तृतवङ्गानुवादेन चोपेतः १२८४ वङ्गाब्दे प्रकाशितः। तेन खलु महात्मना एष ग्रन्थो महता प्रयासेन प्रथमं प्रकाशित इति स सादरमभ्यर्थ्यते। स च साम्प्रतं नैव लभ्यत इति तत्प्रकाशने सम्यगायासः क्रियते। ग्रन्थप्रकाशे यतमानानामस्माकं लोचनविषयतां गतो गौड़ीयवैष्णवमठतः प्रकाशितः कान्तिमालाख्यटीका-वङ्गानुवादोपेतः प्रमेयरत्नावलीनामधेयः कश्चिद् ग्रन्थः। मुद्रणकाले कलिकातास्थ-एसियाटिक्सोसाइटिभवनाल्लब्धः कान्तिमालाख्यटीकोपेतो नागराक्षरान्वितो हस्तलिखितः कश्चिदपरो ग्रन्थः। अथ प्रभुपादश्रीमदतुलकृष्णगोस्वामिमहाशयसम्पादितोऽन्योऽपि कश्चिदासादितः। यथाक्रमं पुस्तकचतुष्टयं 'क' 'ख' 'ग' 'घ' इति नाम्नाऽस्मदीयपुस्तके सङ्केतितम्।

न्यायवैशेषिकमतं जिज्ञासूनां विश्वनाथन्यायपञ्चाननकृतमुक्तावलीसमन्वितभाषापरिच्छेद इवाऽद्वैततत्त्वं प्रविविक्षूणां सदानन्दयतिकृतवेदान्तसार इव सर्वथेयं प्रमेयरत्नावली गौड़ीयवैष्णवमतं जिज्ञासूनां श्रेयसे प्रभवति।

अत्र च ग्रन्थकृता नव प्रमेयाणि प्रतिपादितानि। तानि च विस्तरेणात्र वर्तन्त इति तत्र विरम्यते।

ग्रन्थकृत्परिचयः

ग्रन्थकृदयं वङ्गविभूषणो बलदेवविद्याभूषणो जन्मना वङ्गीयब्राह्मणकुलमलञ्चकार। प्रथमे वयसि वर्तमानः स स्वदेशे काव्य-

व्याकरणालङ्कारधर्मशास्त्राणि तथा माध्वसम्प्रदायाद्दर्शनशास्त्राण्यधीत्य श्रीवृन्दावनधाम समासाद्य तत्रत्यश्रीमद्विश्वनाथचक्रवर्त्तिनः शिष्यत्वमङ्गीकृत्य ततो भक्तिशास्त्रं शुश्राव। उपनिषदः, ब्रह्मसूत्रं श्रीमद्भगवद्गीता चेति प्रस्थानत्रयम्, एतद्भाष्यकारो हि ब्राह्मण आचार्यपदवीं लभते। श्रीकृष्णचैतन्यसम्प्रदाये तद्विधः कश्चित् पुरुषधौरेयो नास्तीति श्रीवृन्दावने समवेतैः पण्डितप्रकाण्डैर्नाङ्गीकृतोऽयं सम्प्रदायः सनातनत्वेन। महाप्रभुश्रीकृष्णचैतन्यस्तन्मतावलम्बिनश्च श्रीमद्भागवतमेव ब्रह्मसूत्रभाष्यमिति मन्यमाना नान्यद् भाष्यं विरचितवन्तः। तथापि नैतद्भाष्यलक्षणाक्रान्तमिति ब्रुवाणा अन्ये सम्प्रदाया नाद्रियन्त मतमेतदिति वृन्दावनस्थभगवद्गोविन्दनिदेशेन एकेनैव मासेन श्रीमद्बलदेवः प्रणिनाय भाष्यमेकं ब्रह्मसूत्रस्य, अतस्तद् गोविन्दभाष्यमिति व्यपदिश्यते।

बलदेवप्रणीता ग्रन्थाः

अधोलिखितास्तत्कृता ग्रन्थाः साम्प्रतं समुपलभ्यन्ते—

१। गोविन्दभाष्यम्।
२। गोविन्दभाष्यटीका।
३। श्रीमद्भगवद्गीताभाष्यम्।
४। उपनिषद्भाष्यम्।
५। भाष्यपीठकं सिद्धान्तरत्नं वा।
६। सिद्धान्तरत्नटीका।
७। वेदान्तस्यमन्तकम्।
८। प्रमेयरत्नावली।
९। श्रीमद्भागवतटीका।
१०। विष्णुसहस्रनामभाष्यम्।
११। स्तवमालाभाष्यम्।
१२। लघुभागवतामृतटीका।
१३। षट्सन्दर्भटीका।
१४। साहित्यकौमुदी।
१५। गोपालतापनीयभाष्यम्।
१६। छन्दःकौस्तुभभाष्यम्।

अधोलिखितास्तत्प्रणीता ग्रन्था अस्माभिरनुपलब्धाः सन्तीति कश्चिद् भाषते—

१। सिद्धान्तदर्पणः।
२। काव्यकौस्तुभः।
३। चन्द्रालोकटीका।
४। नाटकचन्द्रिकाटीका।
५। व्याकरणकौमुदी।

अन्ये च तत्प्रणीता ग्रन्थाः सन्ति न वेति निर्णेतुं नैव शक्यते।

गौड़ीयवैष्णवदर्शनमहामहीरुहस्य वीजमुप्तं भगवता श्रीकृष्णचैतन्यचन्द्रेण। स च महीरुहोऽङ्कुरितः पल्लवितश्च श्रीरूपसनातनाभ्यां, श्रीमज्जीवेन कुसुमितः फलितश्च, विश्वनाथबलदेवाभ्यामभिवर्द्धितः।

अनर्घ्यं खलु रत्नमिह जगति प्रादुरभूद् गौड़ीयवैष्णवदर्शनं नाम। एतदेव रत्नं वङ्गदेशवासिनां निजस्वमिति तत्रैतद्देशीयैर्महान् समादरो विधेयः। भक्तेः प्रपञ्चोऽस्मिन् मते यादृगुपलभ्यते, न तथान्यत्र कुत्रचित्।

बलदेवस्य वैश्यत्वनिरासः

कश्चिद् वर्णयति—श्रीमद् बलदेवविद्याभूषणो वैश्यकुले जन्म परिगृह्य कान्यकुब्जवासिनः विप्रवंशावतंसात् कस्माच्चिद् वैष्णवाद् दीक्षितो ब्राह्मणत्वमगात्। वृत्तब्राह्मणात् शौक्रब्राह्मणाः समुपजायन्त इति श्रुतिस्मृतिविदो वदन्तीति। सर्वथा मतमेतदुन्मत्तप्रलपितमिति सततं प्रेक्षावद्भिरुपेक्षणीयम्। न खलु कश्चिदिह जन्मनि महता तपसा जात्यन्तरमधिगन्तुमर्हति, शास्त्रे यत्र कुत्रचिदेतादृशो वचनाभासः परिलक्ष्यते, स तपोमाहात्म्यप्रख्यापकार्थमादरूप इति न विस्मर्तव्यम्। 'सवर्णायां संस्कृतायां स्वयमौरसं विद्यात्' इति स्मरणाद् वृत्तेनान्यो वर्णो ब्राह्मणत्वमधिगन्तुं न शक्नोति। लब्धसत्ताकस्यैव वर्णस्य वृत्तं प्राशस्त्यमापादयति, न तु तद् वर्णत्वप्रयोजकम्।

इदानीन्तना ये केचन नास्तिक्यवादमासेवमाना अर्थकामावेव पुरुषार्थं मन्यमानाः सनातनसत्समाजाद् दूरे वर्तमानाः सामाजिकैः कथंकारमुपेक्ष्यमाणा भूदेवप्राधान्यमसहमाना यां काञ्चन जातिमुपनीय ब्राह्मणत्वमापादयन्तो हन्त ब्राह्मणचरणरजोलाभेऽक्षमाः प्रतिदिनमवनतेरधः सोपानमवतरन्तीति ब्राह्मणास्तान् दयन्ताम्। न खलु ब्राह्मणेतरो नरः कोऽप्यद्यापि आचार्यपदवीमधिगच्छतीति श्रूयते। ग्रन्थकृतो भाषणादपि ब्राह्मणत्वं स्फुटमवगम्यते। तदुक्तं सिद्धान्तरत्ने—

'गजपतिरनुकम्पासम्पदा यस्य सद्यः
समजनि निरवद्यः सान्द्रमानन्दमृच्छन्।
निवसतु मम तस्मिन् कृष्णचैतन्यरूपे
मतिरतिमधुरिम्णा दीप्यमाने मुरारौ॥' इति।

अस्य टीकायां ग्रन्थकृदुक्तिर्यथा—

'कृष्णचैतन्यरूपे शचीसुतात्मनि। मुरारौ कृष्णे। पक्षे परेशतया कृष्ण-[illegible]र्थं निरूपयति मुरारौ तन्नामके स्वपूर्वचतुर्थे।' अनेन ग्रन्थकृद्वाक्येनावगम्यते मुरारिरस्य पूर्वचतुर्थपुरुष इति मुरारेर्ब्राह्मणत्वे न केऽपि विवदन्ते प्रेक्षावन्तः। 'रसिकानन्दमुरारिस्तु भाष्यकृतः शाङ्कराविकगुरुपारम्पर्येण पूर्वचतुर्थपुरुषः' इति भाषणन्तु हेयम्। न खलु कश्चिद् गृही स्वपूर्वपुरुषपरिचयमवर्णयित्वा स्वगुरुपूर्वचतुर्थपुरुषं वर्णयति, न वा कश्चित् परिव्राड् गुरुमनुल्लिख्य गुरुवंशीयचतुर्थपुरुषनाम स्मरति, सदाचारविरोधात्। अन्यदपि वचनं तस्य ब्राह्मणत्वं स्फुटमवगमयति। तदुक्तं ग्रन्थकृता स्वकृतब्रह्मसूत्रभाष्येऽपशूद्राधिकरणे—

'इह भवति संशयः—वेदविद्यायां शूद्रोऽधिक्रियते न वेति? तत्र मनुष्याधिकारोक्तेरविशेषात् सामर्थ्यादिसत्त्वात् शूद्रेति श्रौतलिङ्गात् पुराणादिषु विदुरादीनां ब्रह्मवित्त्वदर्शनाच्च सोऽधिक्रियत इति प्राप्ते—

'शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि॥' १।३।३४

नेत्यनुवर्तते। तस्यां शूद्रो नाधिक्रियते। कुतः? हि यस्मात् पौत्रायणस्य जानश्रुतेरब्रह्मज्ञस्य "कम्बर एनमेतत् सन्तं सयुग्वानमिव रैक्वमात्थे"ति हंसोक्तानादरवाक्यश्रवणात्तदा ब्रह्मज्ञं रैक्वं प्रत्याद्रवणात् शुक् सञ्जातेति सूच्यतेऽस्यामाख्यायिकायां, तथा च शोकयोगादेवा-शूद्रेऽपि तस्मिन् शूद्रेति सम्बोधनं स्वसार्वज्ञ्यविज्ञापनायैव, न तु चतुर्थ-वर्णत्वादिति।'

'संस्कारपरामर्शात्तदभावाभिलापाच्च।' १।३।३६। श्रुत्यन्तरे "ऽष्ट-वर्षं ब्राह्मणमुपनयीत तमध्यापयेदेकादशे क्षत्रियं द्वादशे वैश्य"मित्य-ध्यापनाय संस्कारविमर्शनात्तत्र **ब्राह्मणानामेवाधिकारः।** 'नाग्निर्न यज्ञो न क्रिया न संस्कारो न व्रतानि शूद्रस्ये'ति संस्कारा-भावकथनाच्च शूद्रस्य नाधिकारः, त्रैवर्णिकबाह्यस्य संस्काराविधानात् संस्कारसापेक्षे वेदपाठे तस्य न सः।' इत्यादिग्रन्थकृदुक्तेरवगम्यते स ब्राह्मणकुलोत्पन्न इति। 'ब्राह्मणानामेवाधिकारः' इति भाषणन्तु अब्राह्मणे कथमपि न सम्भवति। कथं स वैश्यः सन् स्वाधिकारमपे-क्ष्याचार्यपदवीं गृहीत्वाऽध्यापयेत्। न खलु कश्चिदनुन्मत्त एवं भाषितुमुत्सहते। अतस्तेषां दैवब्राह्मण-शौक्रब्राह्मण-वृत्तब्राह्मणादि-प्रलापोक्तिरपास्ता।

"सर्वत्राऽस्खलितादेशः सप्तलोकैकदण्डधृक्।
अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः॥" इति

श्रीभागवतवचनमुत्यत्त्यैव ब्राह्मणत्वादिकमिति प्रतिपादयति। स्वकृत-वेदान्तस्यमन्तके विप्रपदमप्यस्य ब्राह्मणत्वमुपोद्वलयति।

शाङ्करमतेन सहास्य पार्थक्यम्

भगवन्तः श्रीशङ्कराचार्या हि निर्गुणं ब्रह्माङ्गीकुर्वन्ति, श्रीजीव-गोस्वामिपादास्तु ब्रह्मणः स्वरूपशक्तिं मन्यन्ते। सच्चिदानन्दस्वरूपस्य

ब्रह्मणो विशेषणीभूता सन्धिनी-संविद्-ह्लादिनीरूपा स्वरूपशक्तिः। एतन्मते ब्रह्मसाक्षात्कारादनन्तरं स्वरूपशक्तिवैचित्र्यविशिष्टो भगवत्-साक्षात्कारो भवति। शङ्करो हि भगवान् शुद्धज्ञानवादी, स तु कर्मसमुच्चितं ज्ञानं नाधिगच्छति; एतन्मतेऽपि कर्माद्यमिश्रिता शुद्धा भक्तिरेवाङ्गीक्रियते।

रामानुजमतेन सह पार्थक्यम्

रामानुजा जीवन्मुक्तिं नाभ्युपगच्छन्ति, एते तु शङ्करमतवत् तामुपाददते। ते ज्ञानकर्मसमुच्चयवादिनः, एते तु न तथा। यथा हि रामानुजा चिदचिद्विशिष्टं ब्रह्म मन्यन्ते, एतेऽपि शक्तित्रयविशिष्टं परतत्त्वमुररीकुर्वन्ति।

माध्वमतेन सह पार्थक्यम्

माध्वा हि द्वैतवादिनः। ते जीवस्यास्वातन्त्र्यमणुत्वञ्च, ईश्वरस्य स्वातन्त्र्यं विभुत्वञ्च स्वीकुर्वन्ति, एतेऽपि तथा। जीवेश्वरयोस्तु नात्यन्त-भेदमाद्रियन्ते, शक्तिशक्तिमतोरभेदादेव। भगवान् श्रीकृष्णचैतन्यः सम्प्रदायरक्षणार्थं माध्वसम्प्रदायाद् दीक्षितो बभूव। अत एते माध्वमतावलम्बिन इत्यभिधीयन्ते। वस्तुतस्तु स्वतन्त्रोऽयं वादः। अस्य वेदानुसारित्वं सनातनत्वञ्चावगम्येते पुराणादिषु। माध्वमते विष्णोरुपास्यत्वं लक्ष्म्यास्तु जीवकोटित्वम्, एतन्मते लक्ष्मीरञ्जित-वामांशः श्रीभगवान्, इति साध्यांशे भेदः। साधनांशेऽपि तथा। माध्वमते कर्ममिश्रभक्त्या भगवत्सान्निध्यलाभः, एतन्मते तु निर्गुणा-पर्यायशुद्धभक्त्या विचित्रलीलादिविशिष्टभगवत्सेवाप्राप्तिः। माध्व-मते भक्तेषु विप्रभक्तानामेव मोक्षः, एतन्मते भक्तमात्राणामेव भगवत्-साक्षात्काररूपा मुक्तिः। माध्वमते तप्तमुद्राधारणम्, एतन्मते चन्द-नादिना मुद्राधारणम्। माध्वरामानुजमते ऐश्वर्यप्रधानभक्तेः प्राधान्यम्,

एतन्मते माधुर्यप्रधानभक्तेरेव। माध्वमते भक्तेषु देवा मुख्याः, एतन्मते तु व्रजस्थनित्यपरिकरा एव।

वल्लभमतेन सह पार्थक्यम्

वल्लभाचार्या हि शुद्धाद्वैतवादिनो वात्सल्यप्रधानां भक्तिमङ्गीकुर्वन्ति, एते तु माधुर्यप्रधानामेव। वल्लभमते व्रजपरिकराणां मुख्यत्वम्, एतन्मतेऽपि तथा।

निम्बार्कमतेन सह पार्थक्यम्

निम्बार्कास्तु भेदाभेदवादिनः, एतेऽचिन्त्यभेदाभेदवादिनः। माध्वा रामानुजाश्च वैकुण्ठपतेर्नारायणस्य पारम्यम्, अन्येषां वासुदेवादीनां तद्विलासरूपत्वमङ्गीकुर्वन्ति। वल्लभ-निम्बार्क-श्रीकृष्णचैतन्यदेवास्तु गोलोकाधिपतेः श्रीकृष्णस्य पारम्यमन्येषां विष्णुादीनां तद्विलासरूपत्वं प्रतिपादयन्ति।

गौड़ीयवैष्णवमतस्य वैशिष्ट्यम्

यथा चिन्तामणिः स्वयमविकृतः सन् सुवर्णादिकमभिलषितं विविधं वस्तु प्रसूते, तथाविच्युतस्वभावाद् भगवतः सर्वं जगदुत्पद्यते। यथा सांख्यमतसिद्धा प्रकृतिर्जगद्रूपेण परिणमते, न तथा भगवान्। अपरञ्च वैशिष्ट्यं तत्र प्रागभिहितम्।

अस्य वैदिकत्वम्

नैतन्मतं पुरुषविशेषेणोहितमिति मन्तव्यमनादिकालात् प्रभृति सम्प्रदायक्रमेण मतमेतत् प्रवृत्तमित्यस्य वैदिकत्वमङ्गीकर्तव्यमनादित्वञ्च। श्रीकृष्णो भगवानस्य सम्प्रदायस्य पूर्वाचार्यः। गुरुपरम्परा तु ग्रन्थकृता प्रदर्शिताऽस्मिन् ग्रन्थे।

जीवगोस्वामि-बलदेवयोर्मतभेदः

श्रीमज्जीवगोस्वामिपादाः श्रीभगवतोऽचिन्त्यशक्तिमेवाङ्गीकुर्वन्तः स्वपक्षं स्थापितवन्तः। बलदेवमहाभागास्तु मध्वान्तर्गतं विशेषपदार्थमवलम्ब्य स्वमतमुररीचक्रुः। यद्यप्युभयोराचार्ययोरंशविशेषे पार्थक्यं परिदृश्यते, तथापि चरमावस्थायामैक्यमवसीयते। यथा जीवगोस्वामिपादाः श्रीकृष्णसेवोपयोगिपार्षदत्वमिच्छन्ति, तथा एतेऽपि।

अचिन्त्यभेदाभेदवादः

अचिन्त्यभेदाभेदवाद एव गौड़ीयवैष्णवसम्प्रदायसम्मतः। यद्यपि जीवगोस्वामिपादैरयं वादः स्वीकृतः, तथापि ग्रन्थकृता विद्याभूषणेन नायं खण्डितः, विशेषस्त्वतिरिक्तः समादृतः। तदुक्तं जीवगोस्वामिभिः भगवत्सन्दर्भे—'लोके हि सर्वेषां भावानां मणिमन्त्रादीनां शक्तयः अचिन्त्यज्ञानगोचराः—अचिन्त्यं तर्कासहं यज् ज्ञानं कार्यान्यथानुपपत्तिप्रमाणकं, तस्य गोचराः सन्ति। यद्वा भिन्नाभिन्नत्वादिविकल्पैश्चिन्तयितुमशक्याः केवलमर्थापत्तिज्ञानगोचराः सन्ति' इति।

सर्वसंवादिन्यां भगवत्सन्दर्भानुव्याख्यायां—

'तस्मात् स्वरूपादभिन्नत्वेन चिन्तयितुमशक्यत्वाद् भेदः, भिन्नत्वेन चिन्तयितुमशक्यत्वादभेदश्च प्रतीयत इति शक्तिशक्तिमतोर्भेदाभेदावेवाङ्गीकृतौ तौ चाचिन्त्याविति'ति।

सर्वसंवादिन्यां परमात्मसन्दर्भानुव्याख्यायामपि—

'स्वमते त्वचिन्त्यभेदाभेदावेवाचिन्त्यशक्तित्वात्।' इति

तदुक्तं ग्रन्थकृता सिद्धान्तरत्ने प्रथमपादे—

'विशेषस्त्ववश्यं स्वीकार्यः। स च भेदप्रतिनिधिर्भेदाभावेऽपि भेदकार्यस्य धर्मधर्मिव्यवहारस्य सत्यादिशब्दापर्यायतायाश्च निर्वर्तकः। इतरथा सत्ता सती, भेदो भिन्नः, कालः सर्वदास्ति, देशः सर्वत्रेत्य-

बाधितव्यवहारानुपपत्तिः। परेषामप्यावश्यकस्तत्स्वीकारः, इतरथा "विज्ञानमानन्दं ब्रह्म," "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिषु स्वरूपमात्र-बोधकानां विज्ञानादिशब्दानां पर्यायतापत्तिः, भ्रमाधिष्ठानत्वादिना चैतन्यस्य सर्वदा तदभिन्नानन्दादेरिदानीमप्रकाशानुपपत्तिश्च।' इत्यनयोराचार्ययोर्वाक्यजातं समालोच्यैवमवगम्यतेऽचिन्त्यभेदाभेदवाद उभयसम्मतः। अन्यदपि रहस्यं सुधीभिर्विभाव्यम्।

गौड़ीयवैष्णवमतसंक्षेपः

तदुक्तं गौड़ीयसम्प्रदायाचार्येण श्रीमद्भागवतटीकाकारश्रीश्रीनाथ-चक्रवर्तिना—

'आराध्यो भगवान् व्रजेशतनयस्तद्धाम वृन्दावनं
रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता।
शास्त्रं भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्रादरो नः परः॥' इति।

ग्रन्थकृदाविर्भावकालः

एवंविधा सम्प्रदायपरम्परागता काचिदाख्यायिकाऽस्माभिः श्रूयते यद् जयपुराधिपतौ जयसिंहे राज्यं शासति तत्परिषदि गोविन्ददेव-सेवाधिकार-गल्तापीठाधिपत्यनिर्णयार्थं विविधवैष्णवसम्प्रदायपण्डि-तानां सम्मेलनमभवत्। तत्रापरसम्प्रदायिभिः पण्डितवरैर्नरपति-रवबोधितो गौड़ीयवैष्णवसम्प्रदाये प्रस्थानत्रयभाष्यकृत् कश्चिदाचार्यो नास्तीति न तत्सम्प्रदायो गोविन्ददेवसेवाधिकारं गल्तापीठाधिपत्यञ्च लब्धुमर्हतीति प्रत्यपद्यत। अथ विद्याविभूषणः श्रीमान् विद्याभूषणस्तत्र विचारनैपुण्यं प्रदर्श्य गौड़ीयवैष्णवसम्प्रदायभाष्यमस्तीति बभाषे। ततो भाष्यप्रदर्शनार्थमभिधीयमानः श्रीगोविन्दैकान्तो स गोविन्दचरणशरण-मुपागमत्। स्वप्ने गोविन्देनादिष्टः श्रीमान् ग्रन्थकृदेकेनैव मासेन ब्रह्म-

सूत्रभाष्यं व्यरचयत्। ततश्च तद् गोविन्दभाष्यमिति व्यपदिश्यते। गोविन्दभाष्यस्यान्तिमश्लोक एतस्या याथार्थ्यं प्रमाणयति—

'विद्यारूपं भूषणं मे प्रदाय
ख्यातिं निन्ये तेन यो मामुदारः।
श्रीगोविन्दस्वप्ननिर्दिष्टभाष्यो
राधाबन्धुर्बन्धुराङ्गः स जीयात्॥' इति।

स खलु श्रीरूपसनातनयोर्गोस्वामिप्रवरयोरर्वाक्तन इति तद्भाषणादेवावगम्यते—

'गोविन्दाभिधमिन्दिराश्रितपदं हस्तस्थरत्नादिवत्
तत्त्वं तत्त्वविदुत्तमौ क्षितितले यौ दर्शयाञ्चक्रतुः।
मायावादमहान्धकारपटलीसत्पुष्पवन्तौ सदा
तौ श्रीरूपसनातनौ विरचिताश्चर्यौ सुवर्यौ स्तुमः॥' इति।

आसीत् किल श्रीमद्रूपगोस्वामी होसेननामधेयस्य वङ्गाधिपतेर्यवनराजस्य मन्त्रीति।

श्रीमज्जीवगोस्वामिपादाः श्रीमद्रूपगोस्वामिशिष्या भ्रातृतनयाश्चेति सर्वजनविदितमेतत्। ग्रन्थकृद्वचनात् श्रीमज्जीवगोस्वामिविरचितषट्सन्दर्भटीकाप्रणयनाच्च ततोऽप्यधस्तन इति स्फुटमवगम्यते। तत्र स्ववचनं यथा—

'यः साङ्ख्यपङ्केन कुतर्कपांशुना
विवर्तगर्तेन च लुप्तदीधितिम्।
शुद्धं व्यधाद्वाक्सुधया महेश्वरं
कृष्णं स जीवः प्रभुरस्तु नो गतिः॥' इति

छन्दःकौस्तुभादिग्रन्थप्रणेता श्रीराधादामोदरदासो ग्रन्थकृद्गुरुरिति तत्कृतभाष्योक्तेरवगम्यते—

'अर्चितनयनानन्दो राधादामोदरो गुरुर्जीयात्

... ...

श्रीराधादामोदरशिष्यो विद्याभूषणो नाम्ना
छन्दःकौस्तुभशास्त्रे भाष्यमिदं सम्प्रति व्यदधात् ॥' इति ।

न चायमब्राह्मण इति मन्तव्यं, कालिदास-हरिदासादिवद् राधा-दामोदरदास इति तन्नामधेयसम्भवात्। दासस्योपाधित्वेऽपि तस्य तालव्यान्तत्वं, किञ्च साम्प्रतमुत्कले दाशोपाधिका बहवो ब्राह्मणाः सन्ति, तथाच नायमब्राह्मणः ।

साहित्यकौमुद्यां ग्रन्थकृतोऽन्तिमः श्लोकः—

'आनन्दयति श्यामां रसिकान्नयनानि स्वधामानि च
विस्मापकदामोदरलोलोऽवतु नः स गोविन्दः ॥' इति ।

कृष्णानन्दिनीतिप्रसिद्धायां तट्टीकायामपि—

'श्रीदामोदरस्य निजगुरोरपि विस्मापकसौन्दर्यत्वात्तथोक्तम् ।' इति ।

ग्रन्थकारो जयपुरराजस्य जयसिंहस्य सदसि पण्डितैः सार्द्धं विचारार्थमराजत। तत्र स गौड़ीयवैष्णवसम्प्रदायप्राधान्यं स्थापयामास। ततः प्रभृति तत्र गौड़ीयवैष्णवसम्प्रदायः पूज्यते। षोड़शशकाब्दे राजा जयसिंहो राज्यमकरोदिति ग्रन्थकृतोऽपि तादृशः कालः स्वीकर्तव्यः ।

टीकाकृत्परिचयः

कान्तिमालाभिधा संक्षिप्ता टीका टिप्पनी वा विरचिता केनचिद् वेदान्तवागीशेन। संक्षिप्ताप्येषा न स्वमतं व्यभिचरति। टीकाया अन्तिमश्लोकस्तावत् टीकाकृतं वेदान्तवागीशोपाधिना परिचाययति। कस्यचिन्मतते कृष्णदेववेदान्तवागीश इति तन्नामधेयम्। अस्माभिरपि तदेव नाम परिगृहीतम्। यत्र नाम्नि विशयस्तत्राऽपरः परिचयो दुर्लभ एव।

कृतज्ञताप्रकाशः

विविधभाषातत्त्वज्ञश्रीमद् अमूल्यचरणघोषविद्याभूषणमहाशयो हस्तलिखितपुस्तकादिसाहाय्येन सम्यगस्मदुपकारकः संवृत्तः, अतः स सुधीवरः सततमाशिषाऽभिनन्द्यते। पण्डितवर्यश्रीयुत-कालीपद-तर्काचार्यमहाशयो लब्धाभ्युदयः श्रीयुतचिन्ताहरणकाव्यतीर्थ एम्. ए. महोदयश्च विविधविषयोपदेशेनास्माननुगृहीतवन्तौ। तावपि सादर-मभ्यर्थ्येते इति शम्।

आश्रव—

श्रीमद् अक्षयकुमारशर्मा।

प्रमेयरत्नावलीविषयसूची

प्रथमप्रमेये—

विषयाः	पृष्ठे
१। मङ्गलाचरणम्—	
(क) गोविन्द-गोपीनाथ-मदनगोपालजयाशंसनरूपा प्रणतिः	१
(ख) नित्यानन्दाद्वैतचैतन्यवन्दनम् … …	३
(ग) आनन्दतीर्थापरनाममध्वमुनिप्रणामः …	५
(घ) गुरुपरम्पराध्यानकर्तव्यता तत्फलवर्णनञ्च …	६
२। सम्प्रदायविहीनमन्त्रवैफल्यकथनम् … …	७
३। कलौ वैष्णवचतुःसम्प्रदायकथनम् … …	७
४। वैष्णवाचार्यचतुष्टयनामसङ्कीर्तनम् … …	८
५। गुरुपारम्पर्यकथनम् … … …	९
६। नवविधप्रमेयनामनिर्देशः … …	१०
७। श्रीविष्णोः परतमत्वे श्रुति-स्मृतिप्रमाणप्रदर्शनम् …	१४-१६
८। श्रीविष्णुपारतम्यहेतुसमूहप्रदर्शनम् … …	१७
९। श्रीकृष्णस्य सर्वहेतुत्वकथनम् … …	१९
१०। श्रीकृष्णस्य चैतन्यानन्दस्वरूपत्वप्रतिपादनम् …	२०
११। श्रीकृष्णस्य विज्ञानसुखरूपत्वे युक्तिप्रदर्शनम् …	२१
१२। चित्सुखरूपस्यैव श्रीकृष्णस्य मूर्तत्वकथनम् …	२३
१३। भगवद्देहदेहिभेदाभावप्रदर्शनम् … …	२३
१४। मूर्तस्यैव भगवतो विभुत्वप्रतिपादनम् … …	२५
१५। मूर्तस्यैव विभुत्वे प्रमाणप्रदर्शनम् … …	२६
१६। भगवतोऽचिन्त्यशक्तेर्योगत्वकथनम् … …	३१
१७। भगवतः सर्वज्ञत्वे श्रौतप्रमाणप्रदर्शनम् … …	३२
१८। भगवतः प्रभुत्व-सुहृत्त्व-ज्ञानदत्व-मोचकत्वप्रतिपादनम् …	३३-३५
१९। भगवतो माधुर्यप्रतिपादनम् … …	३५

	विषयाः	पृष्ठे
२० ।	विशेषपदार्थस्थापनम्	३७
२१ ।	धर्मधर्मिणोर्भेदाभेदखण्डनम्	३७
२२ ।	तत्र प्रमाणप्रदर्शनम्	३८
२३ ।	श्रीविष्णोर्नित्यलक्ष्मीकत्वप्रतिपादनम्	३९
२४ ।	श्रीविष्णोः शक्तित्रयकथनम्	४०
२५ ।	श्रीविष्णोः परा शक्तिः श्रीस्तदभिन्नो भगवानिति कथनम्	४०
२६ ।	श्रीविष्णोः स्वरूपशक्तिकथनम्	४१-४२
२७ ।	परायाः शक्तेस्त्रित्वकथनम्	४४
२८ ।	एकस्यैव विष्णोर्बहुरूपत्वप्रतिपादनम्	४५-४७
२९ ।	श्रीविष्णोः परिपूर्णत्वम्	४८
३० ।	भगवतो नित्याप्राकृतदेहत्वकथनम्	५०
३१ ।	श्रियाः परिपूर्णत्वकथनम्	५१
३२ ।	पूर्णत्वेऽपि भगवदवताराणां तारतम्यप्रतिपादनम् ...	५३
३३ ।	श्रियास्तारतम्यप्रतिपादनम्	५५
३४ ।	भगवद्धाम्नो नित्यत्वाप्राकृतत्वकथनम्	५६-६२
३५ ।	भगवल्लीलानित्यत्वकथनम्	६३-६४
३६ ।	भगवत्कर्म-नित्यत्वसाधनम्	६५-६७

द्वितीयप्रमेये—

१ ।	भगवतः श्रीहरेरखिलाम्नायवेद्यत्वकथनम् ...	६८
२ ।	श्रीहरौ सर्वशास्त्रतात्पर्यवर्णनम्	६९
३ ।	वेदान्तानां साक्षाद्भगवत्प्रतिपादकत्वमन्येषां वेदभागानाञ्च परम्परयेति वर्णनम्	७०
४ ।	अवाच्यत्वश्रुतेस्तात्पर्यनिर्णयः	७१
५ ।	ब्रह्मणो निर्धर्मकत्वखण्डनम्	७२
६ ।	ब्रह्मणः शब्दावाच्यत्वे लक्ष्यताभावकथनम् ...	७३

विषयाः पृष्ठे

तृतीयप्रमेये—

१। विश्वसत्यत्वप्रतिपादनम् ७५
२। असच्छ्रुतेर्वैराग्यार्थत्वकथनम् ७५
३। शक्तियोगेन ब्रह्मणो जगद्रूपेण परिणामित्वकथनम् ... ७६
४। 'आत्मा वा इदमग्र आसीत्' इति श्रुतेस्तात्पर्यकथनम् ८०

चतुर्थप्रमेये—

१। विष्णुतो जीवानां भेदकथनम् ८१
२। तत्र भेदे श्रुतिप्रमाणप्रदर्शनम् ८१-८२
३। भेदे षड्विधतात्पर्यलिङ्गप्रदर्शनम् ८३
४। जीवब्रह्मैक्यखण्डनम् ८६
५। भेदनित्यत्वकथनम् ८६
६। जगद्ब्रह्मसामानाधिकरण्यश्रुतेरुपपादनम् ... ८९-९१
७। प्रतिबिम्बपरिच्छेदवादखण्डनम् ९२
८। ब्रह्माद्वैतभेदाभेदपक्षे दोषप्रदर्शनम् ९३
९। निर्गुणब्रह्मवादखण्डनम् ९४

पञ्चमप्रमेये—

१। जीवानां भगवद्दासत्वकथनम् ९५
२। तत्र श्रौतस्मार्तप्रमाणप्रदर्शनम् ९५-९७

षष्ठप्रमेये—

१। जीवानां तारतम्यकथनम् ९८
२। जीवाणुत्व-चैतन्य-ज्ञानित्वादि-प्रतिपादनम् ... ९८-१००
३। जीवानां देहव्यापिचैतन्यगुणत्वकथनम् ... १००-१०१
४। चैतन्यगुणनित्यत्वप्रतिपादनम् १०२
५। कर्मभेदेन भक्तिभेदेन च जीवभेदकथनम् १०३

सप्तमप्रमेये—

१। श्रीकृष्णप्राप्तेर्मोक्षत्वप्रतिपादनम् १०६

विषयाः		पृष्ठे
२।	श्रीरामाद्युपासकानाञ्च मोक्षत्वप्रतिपादनम् ...	१०६

अष्टमप्रमेये—

१।	एकान्तभक्तेर्मोक्षहेतुत्वकथनम्	१०७
२।	भक्तिस्वरूपनिरूपणम्	१०७-१०९
३।	नवलक्षणभक्तिकथनम्	१०९-११२
४।	देवभावेन साधुसेवया गुरुसेवया च भक्तिप्राप्तिकथनम् ...	११३-११६
५।	पञ्चसंस्काराणां द्विविधभक्तेश्च श्रीहरिप्राप्तिसाधनत्वकथनम्	११७
६।	पञ्चसंस्कारप्रतिपादनम्	११७-१२०
७।	नवधाभक्तेर्विधिरुचिभेदेन द्वैविध्यकथनम् ...	१२१
८।	भक्तिभेदेन भजनीयभेदकथनम्	१२२
९।	तुलस्यश्वत्थादिपूजनकथनम्	१२३
१०।	अरुणोदयविद्धहरिवासरस्य त्याज्यत्वप्रतिपादनम् ...	१२३
११।	सूर्योदये सप्तमीविद्धजन्माष्टम्यादित्यागकथनम् ...	१२३
१२।	त्रिविधभक्त्यधिकारिवर्णनम्	१२५
१३।	दशनामापराधवर्जनकथनम्	१२५
१४।	भक्तिवैशिष्ट्येन फलवैशिष्ट्यम्	१२७-१२८

नवमप्रमेये—

१।	प्रमाणत्रित्वकथनम्	१२८
२।	प्रत्यक्षानुमानशब्दानामेव प्रमाणत्वप्रतिपादम् ...	१२८
३।	श्रीभागवतोक्त-प्रमाणचतुष्टयस्य त्रैविध्येऽन्तर्भावकथनम् ...	१२९
४।	शब्दसाचिव्येन प्रत्यक्षानुमानयोः प्रमाजनकत्वकथनम् ...	१२९
५।	तयोरस्वातन्त्र्यप्रतिपादनम्	१२९
६।	अनुकूलतर्कस्वीकारकथनम्	१३०
७।	शुष्कतर्कवर्जनत्वप्रतिपादनम्	१३०
८।	श्रुतिमुख्यत्वकथनम्	१३४

विषयाः पृष्ठे

उपसंहारे—

१। माध्वमते नवप्रमेयप्रतिपादनम् १३५
२। ग्रन्थोपादेयत्ववर्णनम् १३६
३। श्रीचैतन्यवन्दनम् १३७

प्रमेयरत्नावलीधृतानां ग्रन्थानां नामानि।

पद्मपुराणम्।
श्रीगोपालपूर्वतापनीयोपनिषत्।
श्वेताश्वतरोपनिषत्।
कठोपनिषत्।
श्रीमद्भगवद्गीता।
वृहदारण्यकोपनिषत्।
श्रीगोपालोत्तरतापनीयोपनिषत्।
मुण्डकोपनिषत्।
श्रीमद्भागवतम्।
तैत्तिरीयोपनिषत्।
नारदपञ्चरात्रम्।
विष्णुपुराणम्।
महावाराहपुराणम्।
अथर्वोपनिषत्।
गौतमीयतन्त्रम्।
छान्दोग्योपनिषत्।
ऋग्वेदः।
ब्रह्मसंहिता।
हरिवंशः।
ईशावास्योपनिषत्।
महाभारतम्।
स्मृतिः।
प्रश्नोपनिषत्।
ब्रह्मसूत्रम्।
कौथुमोपनिषत्।

प्रमेयरत्नावली

प्रथमप्रमेयम्

मङ्गलाचरणम्

(१)

जयति श्रीगोविन्दो गोपीनाथः स मदनगोपालः ।
वक्ष्यामि यस्य कृपया प्रमेयरत्नावलीं सूक्ष्माम् ॥ १

कान्तिमाला

(२)

गौड़ोदयमुपयातस्तमः समस्तं भिदन्ति यौ युगपत् ।
ज्योतिर्द्वयीऽतिशीतः पीतस्तमुपास्महे कृताञ्जलयः ॥ १

विद्याभूषणापरनाम्ना बलदेवेन श्रीगोविन्दैकान्तिना ब्रह्मसूत्रेषु गोविन्दभाष्याभिधानं व्याख्यानं विरचितम् । अथ कैश्चिच्छिष्यैर्भाष्यप्रमेयाणि परिपृष्टः स तानि संक्षेपाद् वक्ष्यन् निर्विघ्नाय तत्पूर्तये मङ्गलमाचरति—जयतीति । कीदृशः श्रीगोविन्द इत्याह—गोपीनाथो वल्लवीकान्तः, मदयति मनांसि भक्तानामिति मदनः, गाः पालयतीति गोपालः, ततः कर्मधारयः । स्फुटार्थमन्यत् । श्लेषेण वृन्दाटवीमधिष्ठितानां श्रीगोविन्दादिसंज्ञानां निखिलचैतन्यभक्ताभीष्टानां त्रयाणामर्चावताराणां जयाशंसनम् । उभयतः (३) प्रणतिलक्षणमङ्गलं कृतं जयतिना तस्याक्षेपात् ॥ १

प्रभा

प्रणम्य सच्चिदानन्दं जगतामीश्वरं हरिम् ।
परतत्त्वप्रकाशार्थां मेयरत्नावलेः प्रभा ॥

---

(१) मूलश्लोकोपरि—श्यामसुन्दरो जयति इति पाठः 'ग' पुस्तके दृश्यते ।

(२) कान्तिमालाटीकाया आदौ श्रीगणेशाय नमः इति 'ग' पुस्तके ।

(३) उभव—इति 'ग' पुस्तके ।

भारद्वाजेन विप्रेण श्रीमदच्युतशर्मणा ।
बालानामवबोधाय स्फुटं व्याकीर्यते मया ॥

अथ श्रीगोविन्दैकान्ती विश्ववैष्णवराजसभासभाजनभाजनं निखिलशास्त्रार्थसारज्ञो गौड़विभूषणो विद्याभूषणोपनामकस्तत्रभवान् ग्रन्थकृच्छ्रीमान् बलदेवः श्रीगोविन्दकृपया गोविन्दभाष्याभिधानं ब्रह्मसूत्रव्याख्यानं विरचय्य मन्दमतीनां विनेयानां हिताय संक्षेपेण माध्वमतानुगत-गोविन्दभाष्यप्रमेयाणि वक्तुकामो निर्विघ्नं ग्रन्थसमाप्तये विघ्ननिवृत्तये वा मङ्गलमाचरति—जयतीति। श्रीगोविन्दः श्रीगोपाललीलः, अनेन सुखसेव्यत्वं सूच्यते, जयति सर्वोत्कर्षेण वर्तते। यद्यपि—

दिग्-दृष्टि-दीधिति-स्वर्ग-वज्र-वाग्-बाण-वारिषु।
भूमौ पशौ च विद्वद्भिर्गोशब्दो दशसु स्मृतः॥ इति

कोषोक्तेः, 'गोभूमिवेदविदि' त्यादिश्रौतनिरुक्तेरर्थान्तरमप्यस्ति, तथापि 'महेन्द्रमदभित् प्रीयान्न इन्द्रो गवाम् [भा० १०।२६।२५] इति शुकोक्तेस्तथा व्याख्यातम्। स कीदृश इत्याह—गोपीनाथ इति। गोपीनामानन्दचिन्मयरसप्रतिभावितानां ह्लादिनीवृत्तिरूपाणां गोपदेवीनां नाथः स्वामी। तथाहि गोपालपूर्वतापनीयोपनिषदि—'तदु होवाच ब्राह्मणः कृष्णो वै परमं दैवतं, गोविन्दान्मृत्युर्बिभेति, गोपीजनवल्लभज्ञानेन तज् ज्ञातं भवति स्वाहेदं संसरति'। १। इति। 'स वो हि स्वामी भवति' इति गोपालोत्तरतापनीयश्रुतेः। 'अनेकजन्मसिद्धानां गोपीनां पतिरेव सः' इति गौतमीयतन्त्राच्च। तदनुगततया तादृप्येणोपासनयाऽन्येषामपि तत्प्राप्तिर्भवतीति सूचितम्। स च मदनगोपालः, मदयति चेतांसि ब्रह्मरुद्रादीनां भगवद्भक्तानामिति मदनः। तथा चोक्तं श्रीमद्भागवते—

'सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः।
कवय आनतकन्धरचित्ताः कश्मलं ययुरनिश्चितचित्ताः॥' १०।३५।१५ इति

मदनश्चासौ गोपालश्चेति मदनगोपालः। यद्यपि पूर्वाचार्यमाध्वमते स्वतन्त्रमस्वतन्त्रश्चेति तत्त्वद्वयं, तच्च प्रमेयं, तथाप्यवान्तरप्रमेयभेदेनात्र बहुत्वम्। ननु 'प्रमेयसिद्धिः प्रमाणाद्धि' इति न्यायेन प्रमेयनिरूपणार्थं प्रागेव प्रमाण-

सत्त्वमावश्यकं, न च तदत्र प्रतिपादितमतो न्यूनतेति चेन्न, प्रत्यक्षानुमाना-गमाख्यप्रमाणत्रयाणामत्राङ्गीकारादाद्ययोर्वासुदेवे परे तत्त्वेऽसम्भवादागमैक-गम्यत्वाच्च तस्य, तच्च प्रतिपादयिष्यते ग्रन्थकृता स्वयमेव। प्रमाणप्रमेययोः प्रमेयस्यैवाभ्यर्हितत्वात् प्राधान्येन तन्निरूप्यते ग्रन्थनाम्ना संकीर्त्यते च। वक्ष्यति च 'प्रमाणं प्रत्यक्षादित्रयञ्च' इति प्रमाणत्रित्वम् ॥ १

বঙ্গানুবাদ

গোপীগণের পতি, মদনগোপাল, ভক্তবৃন্দের চিত্তাকর্ষক, গোপালক শ্রীগোবিন্দ সর্ব্ববিধ উৎকর্ষ লাভ করিয়া বিরাজ করিতেছেন। তাঁহার উদ্দেশে আমাদের প্রণিপাত, তাঁহারই কৃপায় সূক্ষ্ম প্রমেয় অর্থাৎ প্রতিপাদ্য পদার্থরূপ রত্নসমূহ বিবৃত করিব॥ ১

भक्त्याभासेनापि तोषं दधाने
धर्माध्यक्षे विश्वनिस्तारिनाम्नि ।
नित्यानन्दाद्वैतचैतन्यरूपे
तत्त्वे तस्मिन्नित्यमास्तां रतिर्नः ॥ २

कान्तिमाला

पुनरपि तत्र रतिप्रार्थनं मङ्गलमाह—भक्त्येति। तत्त्वे परमात्मनि कृष्णे 'तत्त्वं वाक्य-प्रभेदे स्यात् स्वरूपे परमात्मनि' इति विश्वः। कीदृशीत्याह—भक्त्याभासेनापीति। यथा पुत्रोद्देशेन नामोच्चारयत्यजामिले तुष्टिर्दृष्टा। धर्माणामध्यक्षे प्रवर्तके। नित्य आनन्दो यस्य तन्नित्यानन्दस्य, नास्ति द्वैतं देहदेहिभेदो यस्य तदद्वैतस्य, चैतन्यं विज्ञानञ्चेति कर्मधारयः, तद्रूपे तदात्मके। पक्षे, कलावस्मिन् श्रीकृष्णो बलदेवेन महाविष्णोरवतारेण च सहितो (१) जनानुद्धर्त्तुमवततार। तत्र श्रीकृष्णस्य चैतन्य इति बलदेवस्य (२) नित्यानन्द इति महा-विष्णोरवतारस्याऽद्वैत (३) इति नामाऽभूत्। तस्मिन् त्रिरूपे तत्त्वे नो रतिर्नित्यमास्ताम्। अन्यत् प्राग्वत्, प्रमाणं त्ववाकरग्रन्थाद ग्राह्यम् ॥ २

---

(१) सङ्कर्षणेन प्रद्युम्नेन च सहितः—इति 'क' तथा 'ग' पुस्तके च पाठः।

(२) सङ्कर्षणस्य—इति 'क' तथा 'ग' पुस्तके।

(३) अम्भोरुहद्वैतः—इति 'क' तथा 'ग' पुस्तके।

प्रभा

विषयवैमुख्येन भगवति परे तत्त्वे रतिं प्रार्थयते—भक्त्याभासेनेति। यद्यप्यनन्यया भक्त्यैव भगवान् प्राप्तव्यः, 'भक्त्या त्वनन्यया लभ्योऽहमेवंविधोऽर्जुन!' [११।५४] इत्यादि श्रीमद्भगवद्गीतास्मरणात्, तथापि भक्त्याभासेन भक्तिप्रतिरूपकेण, न तु वास्तवभक्त्या, भक्तिस्तु आनुकूल्येन कृष्णानुशीलनरूपा, सा चेन्न सम्भवेत्, तथापि 'विक्रुश्य पुत्र मघवान् यदजामिलोऽपि, नारायणेति म्रियमाण इयाय मुक्तिम्' [भा० ६।३।२४] इत्युक्तदिशाऽन्यव्यपदेशेन भगवन्नामोच्चारणरूपेण भक्त्याभासेनेत्यर्थः। भक्त्याभासत्वं नाम कृष्णान्यतात्पर्येणानुशीलनत्वम्। तोषं प्रीतिं दधाने धारयति, धर्माध्यक्षे धर्मस्य भगवद्भक्तिलक्षणस्याध्यक्षे प्रवर्तके। विश्वनिस्तारिनाम्नि—विश्वान् जनान् निस्तारयितुं शीलमस्येति विश्वनिस्तारि, तादृशं नाम यस्मिन्। नित्योऽप्राकृत आनन्दो यस्मिन् स नित्यानन्दः, नास्ति द्वैतं हरिणा सह भेदो यस्य सोऽद्वैतः, ताभ्यां विलासांशाभ्यां यत् श्रीकृष्णचैतन्याख्यतत्त्वं तस्मिन्। तस्मिन् शास्त्रप्रसिद्धे स्वयंरूपाख्ये तत्त्वे परमार्थवस्तुनि नोऽस्माकं, बहुवचनं शिष्याभिप्रायेण। नित्यमविरतं यथा स्यात् तथा रती रत्यपरपर्याया भावभक्तिरित्यर्थः, आस्तामस्तु—इति प्रार्थना। नित्यानन्देत्यनेन प्राकृतानन्दस्य व्यवच्छेदः। न चानन्दस्य गुणत्वाद् गुणवतो द्रव्यस्य घटादिवदनित्यत्वप्रसङ्गः, निर्गुणश्रुतीनां प्राकृतहेयगुणनिषेधपरत्वादप्राकृतगुणानां तत्र सत्त्वात्, अन्यथा 'यः सर्वज्ञः सर्ववित्', 'यदात्मको भगवान् तदात्मिका व्यक्तिः किमात्मको भगवान् ज्ञानात्मक ऐश्वर्यात्मकः शक्त्यात्मकश्च', 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादयः श्रुतयः—

'मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम्।
सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः॥' [भा० ११।१३।४०] इति

'नमः सर्वगुणातीतषड्गुणायादिवेधसे।' [नारदपञ्चरात्रम्] इति

'गुणैः स्वरूपभूतैस्तु गुण्यसौ हरिरीश्वरः।
न विष्णुने च मुक्तानां क्वापि भिन्नगुणो मतः॥' [ब्रह्मतर्कः] इति

'एते चान्ये च भगवन्नित्या यत्र महागुणाः।

प्राघ्यां महत्त्वमिच्छन्निर्न वियन्ति स्म कर्हिचित् ॥' [भा०११।१६।३०]

इति च स्मृतयो व्याक्रुप्येरन् ॥ २

বঙ্গানুবাদ

যিনি ভক্ত্যাভাসের দ্বারাও প্রীতিবিধান করেন, যাঁহার শ্রীমুখারবিন্দবিনিঃসৃত কৃষ্ণাদিনাম শ্রবণ করিয়া লোক সংসার হইতে নিস্তার লাভ করেন, সেই নিত্যানন্দ ও অদ্বৈতসমন্বিত শ্রীকৃষ্ণচৈতন্যরূপ তত্ত্বে আমাদের সর্ব্বদা প্রীতি থাকুক। অনুকূলভাবে কৃষ্ণানুশীলনের নাম ভক্তি, কৃষ্ণভিন্নতাৎপর্য্যে অনুশীলনের নাম ভক্ত্যাভাস, যেমন অজামিল পুত্রের উদ্দেশে ভগবানের নাম উচ্চারণ করিয়া মুক্তি লাভ করিয়াছেন ॥ ২

आनन्दतीर्थनामा सुखमयधामा यतिर्जीयात् ।
संसारार्णवतरणिं यमिह जनाः कीर्तयन्ति बुधाः ॥३

कान्तिमाला

अथ पूर्वाचार्यं प्रणमति—आनन्देति । आनन्दतीर्थ इति श्रीमध्वाचार्यस्य नामान्तरं, यतिः परिव्राट्, तरणिं नौकाम् ॥ ३

प्रभा

सम्प्रदायप्रवर्तकमाचार्यं प्रणमति—आनन्देति । आनन्दतीर्थ इति नाम यस्य सः, आनन्दतीर्थ इति वायोरवतारभूतस्य मध्वाचार्यस्य नामधेयान्तरम् । सुखमयमानन्दस्वरूपं धाम यस्य सः, स च सुखस्वरूपे नित्ये श्रीनिवासचरणकमले निवसति । अथवा सर्वेषां संसारतापदग्धानां जीवानां सुखमयधामरूपः । जना हि नित्यानन्दं भगवन्तमुपदिशन्तं तमवलम्बन्ते । यतिः परिव्राजको जीयात् सर्वोत्कर्षेण वर्तताम् । इह संसारे बुधास्तत्त्वज्ञा यमानन्दतीर्थं संसार एवार्णवः समुद्रः, अपारत्वात्, तस्य तरणिं नावमुद्धरणोपायमित्यर्थः, कीर्तयन्ति वर्णयन्ति ॥ ३

বঙ্গানুবাদ

আনন্দতীর্থ যাঁহার নাম, যিনি সুখময় ধামে অবস্থান করিয়াছেন, তত্ত্বজ্ঞগণ

যাঁহাকে সংসারসমুদ্রের নৌকা বলিয়া কীর্ত্তন করেন, সেই সন্ন্যাসী মধ্বাচার্য্য জয়যুক্ত হউন ॥ ৩

গুরুপরম্পরাস্মরণফলম্

ভবতি বিচিন্ত্যা বিদুষা নিরবকরা গুরুপরম্পরা নিত্যম্
একান্তিত্বং সিধ্যতি যয়োদয়তি যেন হরিতোষঃ ॥৪

কান্তিমালা

ভাষ্যপ্রমেয়াণি যতো লব্ধানি, সা গুরুপরম্পরা ধ্যেয়েত্যাহ—ভবতীতি। গুরুপরম্পরা দৈশিকবংশঃ, শিষ্যপ্রশিষ্যাদিধারা (১) 'পরম্পরা পরীপাট্যাং সন্তানেঽপি (২) বধে ক্বচিৎ' ইতি বিশ্বঃ। নিরবকরা নির্দোষা, তস্যা ধ্যানেন কিং স্যাদিত্যবাহ—যয়া পরম্পরয়া ধ্যাতয়া ধ্যাতুরৈকান্তিত্বং সিধ্যতি হর্য্যেকনিষ্ঠত্বং ভবতি, যেনৈকান্তিত্বেন হরিতোষ উদয়তি।

'তেষাং জ্ঞানী নিত্যযুক্ত একভক্তির্বিশিষ্যতে।
প্রিয়ো হি জ্ঞানিনোঽত্যর্থমহং স চ মম প্রিয়ঃ॥ ৪ [গীতা ১।১৭] ইত্যাদি স্মৃতেঃ।

প্রভা

সম্প্রদায়প্রবর্ত্তকানাং গুরূণাং ধ্যেয়ত্বমাহ—ভবতীতি। নিরবকরাঽনবদ্যা সম্প্রদায়প্রবর্ত্তকানাং গুরূণামাচার্য্যাণাং পরম্পরা ধারা বিদুষা জ্ঞানবতা পুরুষেণ নিত্যং সততং বিচিন্ত্যা ধ্যেয়া। যয়া গুরুপরম্পরয়া ধ্যাতয়েত্যর্থঃ, একান্তিত্বং হর্য্যৈকনিষ্ঠত্বং সিধ্যতি ভবতি, যেন একান্তিত্বেন, হরিতোষো ভগবৎপ্রীতিঃ, উদয়তি আবির্ভবতি। স চ ভগবান্ ধ্যানেন প্রীতঃ সন্ অভীষ্টং ফলং প্রযচ্ছতি ॥ ৪

বঙ্গানুবাদ

বিদ্বদ্ব্যক্তি নির্দ্দোষ গুরুপরম্পরা নিত্য ধ্যান করিবেন। মানব যাহার দ্বারা একাগ্রতা লাভ করেন এবং যে একাগ্রতার দ্বারা ভগবান্ শ্রীহরির প্রীতি হইয়া থাকে ॥ ৪

---

(১) শিষ্যপ্রশিষ্যাদিধারা—ইতি পাঠঃ 'ক' তথা 'গ' পুস্তকে নাস্তি।

(২) ঘ।

कलौ सम्प्रदायाविर्भावकथनम्

यदुक्तं पद्मपुराणे—

सम्प्रदायविहीना ये मन्त्रास्ते विफला मताः।
अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः॥
श्री-ब्रह्म-रुद्र-सनका वैष्णवाः क्षितिपावनाः।
चत्वारस्ते कलौ भाव्या ह्युत्कले पुरुषोत्तमात्॥ (क) इति

कान्तिमाला

प्रमेयोपदेशपथप्रवर्त्तकाश्चत्वारः प्रागभूवन्, तेभ्यो गङ्गाप्रवाहवदपरे प्रचरिताः। तदुपदिष्टेन पथा विना मन्त्रशास्त्रादुपलब्धा विष्णुमन्त्रा मुक्तिदा न भवन्तीति। अत्र पाद्मवाक्यमाह—सम्प्रदायेति। शिष्टानुशिष्टगुरूपदिष्टो मार्गः सम्प्रदायः। शिष्टत्वं वेदप्रामाण्याभ्युपगन्तृत्वम्। अतः सम्प्रदायविहीनानां विष्णुमन्त्राणां जप्तानामपि वैफल्याद्धेतोः कलौ तदारम्भे सम्प्रदायिनस्ते केऽभूवन्, तत्राह—श्रीति। पुरुषोत्तमादिति जगन्नाथात् तत्प्रेरणात्तत्क्षेत्राद्वेत्यर्थः॥ (क)

प्रभा

सम्प्रदायपरम्परागतानां मन्त्राणां फलवत्त्वमाह पद्मपुराणं—सम्प्रदायेति। ये मन्त्राः सम्प्रदायविहीना गुरुपरम्परारहितास्ते विफलाः फलरहिता मता विदुषामिति शेषः। सम्प्रदायो नाम गुरुपरम्परागतः सदुपदेशः। यस्तु मन्त्रः सम्प्रदायपरम्परया न लब्धः स्वयमूहितो ग्रन्थादिदर्शनेन वा निश्चितः, न स फलं भगवत्प्राप्तिरूपमपवर्गं प्रयच्छति। अतः सम्प्रदायविहीनमन्त्राणां फलराहित्यात् कलौ चत्वारः सम्प्रदायिनो वैष्णवशास्त्रप्रवर्तका भविष्यन्ति। के ते इत्याकाङ्क्षायामाह—श्रीब्रह्मेति। क्षितिपावना जन्मना जगत्पवित्रताकारिणो वैष्णवा विष्णुभक्ताः श्री-ब्रह्म-रुद्र-सनकाः श्रीसम्प्रदाया ब्रह्मसम्प्रदाया रुद्रसम्प्रदायाः सनकसम्प्रदायाश्च चत्वार उत्कले तदाख्यप्रसिद्धदेशे पुरुषोत्तमाद् भगवतः श्रीकृष्णात् तदाख्यक्षेत्राद्वा कलौ भाव्या उत्पाद्याः, हि निश्चये॥ (क)

বঙ্গানুবাদ

পদ্মপুরাণে এইরূপ উক্ত হইয়াছে যথা—সম্প্রদায়বিহীন মন্ত্র জপ করিলে কোন

ফল হয় না, অতএব কলিকালে চারিটী বৈষ্ণবসম্প্রদায় আবির্ভূত হইবেন। জগতের পবিত্রতাসম্পাদনকারী বিষ্ণুভক্ত শ্রী, ব্রহ্ম, রুদ্র ও সনক—এই চারিটী সম্প্রদায় কলিযুগে উৎকলদেশে ভগবান্ শ্রীকৃষ্ণ হইতে অথবা পুরুষোত্তম (জগন্নাথ) ক্ষেত্র হইতে আবির্ভূত হইবেন॥ (ক)

আচার্য্যচতুষ্টয়নামকথনম্

রামানুজং শ্রীঃ স্বীচক্রে মধ্বাচার্য্যং চতুর্ম্মুখঃ।
শ্রীবিষ্ণুস্বামিনং রুদ্রো নিম্বাদিত্যং চতুঃসনঃ॥ (খ)

কান্তিমালা

আদিভূতাংশ্চত্বারঃ স্বস্বসম্প্রদায়ান্ প্রৌঢ়ান্ বীক্ষ্য স্বর্বস্থেষু (১) তত্তুর্য্যাংশ্চতুরশ্চক্রু-রিত্যাহ—রামেতি। শ্রীর্লক্ষ্মীঃ স্বসম্প্রদায়প্রবর্ত্তনক্ষমতয়া রামানুজং স্বীচক্রে, স্ফুটার্থ-মন্যৎ॥ (খ)

প্রভা

তত্রাসাধারণসম্প্রদায়মাহ—রামেতি। শ্রীর্লক্ষ্মী রামানুজং সম্প্রদায়-প্রবর্ত্তকত্বেন স্বীচক্রে। স্বরূপভূতয়া লক্ষ্ম্যা বিনা ভগবৎপ্রীত্যসম্ভবাৎ সাম্প্রযণীয়া, অতস্তৎসম্প্রদায়স্তু শ্রীনাম্না খ্যাতঃ। চতুর্ম্মুখো ব্রহ্মা মধ্বা-চার্য্যং সম্প্রদায়প্রবর্ত্তকত্বেন স্বীচক্রে। চতুঃসনশ্চত্বারঃ সনাঃ সনক-সনন্দন-সনাতন-সনৎকুমারা যস্য সঃ, নিম্বাদিত্যং নিম্বার্কম্। তথা চোক্তং লঘু-ভাগবতামৃতে—

'চতুর্ভিরবতারোঽয়মেক এব সতাং মতঃ।
সন-শব্দাচ্চতুর্ব্বৈব চতুঃসন ইতি স্মৃতঃ॥' ইতি। (খ)

বঙ্গানুবাদ

উক্ত চারিটী সম্প্রদায়ের মধ্যে বিষ্ণুশক্তি লক্ষ্মীদেবী রামানুজকে, ব্রহ্মা মধ্বাচার্য্যকে, রুদ্র শ্রীবিষ্ণুস্বামীকে এবং চতুঃসন অর্থাৎ সনক, সনন্দন, সনাতন ও সনৎকুমার নিম্বার্ককে সম্প্রদায়-প্রবর্ত্তকরূপে স্বীকার করিয়াছিলেন॥ (খ)

---

(১) স্বস্বধর্ম্মেষু ইতি 'গ' পুস্তকে।

तत्र स्वगुरुपरम्परा यथा—

श्रीकृष्ण-ब्रह्म-देवर्षि-बादरायणसंज्ञकान् ।
श्रीमध्व-श्रीपद्मनाभ-श्रीमन्नृहरि-माधवान् ॥
अक्षोभ्य-जयतीर्थ-श्रीज्ञानसिन्धु-दयानिधीन् ।
श्रीविद्यानिधि-राजेन्द्र-जयधर्मान् क्रमाद् वयम् ॥
पुरुषोत्तम-ब्रह्मण्य-व्यासतीर्थांश्च संस्तुमः ।
ततो लक्ष्मीपतिं श्रीमन्माधवेन्द्रञ्च भक्तितः ॥
तच्छिष्यान् श्रीश्वराद्वैत-नित्यानन्दान् जगद्गुरून् ॥
देवमीश्वरशिष्यं श्रीचैतन्यञ्च भजामहे ।
श्रीकृष्णप्रेमदानेन येन निस्तारितं जगत् ॥ इति (ग)

(१)

कान्तिमाला

मुख्यप्रयोजनाभावात् आदिपरम्परां विहाय स्वकीयां ब्रह्मपरम्परामाह—श्रीकृष्णेति (२) ब्रह्मणः श्रीकृष्णशिष्यत्वं (३) श्रीगोपालपूर्वतापन्यां विस्फुटम् । श्रीमध्वमुनेर्बादरायणशिष्यत्वं त्वैतिह्यप्रसिद्धम् । मध्वशङ्करौ सहस्रविद्वद्गोष्ठीमध्यस्थौ [illegible]कायामनशनतया विचारं चक्रतुः । तत्र नभसि नीलाभ्रप्रख्यः सर्वैर्दृष्टो [illegible] मध्वमतं स्वीचकार, शङ्करमतं त्वत्याक्षीदिति प्रसिद्धम् । तच्छिष्यानिति—त[illegible] माधवेन्द्रस्य शिष्यान् श्रीश्वराचार्याद्वैताचार्यनित्यानन्दान् । देवमिति । माधवेन्द्रस्य ईश्वर, ईश्वरस्य श्रीकृष्णचैतन्य इति । इत्यञ्च वयाणां प्रभूणां वंशै(४)रिदानीन्तनैः संबध्य स्वगुरुपरम्परा सर्वैर्वोढव्या इति दर्शितम् । येनेति श्रीचैतन्येन ॥ (ग)

प्रभा

तत्र—पद्मपुराणे । श्रीकृष्ण एतत्सम्प्रदायादिगुरुः । तच्छिष्यो ब्रह्मा, स च

---

(१) 'क', 'ख' तथा 'घ' पुस्तके इति गुरुपरम्परा इति पाठो दृश्यते ।

(२) कृष्णेति पाठस्तु 'क' तथा 'ख' पुस्तके ।

(३) कृष्णशिष्यत्वम् इति 'ग' पुस्तके ।

(४) शिष्यधाराभिः इति 'ख' पुस्तके ।

পুরা ভগবতঃ শ্রীকৃষ্ণাজ্জাতস্তস্মাচ্চ বিদ্যামবাপ। তথা চ গোপালপূর্ব্বতাপনীয়োপনিষৎ—"যো ব্রহ্মাণং বিদধাতি পূর্ব্বং যো বিদ্যাস্তস্মৈ গাপয়তি স্ম কৃষ্ণঃ তং দেবমাত্মবৃত্তিপ্রকাশং মুমুক্ষুর্ব্বৈ শরণমমুং ব্রজেৎ" ইতি। ব্রহ্মশিষ্যস্তু দেবর্ষির্নারদ ইত্যর্থঃ। নারদস্য ব্রহ্মশিষ্যত্বং পুরাণপ্রসিদ্ধম্। নারদশিষ্যস্তু বাদরায়ণো বেদব্যাসঃ। তচ্ছিষ্যঃ শ্রীমধ্বাচার্য্যঃ, শ্রীমধ্বশিষ্যঃ শ্রীপদ্মনাভঃ, তচ্ছিষ্যঃ শ্রীনৃহরিঃ, তচ্ছিষ্যঃ শ্রীমাধবঃ, তচ্ছিষ্যঃ শ্রীমান্ অক্ষোভ্যঃ, তচ্ছিষ্যো জয়তীর্থঃ, তচ্ছিষ্যঃ শ্রীজ্ঞানসিন্ধুঃ, তচ্ছিষ্যো দয়ানিধিঃ, তচ্ছিষ্যঃ শ্রীবিদ্যানিধিঃ, তচ্ছিষ্যো রাজেন্দ্রঃ, তচ্ছিষ্যো জয়ধর্মঃ, তচ্ছিষ্যঃ পুরুষোত্তমঃ, তচ্ছিষ্যো ব্রহ্মণ্যঃ, তচ্ছিষ্যো ব্যাসতীর্থঃ, ব্যাসতীর্থশিষ্যস্তু লক্ষ্মীপতিঃ, তচ্ছিষ্যঃ শ্রীমাধবেন্দ্রঃ। বয়ং ক্রমাৎ ক্রমেণ এতান্ সম্প্রদায়প্রবর্তকান্ ভক্তিতো ভক্ত্যা সংস্তুমঃ। শ্রীমাধবেন্দ্রশিষ্যাস্তু (১)শ্রীশ্বরাচার্যঃ (২)অদ্বৈতাচার্যঃ (৩)শ্রীনিত্যানন্দশ্চেতি ত্রয়ো জগদ্গুরবঃ, এতান্ বয়ং ভজামহে গুরুত্বেনাশ্রয়ামঃ। ঈশ্বরশিষ্যশ্চ দেবো ভগবান্ শ্রীচৈতন্যঃ, যেন খলু শ্রীকৃষ্ণপ্রেমভক্তিদানেন জগৎ নিস্তারিতং, তমপি বয়ং ভজামহে ॥ (গ)

বঙ্গানুবাদ

পদ্মপুরাণে স্বীয় গুরুপরম্পরা উক্ত হইয়াছে যথা:—শ্রীকৃষ্ণ এই সম্প্রদায়ের আদিগুরু। শ্রীকৃষ্ণশিষ্য ব্রহ্মা, ব্রহ্মশিষ্য নারদ, নারদশিষ্য বাদরায়ণ অর্থাৎ বেদব্যাস। বেদব্যাসশিষ্য শ্রীমান্ মধ্বাচার্য্য, তাঁহার শিষ্য শ্রীমান্ পদ্মনাভ, পদ্মনাভশিষ্য শ্রীনৃহরি, তদীয় শিষ্য মাধব, তাঁহার শিষ্য অক্ষোভ্য, তদীয় শিষ্য জয়তীর্থ, জয়তীর্থশিষ্য শ্রীজ্ঞানসিন্ধু, তদীয় শিষ্য দয়ানিধি, তচ্ছিষ্য শ্রীবিদ্যানিধি, তাঁহার শিষ্য রাজেন্দ্র, রাজেন্দ্রশিষ্য জয়ধর্ম্ম, তাঁহার শিষ্য পুরুষোত্তম, তদীয় শিষ্য ব্রহ্মণ্য, তাঁহার শিষ্য ব্যাসতীর্থ, তদীয় শিষ্য লক্ষ্মীপতি, তাঁহার শিষ্য শ্রীমাধবেন্দ্র, আমরা ভক্তিসহকারে যথাক্রমে এই বৈষ্ণবসম্প্রদায়প্রবর্ত্তকগণের স্তব করি। শ্রীমাধবেন্দ্রের শিষ্য তিন জন (১)ঈশ্বরাচার্য্য (২)অদ্বৈতাচার্য্য ও (৩)নিত্যানন্দ, ইঁহারা জগদ্গুরু, আমরা ইঁহাদিগের অর্চ্চনা করি। ঈশ্বরশিষ্য ভগবান্ শ্রীচৈতন্যদেব, যিনি শ্রীকৃষ্ণের প্রেমভক্তি বিতরণ করিয়া জগদ্বাসিগণকে রক্ষা করিয়াছেন। আমরা তাঁহারও আরাধনা করি ॥ (গ)

अथ प्रमेयाण्युद्दिश्यन्ते—

श्रीमध्वः प्राह विष्णुं परतममखिलाम्नायवेद्यञ्च विश्वं
सत्यं भेदञ्च जीवान् हरिचरणजुषस्तारतम्यञ्च तेषाम् ।
मोक्षं विष्ण्वङ्घ्रिलाभं तदमलभजनं तस्य हेतुं प्रमाणं
प्रत्यक्षादित्रयञ्चेत्युपदिशति हरिः कृष्णचैतन्यचन्द्रः ॥ ५

कान्तिमाला

एवं स्वगुरुपरम्परामाख्याय तत्प्रमेयाणि तावदुद्दिशति—श्रीमध्व इति। मध्वो मुनिरस्मत्पूर्वाचार्यो विष्णुं परतममखिलाम्नायवेद्यञ्चाह। तस्य सर्वजीवाभिन्नतां चिन्मात्रवादितीयतयाम्नायलक्ष्यताञ्च निरस्यति—विश्वं भेदञ्च सत्यमाह। चाविद्यकत्वात् प्रपञ्चस्तद्भेदश्च मृषेति परोत्प्रेक्षितं कुमतं निराकरोतीत्यर्थः। जीवान् बद्धमुक्तान् नित्यमुक्तान् (१) सर्वान् हरिचरणजुषो हरेर्दासानाह, तेषां हर्यात्मकत्वं निराकरोति। तेषां जीवानां तारतम्यं स्वरूपसाम्ये सत्यपि साधनोज्जृम्भितैः फलैः वैषम्यमाह। विदण्डिप्रतिपादितं फलतोऽपि (२) साम्यं निराकरोति। जीवानां विष्ण्वङ्घ्रिलाभं विष्णुसाक्षात्कारं मोक्षमाह, पराभिमतां तेषां विष्णुरूपतां निराकरोति। तत्र विष्णोरमलं निष्कामं यद्भजनं तत् तस्य मोक्षस्य हेतुमाह। ब्रह्माहमस्मीतिज्ञानस्य मोक्षहेतुतां निराकरोति। प्रत्यक्षादीनि त्रीणि स्वमते प्रमाणान्याह, तेभ्योऽधिकान्युपमानादीनि निराकरोति। इत्येतान्येव मध्वमुनिस्वीकृतानि नव प्रमेयाणि श्रीकृष्णचैतन्यहरि (३) स्तदन्वयगृहीतदीक्षः स्वशिष्यानुपदिशति। उभयत्र लट्प्रयोगस्तयोः (४) सत्त्वात्। जगत्प्राणो वायुर्देवो विष्णोरेकान्तीति केनोपनिषदि प्रसिद्धम्। यो हनुमान् सन् श्रीराघवेन्द्रं भीमः सन् श्रीयादवेन्द्रं मध्वः सन् पाराशर्यं श्रीमुनीन्द्रञ्च तत्तन्मतप्रतीपान् खण्डयन् प्रतोषयामास। यद्यपि श्रीकृष्णचैतन्य (५) ईश्वरस्तथापि तन्मतं सर्वोत्तमं वीक्ष्य तदन्वये दीक्षां स्वीचकार लोकसंग्रहेच्छुः। यत्र विशुद्धं द्वैतं हरेरात्ममूर्तित्वादिति च वक्ष्यते ॥ ५

(१) बद्ध-मुक्त-नित्यमुक्तान् इति 'घ' पुस्तके।
(२) फलमपि इति 'ग' पुस्तके।
(३) श्रीकृष्णचैतन्यचन्द्रो हरिः इति 'ग' पुस्तके।
(४) लटः प्रयोगस्तयोरुभयोः इति 'ग' पुस्तके।
(५) कृष्णचैतन्य इति 'ग' पुस्तके।

प्रभा

अथ स्वगुरुपरम्परानिरूपणानन्तरं प्रमेयाणि प्रतिपाद्याः पदार्थां उद्दिश्यन्ते नाम्ना संकीर्त्यन्ते। तथा च वात्स्यायनकृतन्यायभाष्यं—"त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः—उद्देशो लक्षणं परीक्षा चेति, तत्र नामधेयेन पदार्थमात्रस्य कथनमुद्देशः" १।१।२ इति। श्रीमध्वः श्रीमान् मध्वाचार्यो विष्णुं हरिं परतमं सर्वोत्तमं वस्तु प्रमेयम् अखिलाम्नायवेद्यं च वेदादिनिखिलशास्त्रप्रतिपाद्यञ्च प्राह। विष्णुं परतममित्यनेन सांख्यादिमतं निराकृतमखिलाम्नायवेद्यमिति चानुमानशरणानां कणभक्षाक्षचरणानां मतानि निराकृतानीति वेदितव्यम्। प्रपञ्चस्य मिथ्यात्वं भेदस्य च जीवानाञ्चाद्वयत्वमद्वैतवेदान्तसिद्धान्तसम्मतमपाकरोति—विश्वमिति। विश्वं जगत्, भेदं जीवेश्वरयोर्जीवानां जीवजगतोरीशजगतोर्जगदन्तर्गतानां पदार्थानां परस्परं भेदं सत्यं प्राहेति पूर्वेणान्वयः, एवं सर्वत्र, इति माध्वमते, स्वमते तु विष्णुना सह भेदमिति विशेषः। जीवान् सर्वान् हरिचरणजुषो विष्णुचरणकमलसेवकान् प्राह। तथाच श्रीवैष्णवसम्प्रदायगुरुणा श्रीजामातृमुनिनोपदिष्टं तत्र प्रणवव्याख्याने पाद्मोत्तरखण्डं यथा—

> "मकारेणोच्यते जीवः क्षेत्रज्ञः परवान् सदा।
> दासभूतो हरेरेव नान्यस्यैव कदाचन॥" इति

न चाद्वैतमतवज्जीवेश्वरयोरैक्यं वदति, तथा सति महान् प्रत्यवायो भवेत्, न च किञ्चिज्ज्ञो जीवः सर्वज्ञः परमेश्वरो भवितुमर्हति, न च भृत्यो राजाहमिति ब्रुवाणो राज्ञोऽनुग्रहं लभते, अपि तु ततो हानिमभ्युपैति। तदाह—

> "घातयन्ति हि राजानो राजाहमितिवादिनः।
> ददत्यखिलमिष्टञ्च स्वगुणोत्कर्षवादिनाम्॥" इति

तेषां जीवानां तारतम्यमुत्कृष्टापकृष्टभावं प्राह। परस्परं भिन्नानां जीवानां चित्त्वेनैकरूप्ये सत्यपि बद्धमुक्तादिप्रातिस्विकरूपेण पार्थक्यमस्ति। विष्णुङ्घ्रिलाभं विष्णोर्भगवतश्चरणलाभं पादपद्मप्राप्तिं मोक्षं तत्साक्षात्कारमिति यावत् प्राह। मोक्षस्तु सर्वतन्त्रसिद्धान्तः, विप्रतिपत्तिस्तु विशेषे। न च मोक्षो विष्णुप्रसादमन्तरेण सम्भवति, तथा च विष्णुपुराणम्—

"তস্মিন্ প্রসন্নে কিমিহাস্ত্যলভ্যং
ধর্মার্থকামৈরলমল্পকাস্তে।
সমাশ্রিতাদ্ ব্রহ্মতরোরনন্তা-
ন্নিঃসংশয়ং মুক্তিফলং প্রযান্তি॥" ১।১৭।৫১ ইতি।

স চ নিত্যঃ, ইতরে ত্রয়ঃ পুরুষার্থা অনিত্যাঃ, তদমলভজনমিতি—তস্য বিষ্ণোরমলং নিষ্কামং জ্ঞানকর্মাদ্যনাবৃতং বা যদ্ ভজনং সেবা, তদ্ধেতুং তস্য মোক্ষস্য হেতুং কারণং প্রাহ, ন চ তত্ত্বমস্যাদিবাক্যজন্যং জ্ঞানম্। প্রত্যক্ষাদিত্রয়ঞ্চেতি। প্রত্যক্ষমনুমানমাগমশ্চেতি ত্রিতয়ং প্রমাণং ন চ পরাভিমতমষ্টবিধম্, উপমানস্যার্থাপত্তেঃ সম্ভবস্য চানুমানেঽনুপলব্ধেশ্চ প্রত্যক্ষে ঐতিহ্যস্য চ শাব্দেঽন্তর্ভাবাৎ প্রমাণত্রিত্বমেব, নাতোঽধিকং ন বা ন্যূনমিতি। তথা চ তার্কিকরক্ষায়াং প্রমাণপ্রকরণে প্রত্যক্ষনিরূপণে—

"প্রত্যক্ষমেকং চার্বাকাঃ কণাদসুগতৌ পুনঃ।
অনুমানঞ্চ তচ্চাপি সাংখ্যাঃ শব্দঞ্চ তে উভে॥
ন্যায়ৈকদেশিনোঽপ্যেবমুপমানঞ্চ কেচন।
অর্থাপত্ত্যা সহৈতানি চত্বার্যাহুঃ প্রাভাকরাঃ॥
অভাবঃ ষষ্ঠান্যেতানি ভাট্টা বেদান্তিনস্তথা।
সম্ভবৈতিহ্যযুক্তানি তানি পৌরাণিকা জগুঃ॥" ইতি

হরিঃ শ্রীচৈতন্যচন্দ্র উপদিশতি। মাধ্বমতং শ্রীচৈতন্যসম্মতম্॥ ৫

বঙ্গানুবাদ

এই গ্রন্থে কতগুলি প্রমেয় অর্থাৎ প্রতিপাদ্য পদার্থ, নামোল্লেখপূর্ব্বক তাহাই কথিত হইতেছে। শ্রীমধ্বাচার্য্য নয়টী প্রমেয় বলেন, তাহাই ভগবান্ হরি শ্রীকৃষ্ণচৈতন্য লোককে উপদেশ দিয়াছেন। সেই নয়টী প্রমেয় যথাক্রমে নয়টী অধ্যায়ে প্রদর্শিত হইয়াছে যথা—(১) একমাত্র বিষ্ণুই পরতম—শ্রেষ্ঠতম বস্তু। (২) বিষ্ণু বেদাদি সকল শাস্ত্রের প্রতিপাদ্য। (৩) জগতের সত্যত্ব। (৪) ঈশ্বর হইতে জীবভেদের সত্যত্ব। (৫) জীবসমূহ ভগবানের সেবক। (৬) জীবগণের তারতম্য অর্থাৎ উৎকৃষ্টাপকৃষ্টভাব। (৭) বিষ্ণুপাদপদ্মলাভই

মুক্তি। (৮) বিশুদ্ধভক্তির মোক্ষহেতুত্ব। (৯) এই প্রমেয়ের কারণ হইতেছে (ক)প্রত্যক্ষ, (খ)অনুমান ও (গ)শব্দ এই তিনটী প্রমাণ ॥ ৫

पारतम्यप्रकरणम्

तत्र श्रीविष्णोः परतमत्वं यथा श्रीगोपालोपनिषदि—

"तस्मात् कृष्ण एव परो देवस्तं ध्यायेत् तं रसेत् तं भजेत् तं यजेत्" ॥ १ ॥ इति (क)

कान्तिमाला

एवमुद्दिष्टानि प्रमेयाणि क्रमात् सप्रमाणानि कर्तुं प्रवर्तते—तत्र श्रीविष्णोरित्यादिभिः। परतमत्वं श्रेष्ठतमत्वम्। तस्मादिति पूर्वोक्तादर्थप्रचयाद्धेतोः, तं मन्त्रं तद्वाच्यतया (१) द्विधा सन्तं ध्यायेत् स्मरेत्, रसेत् जपेत्, भजेत् परिचरेत्, यजेत् अर्चयेत् ॥ (क)

प्रभा

तत्र तेषु प्रमेयेषु मध्ये आदौ श्रीविष्णोर्भगवतः परतमत्वं श्रेष्ठतमत्वं प्रतिपाद्यते इति शेषः। तत्र श्रीगोपालपूर्वतापनीयोपनिषदोऽन्तिमवाक्यं प्रमाणत्वेनाङ्गीकरोति—यथेति। तस्मात् पूर्वस्मात् कारणात् कृष्ण एव परः श्रेष्ठो देवः। कृष्णशब्दश्चात्र शब्दब्रह्मगूढ़परब्रह्मनन्दनन्दनवाचकतायां रूढ़ः। तं ध्यायेत् एकाग्रचेतसा चिन्तयेत् स्मरेदिति यावत्। तं रसेत्—विभावादिभिरनुभवेत्। भजेत् सेवेत, यजेत् पूजयेत् इति ॥ (क)

বঙ্গানুবাদ

নয়টী প্রমেয়ের মধ্যে সর্ব্বাগ্রে ভগবান্ শ্রীহরির শ্রেষ্ঠতমত্ব প্রতিপাদিত হইতেছে। শ্রীগোপালপূর্ব্বতাপনীয় উপনিষদের অন্তে এইরূপ বাক্য আছে—সেইহেতু ভগবান্ কৃষ্ণই একমাত্র শ্রেষ্ঠ দেবতা, তাঁহার ধ্যান করিবে। সেই রসস্বরূপ ভগবান্‌কে বিভাব, অনুভাবাদির দ্বারা আস্বাদন করিবে, তাঁহার সেবা করিবে এবং তাঁহার পূজা করিবে ॥ (ক)

श्वेताश्वतरोपनिषदि च—

---

(१) मन्त्रतद्वाच्यतया इति 'ख' तथा 'ग' पुस्तके।

"ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात् तृतीयं देहभेदे
विश्वैश्वर्यं केवलमाप्तकामः" ॥१।११। इति (ख)
"एतज् ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किञ्चित्" ॥१।१२ इति च (ग)

कान्तिमाला

ज्ञात्वेति। शास्त्रात् सद्गुरुतात्, देवं परेशं ज्ञात्वावस्थितस्य मुमुक्षोः सर्वेषां देहदैहिकममतापाशानां हानिर्भवति। तत्पाशजन्यैः क्लेशैः क्षीणैर्विशिष्टस्य तस्याः प्रारब्धभोगपूर्तेः (२) पुनःपुनर्जायमानस्य जन्ममृत्युप्रहाणिर्भवति। विड़ालीदन्तस्पर्शेन तदर्भकस्येव जन्मादिना दुःखं तस्य न भवतीत्यर्थः। अथोत्तरोत्तरं तस्य देवस्याभिध्यानाद् देहस्य लिङ्गशरीरस्य भेदे विनाशे सति चान्द्रब्राह्मापेक्षया तृतीयं भागवतं पदं स देवध्यायी लभते विमुक्तो भवतीत्यर्थः। कीदृशं तृतीयं तदित्याह—विश्वैश्वर्यं कृत्स्नविभूतिकं केवलं प्रकृत्यस्पृष्टं, ततः स देवध्यायी आप्तकामः पूर्णाभिलाषो भवति ॥ (ख)

एतद्देवात्मकं वस्तु ज्ञेयं, अतः परमन्यद्वेदितव्यं किञ्चिन्नास्ति तस्यैव पारतम्यात् ॥ (ग)

प्रभा

देवं सर्वाध्यक्षं सर्वेश्वरं हरिं वेदाज् ज्ञात्वा स्थितस्य मुमुक्षोः सर्वेषां देहदैहिकममतापाशानां हानिश्छेदो भवति। तत्पाशहेतुकैः क्लेशैः अविद्यास्मितारागद्वेषाभिनिवेशैः क्षीणैः विशिष्टस्य तस्य प्रारब्धभोगपूर्तेः पुनः पुनर्जायमानस्य जन्ममृत्युप्रहाणिर्भवति—विड़ालीदन्तस्पर्शेन तदर्भकस्येव जन्मादिभ्यां तस्य क्लेशो न भवतीत्यर्थः। अथोत्तरोत्तरं तस्य देवस्य स्वयंप्रकाशस्य भगवतोऽभिध्यानाद् आभिमुख्येन ध्यानात् तैलधारावन्नैरन्तर्येण स्मरणाल्लिङ्गादिदेहस्य भेदे प्रध्वंसे सति चान्द्रब्राह्मापेक्षया तृतीयं भागवतं पदं स देवज्ञो विन्दतीति शेषः। तृतीयं तत् कीदृक्—विश्वैश्वर्यम् अनन्तनित्यदिव्यविभूतिकं केवलप्रकृतिगन्धेनाप्यस्पृष्टम्। ततः स देवज्ञ आप्तकामो भवति। (ख)

---

(२) तस्याप्रारब्धभोगपूर्तेः इति 'च' पुस्तके।

এতৎ নিত্যম্ অবিনাশি, আত্মসংস্থম্ আত্মনি বর্তমানং ব্রহ্ম জ্ঞেয়ং মুমুক্ষুভিঃ উপাস্যম্। হি যস্মাৎ, অতঃ অস্মাদ্ ব্রহ্মণঃ স্বরূপেণ গুণৈশ্চানন্ত্যাৎ পরম্ অন্যৎ কিঞ্চিদ্ বেদিতব্যং জ্ঞাতব্যং ন অস্তি।

"ভোক্তা ভোগ্যং প্রেরিতারঞ্চ মত্বা
সর্বং প্রোক্তং ত্রিবিধং ব্রহ্মমেতৎ॥ ইতি চাপরার্দ্ধম্।

ভোক্তা চিৎ জীবঃ, ভোগ্যম্ অচিদ্বস্তু প্রকৃত্যাদিকং সর্বং. প্রেরিতারং প্রেরয়িতারঞ্চ অন্তর্যামিণমীশ্বরমিত্যর্থঃ, মত্বা জ্ঞাত্বা সর্বং নিখিলং প্রোক্তং সর্বজ্ঞৈঃ প্রকর্ষেণ কথিতম্ এতৎ ত্রিবিধং তিস্রো বিধাঃ প্রকারা ভোক্তৃভোগ্যপ্রেরয়িতৃ-রূপা যস্মিন্ তৎ ত্রিবিধং ব্রহ্ম ব্রহ্ম ইত্যর্থঃ, শক্তিশক্তিমতোরভেদাৎ। ব্রহ্ম-মিতি ছান্দসঃ॥ (গ)

বঙ্গানুবাদ

ভগবান্ শ্রীকৃষ্ণ সকলের ঈশ্বর—এইরূপ জানিলে মুমুক্ষু ব্যক্তির সমস্ত বন্ধন মোচন হয়। অবিদ্যা, অস্মিতা, রাগ, দ্বেষ ও অভিনিবেশরূপ পাঁচটী ক্লেশ ক্ষয় প্রাপ্ত হইলে আর জন্ম ও মৃত্যু হয় না। ভগবানের নিরন্তর স্মরণ করিতে করিতে লিঙ্গশরীরাদির ধ্বংস হয় এবং চান্দ্র ও ব্রাহ্মপদ অপেক্ষা তৃতীয় শুদ্ধসত্ত্ব-ময় অনন্তনিত্যবিভূতিযুক্ত প্রকৃতিসম্বন্ধরহিত ভাগবতপদ লাভ হইলে সকল অভীষ্ট পূর্ণ হয়॥ (খ)

সকলের আত্মাতে বিরাজমান নিত্য ভগবান্ই একমাত্র জ্ঞাতব্য, ইহা অপেক্ষা অন্য জ্ঞাতব্য কিছুই নাই॥ (গ)

শ্রীগীতাসু চ—

"মত্তঃ পরতরং নান্যৎ কিঞ্চিদস্তি ধনঞ্জয়!" ॥৭।৭ ইতি (ঘ)

কান্তিমালা

মত্ত ইতি। পরতরং মত্তোঽন্যৎ কিঞ্চিন্নাস্তীতি মামেব সর্বোত্তমং বিদ্ধীত্যর্থঃ। পরমেব পরতরং স্বার্থে প্রত্যয়ঃ তরঃ (১)॥ (ঘ)

প্রভা

মদন্যস্য কস্যচিদপি শ্রেষ্ঠ্যাভাবাদহমেব মদন্যসর্বাশ্রয় ইত্যাহ—ময়ি

(১) তরপ্প্রত্যয়ঃ।

इति। हे धनञ्जय! मत्तः वासुदेवात् अन्यत् परतरं श्रेष्ठतरं किञ्चिद् वस्तु न अस्ति। अहमेव सर्वश्रेष्ठं वस्तु इत्यर्थः। 'यस्मात् परं नापरमस्ति किञ्चित्' (श्वेता० ३।९) इति श्रुतेः, 'तथाऽन्यप्रतिषेधात्' (व्या० सू० ३।२।३६) इति न्यायाच्च। 'मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव' इति श्लोकार्द्धम्॥ (घ)

বঙ্গানুবাদ

হে অর্জ্জুন! আমা অপেক্ষা অন্য কোন পরতত্ত্ব নাই॥ (ঘ)

हेतुत्वाद्विभुचैतन्यानन्दत्वादिगुणाश्रयात्।
नित्यलक्ष्म्यादिमत्त्वाच्च कृष्णः परतमो मतः॥ ६

कान्तिमाला

यैर्हेतुभिर्विष्णोः पारतम्यं, तानाह—हेतुत्वादिति। हेतुत्वं प्रपञ्चनिमित्तोपादानत्वम्। तत्र पराख्यशक्तिमत्त्वेन निमित्तत्वं, प्रधानजीवाख्यशक्तिमत्त्वेन तूपादानत्वं बोध्यं, स्फुटार्थमन्यत्॥ ६

प्रभा

इदानीं विष्णोः पारतम्यकारणभूतान् हेतूनाह—हेतुत्वादिति। कृष्णः परतमो हेतुत्वात्, विभुचैतन्यानन्दत्वादिगुणाश्रयात्, नित्यलक्ष्म्यादिमत्त्वाच्चेति। तत्राद्यहेतुं विभजते—हेतुत्वादिति। निखिलजगन्निमित्तोपादानकारणत्वात्, तत्र निमित्तत्वं स्वरूपशक्त्या, उपादानत्वं मायाजीवशक्तिभ्यां, शक्तिशक्तिमतोरभेदात् श्रीविष्णोरेव निमित्तत्वमुपादानत्वञ्च सिध्यतः। शक्तिश्च सा त्रिधा, अन्तरङ्गा बहिरङ्गा तटस्था च; तत्रान्तरङ्गा स्वरूपशक्तिः, बहिरङ्गा मायाशक्तिः, तटस्था जीवशक्तिश्चेति। तथा चोक्तं श्रीविष्णुपुराणे—

"विष्णुशक्तिः परा प्रोक्ता क्षेत्रज्ञाख्या तथा परा।
अविद्याकर्मसंज्ञाऽन्या तृतीया शक्तिरिष्यते॥" ६।७।६१

स्वरूपानुबन्धिनित्यदिव्यविभुत्वादिकं प्रतिपादयति—विभुचैतन्येति। विभुः सर्वगतो यश्चैतन्यानन्दत्वादिगुणास्तदाश्रयात्। नित्यत्वात्, विभुत्वात्, सर्वाश्रयत्वात्, स्थूलसूक्ष्मप्राकृतवस्त्वतिरिक्तत्वात्, प्रत्यग्रूपत्वात्, स्वप्रकाशत्वात् सर्वश्रुतिसमन्वयसिद्धत्वाच्च सच्चिदानन्दलक्षणपरतत्त्वस्वरूपोऽपि स्वरूपानुबन्धि-

নিত্য দিব্যবিভূত্যাশ্রয়ঃ। 'যদাত্মকো ভগবান্ তদাত্মিকা ব্যক্তিঃ' 'পরাস্য শক্তির্বিবিধৈব শ্রূয়তে, (শ্বেতা০ ৬।৮) ইত্যাদিশ্রুতেঃ। এবঞ্চানন্দমাত্রং বিশেষ্যং সমস্তাঃ শক্তয়ো বিশেষণানি, বিশিষ্টো ভগবানিত্যায়াতম্। তথা চোক্তং শ্রীমদ্ভাগবতে ধ্রুবং প্রতি শ্রীমনুনা চ—

"ত্বং প্রত্যগাত্মনি তদা ভগবত্যনন্ত
আনন্দমাত্র উপপন্নসমস্তশক্তৌ।" ৪।১১।৩০ ইতি।
"বিশুদ্ধবিজ্ঞানঘনং স্বসংস্থয়া
সমাপ্তসর্বার্থমমোঘবাঞ্ছিতম্।
স্বতেজসা নিত্যনিবৃত্তমায়া-
গুণপ্রবাহং ভগবন্তমীমহি॥" ভা০ ১০।৩৭।২২ ইতি চ।

নিত্যলক্ষ্ম্যাদিমত্ত্বাচ্চ। নিত্যলক্ষ্মীরত্র ভগবদন্তরঙ্গমহাশক্তিঃ; হ্লাদিনী, সন্ধিনী, সংবিৎ, ভক্ত্যাধারশক্তিঃ, বিমলা, জয়া, যোগা, প্রহ্বী-শানা অনুগ্রহাদয়শ্চ মহাশক্তের্বৃত্তিরূপা জ্ঞেয়াঃ। স্ববৃত্তিভেদেনানন্তায়া অপি কিয়ন্তো ভেদা দর্শিতাঃ। তথা চোক্তং শ্রীমদ্ভাগবতে—

"অনপায়িনী ভগবতী শ্রীঃ সাক্ষাদাত্মনো হরেঃ।" ১২।১১।২০ ইতি।

শ্রীবিষ্ণুপুরাণে চ—

"নিত্যৈব সা জগন্মাতা বিষ্ণোঃ শ্রীরনপায়িনী।
যথা সর্বগতো বিষ্ণুস্তথৈবেয়ং দ্বিজোত্তম!॥" ইতি।

হয়শীর্ষপঞ্চরাত্রে চ—

"পরমাত্মা হরির্দেবস্তচ্ছক্তিঃ শ্রীরিহোদিতা।
শ্রীর্দেবী প্রকৃতিঃ প্রোক্তা কেশবঃ পুরুষঃ স্মৃতঃ॥
ন বিষ্ণুনা বিনা দেবী ন হরিঃ পদ্মজাং বিনা॥" ইতি।

'আত্মেশ্বরোঽতর্ক্যসহস্রশক্তিঃ' ইতি স্মৃতেশ্চ॥ ৬

বঙ্গানুবাদ

কৃষ্ণ পরতম বস্তু বলিয়া পণ্ডিতগণের অভিমত, কারণ তিনি সমস্ত জগতের উপাদান কারণ ও নিমিত্ত কারণ, তাঁহাতে নিত্যচৈতন্য ও আনন্দত্বাদিগুণ বিদ্য-

মান আছে। তিনি নিত্যলক্ষ্মী অর্থাৎ স্বরূপশক্তির বৃত্তিরূপ হ্লাদিনীপ্রভৃতি বিশিষ্ট ॥ ৬

तत्र सर्वहेतुत्वं, यथाहुः श्वेताश्वतराः—
"एकः स देवो भगवान् वरेण्यो
योनिस्वभावानधितिष्ठत्येकः ॥" ५।४ इति (क)
"यच्च स्वभावं पचति विश्वयोनिः
पाच्यांश्च सर्वान् परिणामयेद् यः ॥" ५।५ इति च (ख)

कान्तिमाला

एक इति। स देवो भगवान्, एकः सर्वोत्तमः, अतो वरेण्यः पूज्यः, योनीनां प्रधान-महदादीनां कारणतत्त्वानां स्वभावान् स्वरूपाणि एकः सहायरहितः पराख्यशक्तिविशेषोऽधि-तिष्ठति वशे संस्थापयति। "एके मुख्यान्यकेवलाः" इत्यमरः। (१) "योनिः स्यादाकरे भगे" इति विश्वः। "योनिः कारणे भग-ताम्रयो"रिति हेमश्च। "स्वरूपञ्च स्वभावश्च" इत्यमरः। यद्वा एकस्तेभ्योऽन्यस्तदस्पृष्ट इत्यर्थः। (क)

यच्चेति। यो देवः स्वभावं तेषां प्रधानादीनां स्वरूपाणि पचति महदादिकार्याविर्भाव-कतया आभिमुख्य (२) नयतीत्यर्थः। पाच्यांस्तदाभिमुख्ययोग्यान् सर्वान् प्रधानादीनर्थान् यो देवः परिणामयेन्महदाद्यवस्थां नयेदित्यर्थः। एवं पराख्यशक्तिविशेषो यो विश्वनिमित्तं, स एव प्रधानचेतनशक्तिविशेषो विश्वयोनिर्जगदुपादानमित्यर्थः। (ख)

प्रभा

तत्रेति। तत्र तेषु मध्ये सर्वहेतुत्वं सकलकारणत्वं श्वेताश्वतराः श्वेता-श्वतरशाखिन आहुर्वदन्ति यथा—स आगमप्रसिद्धो देवः स्वयंप्रकाशः भग-वान् कृष्ण एको द्वितीयरहितो वरेण्यः पूज्यः, स एको योनिस्वभावान् योनिः कारणं समग्रस्य जगतः, स्वभावान् कार्यभूतान् पृथिव्यादीन् अधितिष्ठति नियमयति। 'एवं सः' इति क्वचित् पाठः। 'सर्वा दिश ऊर्द्ध्वमधश्च तिर्यक् प्रकाशयन् भ्राजते यद्वनड्वान्' इति पूर्वार्द्धम् ॥ (क)

यच्चेति। यच्च यश्च विश्वयोनिर्जगत्कारणं स्वभावं प्रधानस्वरूपं पचति

(१) योनिः—इत्यादिः इत्यमरः—इत्यन्तः पाठः 'ग' पुस्तके नास्ति।

(२) महदादिकार्याभिभावकताभिमुख्य—इति 'ग' पुस्तके।

মহদাদিরূপেণ পরিণময়তি। য সর্বান্ পাচ্যান্ পাকযোগ্যান্ অপঞ্চীকৃত-পৃথিব্যাদীন্ ব্রহ্মাণ্ডরূপেণ পরিণময়েৎ পরিণতিং নয়েৎ। 'সর্বমেতদ্বিশ্বমধি-তিষ্ঠত্যেকো গুণাংশ্চ সর্বান্ বিনিয়োজয়েদ্ যঃ' ইত্যপরার্দ্ধম্ ॥ (খ)

বঙ্গানুবাদ

পূর্ব্বকথিত হেতুসকলের মধ্যে শ্বেতাশ্বতরশাখীরা প্রথমে সকল বস্তুর নিমিত্ত ও উপাদানকারণ যে ভগবান্, ইহাই বলিতেছেন। যথা—সেই শাস্ত্র-প্রসিদ্ধ স্বয়ংপ্রকাশ ভগবান্ শ্রীকৃষ্ণ অদ্বিতীয় ও সকলের পূজ্য। একমাত্র ভগবানই সমস্ত জগতের স্বভাব অর্থাৎ কার্য্যভূত পৃথিব্যাদির অন্তর্য্যামিরূপে অধিষ্ঠাতা ॥ (ক)

যিনি সকলের কারণ, যিনি প্রকৃতিকে মহদাদিরূপে পরিণত করেন এবং যিনি অপঞ্চীকৃত পৃথিব্যাদির ব্রহ্মাণ্ডরূপে পরিণাম সম্পাদন করেন ॥ (খ)

বিভুচৈতন্যানন্দত্বং, যথা কাঠকে—

"মহান্তং বিভুমাত্মানং মত্বা ধীরো ন শোচতি" ॥৪।৪ ইতি (গ)

কান্তিমালা

মহান্তং পূজ্যং মত্বা জ্ঞাত্বা উপাস্য চেত্যর্থঃ। (গ)

প্রভা

'স্বপ্নান্তং জাগরিতান্তমুভৌ যেনানুপশ্যতি' ইতি পূর্বার্দ্ধম্। অত্র স্বপ্নান্ত-শব্দঃ স্বপ্নসুষুপ্ত্যুভয়াভিপ্রায়েণ। যেন প্রেরিতো জীব উভৌ স্বপ্নাখ্যোঽন্তঃ স্থানং স্বপ্নান্তস্তম্। অন্তঃ স্থানং স্থলং বাসঃ প্রদেশ ইতি চোচ্যত ইত্যভিধানাৎ। জাগরিতান্তং চ জাগরিতস্থানং চ পশ্যতি। তং মহান্তং দেশকালগুণতঃ পরমমহত্ত্বেনোপেতম্, অতএব বিভু সর্বগতমাত্মানং মত্বা জ্ঞাত্বা উপাস্যেত্যর্থঃ। ধীরঃ পণ্ডিতো ন শোচতি সংসারশব্দবাচ্যং শোকং ন ভজত ইত্যর্থঃ॥ (গ)

বঙ্গানুবাদ

শ্রীকৃষ্ণ যে বিভুচৈতন্য ও আনন্দত্বাদির আশ্রয়, তাহা কঠোপনিষদে উক্ত হইয়াছে যথা—পণ্ডিত ব্যক্তি ব্যাপক মহান্ আত্মা অর্থাৎ পরমাত্মাকে উপাসনা করিয়া শোক প্রাপ্ত হন না॥ (গ)

विज्ञानसुखरूपत्वमात्मशब्देन बोध्यते ।
अनेन मुक्तगम्यत्वव्युत्पत्तेरिति तद्विदः ॥ ७

कान्तिमाला

नन्वस्माद्वाक्याद्विभुत्वं प्राप्तं, चैतन्यानन्दत्वं न प्राप्यते इति चेत्तत्राह—विज्ञानेति। अथते लभ्यते मुक्तैरयमित्यात्मा, अततेः कर्मणा मनिन्। मुक्ताः खलु तादृशमेव तं ध्यायन्ति लभन्ते चेति भावः ॥ ७

प्रभा

विज्ञानेति। अनेन 'महान्तं विभुमात्मानम्' इति श्रुतिस्थेनात्मशब्देन मुक्तैः शुकसनकादिभिर्यदनभिव्यक्तसंस्थानगुणविभूतिलीलमानन्दरूपं स्वप्रकाशं ब्रह्मशब्दव्यपदेश्यं वस्तु ततोऽप्यधिकत्वेन पारमैश्वर्यसमवेतमाधुर्यसंभिन्नत्वात्, अत्यते प्राप्यत इति व्युत्पत्तेर्विज्ञानसुखरूपत्वं चिदानन्दविग्रहत्वं बोध्यते, तद्विदो भागवतपरमहंसा वदन्तीति शेषः ।

तथा च पिप्पलादशाखायाम्—

'यत्तत् सूक्ष्मं परमं वेदितव्यं
नित्यं पदं वैष्णवमामनन्ति।
एतल्लोका न विदुर्लोकसारं
वदन्ति यत् कवयो योगनिष्ठाः' ॥ इति ।

श्रीमद्भागवते च—

'स्वसुखनिभृतचेतास्तद्व्युदस्तान्यभावो-
ऽप्यजितरुचिरलीलाकृष्टसारस्तदीयम्।
व्यतनुत कृपया यस्तत्त्वदीपं पुराणं
तमखिलवृजिनघ्नं व्याससूनुं नतोऽस्मि' ॥१२।१२।६९ इति ।
'परिनिष्ठितोऽपि नैर्गुण्य उत्तमःश्लोकलीलया ।
गृहीतचेता राजर्षेराख्यानं यदधीतवान्' ॥२।१।९ इति ।
'तस्यारविन्दनयनस्य पदारविन्द-
किञ्जल्कमिश्रतुलसीमकरन्दवायुः ।

अन्तर्गतः स्वविवरैश्च चकार तेषां

संक्षोभमक्षरजुषामपि चित्ततन्वोः' ॥३।१५।४३ इति च ॥ ७

বঙ্গানুবাদ

উক্ত কাঠকশ্রুতিতে যে আত্মশব্দ কথিত হইয়াছে, যাহা মুক্তগণের প্রাপ্য তাহাই আত্মা—এইরূপ ব্যুৎপত্তিবশতঃ আত্মশব্দের দ্বারা বিজ্ঞানানন্দস্বরূপতা বোধিত হইতেছে, ইহা আত্মবিৎ পণ্ডিতগণ বলিয়া থাকেন ॥ ৭

वाजसनेयिनस्त्वाहुः—

"विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणम्" ॥ ।৩।২৮ इति (क)

कान्तिमाला

तथात्ते वाचनिकमाह—विज्ञानमिति । दातुर्यजमानस्य, रातिः फलार्पकम् । (क)

प्रभा

वाजसनेयिनः शुक्लयजुर्वेदिनः । ब्रह्म विज्ञानं विज्ञानपूर्णम् । आनन्दम् आनन्दपूर्णम् । दातुः स्वोद्देशेन हविरादिदातुर्यजमानस्य रातिरिष्टः, तद्विदः परायणं मुख्य आश्रय इत्यर्थः ॥ (क)

শুক্লযজুর্বেদিগণ বলিয়া থাকেন, ব্রহ্ম বিজ্ঞানপূর্ণ ও আনন্দপূর্ণ। ব্রহ্ম তদুদ্দেশে হবিঃপ্রভৃতির প্রদাতা যজমানের প্রিয় এবং ব্রহ্মবিদের প্রধান অবলম্বন ॥ (ক)

श्रीगोपालोपनिषदि च—

"तमेकं गोविन्दं सच्चिदानन्दविग्रहम्" ॥ इति (ख)

कान्तिमाला

तमेकमिति स्फुटार्थम् । (ख)

प्रभा

श्रीगोपालोपनिषदि श्रीगोपालपूर्वतापनीयोपनिषदि इत्यर्थः । "पञ्चपदं वृन्दावने सुरभूरुहतलासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि" इत्यपरोऽंशः । समरुद्गणैः मरुद्गणैः देवगणैः सह अहं ब्रह्मा परमया चिच्छक्ति-सारभूतया स्तुत्या स्तवेन तम् एकम् अद्वितीयं पञ्चपदं तदाख्यमन्त्रमयमिति

श्रीजीवगोस्वामिपादाः। सच्चिदानन्दविग्रहं सत्यज्ञानसुखरूपं वृन्दावने पराख्यशक्तिविलसिते श्रीगोलोकाभिध इत्यर्थः। सुरभूरुहतलासीनं कल्पतरुतले उपविष्टं गोविन्दं सततं तोषयामि ॥ (ख)

বঙ্গানুবাদ

শ্রীগোপালপূর্ব্বতাপনীয়োপনিষদে উক্ত হইয়াছে—আমি দেবগণের সহিত পরম স্তবের দ্বারা অদ্বিতীয় পঞ্চপদমন্ত্রময় সত্যজ্ঞানসুখরূপ, বৃন্দাবনে কল্পতরুতলে উপবিষ্ট গোবিন্দের প্রীতিসম্পাদন করি ॥ (খ)

मूर्तत्वं प्रतिपत्तव्यं चित्सुखस्यैव रागवत् ।
विज्ञानघनशब्दादिकीर्तनाच्चापि तस्य तत् ।
देहदेहिभिदा नास्तीत्येतेनैवोपदर्शितम् ॥ ८

कान्तिमाला

ननु मूर्तत्वं चित्सुखवस्तुनः कथं ? तत्राह—मूर्तत्वमिति । भैरवादे रागस्य गान्धर्ववासिते श्रोत्रे यथा मूर्तत्वं प्रतीतं, तथा भक्तिभाविते मनसि तस्य तत्त्वमित्यर्थः । "विज्ञानघनानन्दघनसच्चिदानन्दैकरसे भक्तियोगे तिष्ठती"ति गोपालोपनिषदि (गोपालोत्तरतापनीय० ८१) ब्रह्मणि विज्ञानघनादिशब्दप्रयोगाच्च तस्य तत् । 'मूर्तौ घनः' (पा० ३।३।७७) इति सूत्रेण काठिन्येऽर्थे हन्तेरप्प्रत्ययो घनश्चादेशोऽनुशिष्टः, सैन्धवघन इति तस्योदाहरणं ? तदिदमचिन्त्यशक्तिसिद्धं बोध्यम् । देहदेहीति । एतेन चित्सुखवस्तुनः मूर्तत्वसमर्थनेन परेशे (१) देहदेहिभेदो नास्तीति चोक्तमित्यर्थः ॥ ८

प्रभा

इदानीं चिद्घनविग्रहस्य भगवतो गोविन्दस्य मूर्तत्वं प्रतिपादयति—मूर्तत्वमिति । रागवत् गान्धर्ववासिते श्रवणे भैरवादिरागस्य यथा मूर्तत्वमवगम्यते, तथा भक्तियोगपरिभाविते हृत्सरोजे चित्सुखस्य विज्ञानानन्दस्य मूर्तत्वं सच्चिदानन्दविग्रहानतिरेकिस्वरूपत्वं प्रतिपत्तव्यं ज्ञातव्यं सिद्धमित्यर्थः । तथा चोक्तं—

---

(१) परे इति 'ग' पुस्तके ।

'भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा।

श्रीरागो मेघरागश्च रागाः षड़िति कीर्तिताः॥' इति।

अपि च विज्ञानघनशब्दादिकीर्तनात्—'मूर्तौ घनः' इत्यनुशासनाद् 'विज्ञानघनः' 'आनन्दघनः' इत्यादिमूर्तिप्रतिपादकशब्दैः कथनात् तस्य चित्-सुखस्य तत् मूर्तत्वम्। किमत्र फलितमित्यत आह—देहेति। एतेन चित्-सुखानतिरेकिवस्तुनो मूर्तत्वकथनेन देहदेहिभिदा देहस्य देहिनश्च भेदो नास्तीति उपदर्शितं प्रतिपादितम्।

तथा चोक्तं ग्रन्थकृतैव पीठकभाष्ये—तदेवं ज्ञानानन्दविग्रहता तु तस्य श्रुति-मालेया गम्या न तु तर्कैः, अचिन्त्यालौकिकवस्तुत्वात्। तदिदं ज्ञानानन्द-विग्रहत्वमभिहितं भगवता सूत्रकारेण—

'अरूपवदेव हि तत्प्रधानत्वात्' [व्याससूत्रं ३।२।१४]। 'प्रकाशवच्चा-वैयर्थ्यम्' [व्या० सू० ३।२।१५]। 'आह च तन्मात्रम्' [व्या० सू० ३।२।१६] 'दर्शयति चाथो अपि स्मर्यते' [व्या० सू० ३।२।१७] इति। अस्मिन्नधिकरणे तथैव भाषितञ्च। अयमर्थः—

अरूपेति। रूपं विग्रहस्तद्विशिष्टं ब्रह्म न, इति अरूपवदित्युच्यते। कुतः ? तस्यैव रूपस्य प्रधानत्वात्, आत्मनो द्विभुजत्वादिधर्मधर्मित्वादित्यर्थः, तस्माद् रूपाभिन्नं ब्रह्मेति। ननु ध्यातेन विज्ञानानन्देन ब्रह्मणा जड़दुःख-रूपत्वात् तद्विरुद्धा प्रकृतिर्निवर्तत एव, ज्योतिषैव तिमिरं, तत्र विग्रहत्वं व्यर्थ-मिति चेत्, तत्राह—प्रकाशेति। प्रकाशैकरसे सूर्ये यथा ध्यानहेतुत्वाद् विग्रहत्वमव्यर्थं तथा विज्ञानानन्दैकरसेऽपि ब्रह्मणि तस्य तन्मन्तव्यम्, तद्धेतु-त्वादेव। एवंभावे प्रमाणं दर्शयति—आहेति। तमेव तन्मात्रं, 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः। तं विग्रहमेव यस्मात् परमात्मानामाह श्रुतिः—

'सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्।

द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरम्॥' इत्याद्या।

अत्र पुण्डरीकाख्यत्वादिधर्मा विग्रह एव ईश्वर इति स्फुटम्। 'देहदेहि-भिदा चैव नेश्वरे विद्यते क्वचित्' इति पाद्मवचनम्। तथाह—अत्र देहाद् भिन्नो देहीत्येवं भिदा भेद ईश्वरवस्तुनि नास्ति, किन्तु देह एव देहीति लभ्यम्, विग्रह एवात्मा इति लभ्यमित्यर्थः। दर्शयतीति। 'साक्षात् प्रकृतिपरोऽय-

मात्मा' इति श्रुतिः। 'सत्यज्ञानानन्तानन्दमात्रैकरसमूर्त्तयः' इति स्मृतिश्च परमात्मानं विग्रहं वदति। गोपालशब्दः खलु परमकमनीयपादमुखादि-सन्निवेशिनि अस्मद्ग्रामे सर्वेशे वस्तुनि मुख्यः। तस्माज् ज्ञानानन्दविग्रहानतिरेकिस्वरूपत्वं सिद्धम्॥ ८

বঙ্গানুবাদ

যেমন গান্ধর্ব্বশাস্ত্রজ্ঞগণ গান্ধর্ব্ববাসিত শ্রবণেন্দ্রিয়ে রাগের মূর্ত্তি অনুভব করিয়া থাকেন, সেইরূপ ভক্তগণও ভক্তিভাবিত চিত্তে ভগবানের চিদানন্দবিগ্রহ অনুভব করেন। শ্রীগোপালতাপনীয়শ্রুতিতে 'বিজ্ঞানঘন' ইত্যাদি মূর্ত্তিপ্রতিপাদক শব্দের দ্বারা কীর্ত্তনহেতু শ্রীভগবানের বিজ্ঞানানন্দমূর্ত্তি অবশ্য স্বীকার্য্য। চিদানন্দবস্তুর মূর্ত্তি স্বীকারে ইহাই বলা হইল যে, শ্রীভগবানের দেহ ও দেহীর ভেদ নাই, অর্থাৎ শরীর ও আত্মা একই বস্তু। সচ্চিদানন্দ ভগবানের দেহ, তাহা হইতে ভগবান্ পৃথক্ নহেন। 'মূর্ত্তৌ ঘনঃ' [পা০ ৩৷৩৷৭৭] এই সূত্রের ইহাই অর্থ যে, মূর্ত্তি বুঝাইলে হন্-ধাতুর উত্তর অপ্-প্রত্যয় হয় এবং 'ঘন' আদেশ হয়। সুতরাং শ্রুতিপ্রভৃতিতে, 'বিজ্ঞানঘন' ইত্যাদি শব্দ থাকায় ভগবান্ মূর্ত্ত ইহাই স্বীকার করিতে হইবে॥ ৮

मूर्तस्यैव विभुत्वं यथा श्वेताश्वतरोपनिषदि (१)—

"वृक्ष इव स्तब्धो दिवि तिष्ठत्येक-
स्तेनेदं पूर्णं पुरुषेण सर्वम्" ॥३।९ इति (क)

कान्तिमाला

ननु मूर्तत्वे विभुत्वं न स्यात्, तत्राह—मूर्तस्यैवेति। वृक्ष इति। एकः सर्वाध्यक्षः पुरुषो हरिर्दिवि परव्योम्नि तिष्ठति, स खलु स्वेतरसर्वनमस्यत्वाद् वृक्ष इव स्तब्धः कञ्चिदपि प्रति नम्रो नेत्यर्थः। तेनैकेन पुरुषेण सर्वमिदं जगत् पूर्णं व्याप्तम्। अत्र पुरुषो दिवि तिष्ठतीति मूर्तत्वं, तेनेदं पूर्णमिति तस्यैव विभुत्वमागतम्। (क)

प्रभा

ननु कथं मूर्तस्य विभुत्वं, मूर्तत्वं नामाऽपकृष्टपरिमाणवत्त्वं. न तद् भगवति सम्भवतीत्यत आह—मूर्तस्यैव विभुत्वमिति। न ह्यपकृष्टपरिमाणवत्त्वं

(१) यथा मुण्डके—इति पाठः पुस्तकचतुष्टये दृश्यते, 'घ' पुस्तके यथा मुण्डके (३।१।१) इत्यपि दृश्यते, मूलपुस्तके तु तादृशः पाठो नोपलभ्यते। महानारायणे १०।४ च।

मूर्तत्वं, शास्त्रविरोधात्। न च तान्त्रिकी परिभाषा प्रमाणभूतं शास्त्रमस्त्येति। अथवा तल्लक्षणं भगवदितरपरम्। मूर्तत्वेऽपि विभुत्वं भगवति सम्भवति नान्यस्य कस्यचित्, न वयमुपनिषच्छरणा दृष्टान्तबलेन वस्तु प्रतिपादयामः, अपि तु शास्त्रबलेन। विभुत्वेऽपि मूर्तत्वं श्वेताश्वतरवाक्यं प्रमाणयति—वृक्ष इति। एकः स्वगतस्वजातीयविजातीयभेदरहितः पुरुषः श्रीवासुदेवः,

'भगवानितिशब्दोऽयं तथा पुरुष इत्यपि।
वर्त्तते निरुपाधिश्च वासुदेवेऽखिलात्मनि॥'

इति पाद्मोत्तरखण्डवचनात्। वृक्ष इव स्तब्धो निश्चलः सन् दिवि द्योतनात्मके परमे व्योम्नि तिष्ठति, तेन पुरुषेण इदं सर्वं जगत् पूर्णं व्याप्तं, शक्तिशक्तिमतोरभेदात् चिदचिच्छक्त्या सर्वं परिव्याप्तमित्यर्थः॥ (क)

বঙ্গানুবাদ

পরিচ্ছিন্নের ন্যায় প্রতীয়মান শ্রীভগবদ্‌বিগ্রহের বিভুত্ববিষয়ে শ্বেতাশ্বতরোপনিষদে দৃষ্ট হয় যথা—অদ্বিতীয় পুরুষ ভগবান্ শ্রীহরি বৃক্ষের ন্যায় নিশ্চল হইয়াও চিদাকাশে অবস্থান করিতেছেন। অথচ তাঁহার শক্তিপ্রকাশরূপ শাখা-প্রশাখা দ্বারা এই জগৎ পরিব্যাপ্ত রহিয়াছে॥ (ক)

द्युस्थोऽपि निखिलव्यापीत्याख्यानान्मूर्तिमान् विभुः।
युगपद्भातवृन्देषु साक्षात्काराच्च तादृशः॥ ६

कान्तिमाला

मिथोऽतिदूरेषु भ्रातृवृन्देषु सिद्धप्रेमसु युगपत् तस्य प्रत्यक्षत्वाच्च तस्य मूर्तस्य विभुत्वं, न च यावन् सन्निदध्यात्, यौगपद्यविरोधात्॥ ६

प्रभा

मूर्तस्यापि विभुत्वं श्रुतिसिद्धरूपया कारिकयोपन्यस्यति—द्युस्थोऽपीति। यद्यपि स भगवान् श्रीहरिर्दिवि पराख्यशक्तिविजृम्भिते स्वधाम्नि तिष्ठति, तथापि निखिलं चिदचिद्विभूतिरूपं सर्वं वस्तु व्याप्नोतीति श्वेताश्वतरश्रुत्याख्यानात् कथनात् स विभुः स्वरूपबहिरङ्गवैभवव्यापी मूर्तिमान् सच्चिदानन्दस्वरूपानतिरेकिश्रीविग्रह इत्यर्थः, युगपदेकदा भ्रातृवृन्देषु सर्वेषूपासकेषु

साक्षात्कारात् तादृशविभुविग्रहो भवति। यदि स भगवान् निराकारो भवेत् तर्हि कथं युगपदुपासकास्तं साक्षात्कुर्युः, परिच्छिन्नश्चेत् कथं सर्वेषामुपासकानां दर्शनगोचरतामापद्येत। अतः स मूर्तिमानपि विभुरित्यभ्युपगम्यते सात्वतैः।

अत्रायं निष्कर्षः—अचिन्त्यद्वैताद्वैतिनां श्रीमज्जीवगोस्वामिचरणानाम्—"तस्मादस्त्येव श्रीभगवति परिच्छिन्नत्वं विभुत्वञ्च युगपदेव, मूलसिद्धान्त एव परस्परविरोधिशक्तिशतनिधानत्वं तस्य विभुत्वमुक्तं ब्रह्मसंहितायां—

'पन्थास्तु कोटिशतवत्सरसम्प्रगम्यो
वायोरथापि मनसो मुनिपुङ्गवानाम्।
सोऽप्यस्ति यत् प्रपदसीम्न्यविचिन्त्यतत्त्वे
गोविन्दमादिपुरुषं तमहं भजामि॥' ५।३४ इति

श्रुतिश्च मध्वभाष्यप्रमाणिता—'अस्थूलोऽनणुरमध्यमोऽमध्यमोऽव्यापको व्यापको हरिरादिरनादिरविश्वो विश्वः सगुणो निर्गुणः" इति।

नृसिंहतापनीये च—

'तुरीयमतुरीयमात्मानमनात्मानमुग्रमनुग्रं वीरमवीरं महान्तमहान्तं विष्णुमविष्णुं ज्वलन्तमज्वलन्तं सर्वतोमुखमसर्वतोमुखम्', इत्यादिका।

ब्रह्मपुराणे—

'अस्थूलोऽनणुरूपोऽसावविश्वो विश्व एव च।
विरुद्धधर्मरूपोऽसावैश्वर्यं पुरुषोत्तमः॥' इति

तथैव दृष्टं श्रीविष्णुधर्मे—

'परमाणवन्तपर्यन्तसहस्रांशाणुमूर्तये।
जठरान्तायुतांशान्तस्थितब्रह्माण्डधारिणे'॥ इति

श्रीमद्भागवते—

'यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा।
तत् त्वय्यपीह तत्सर्वं किमिदं मायया विना' ॥१०।१४।१७ इति
'विश्वं यदेतत् स्वतनौ निशान्ते
यथावकाशं पुरुषः परो भवान्।

विभर्ति सोऽयं मम गर्भगोऽभू-

दहो नृलोकस्य विडम्बनं तत्' ॥ १०।३।३१ इति च ।

तदित्थं मध्यमाकार एव सर्वाधारत्वाद् विभुत्वं साधितं, सर्वगतत्वादपि तत् साध्यते ।

'चित्रं वतैतदेकेन वपुषा युगपत् पृथक् ।

गृहेषु द्वाष्टसाहस्रं स्त्रिय एक उदावहत्' ॥ भा० १०।६९।२ इति

'अथो मुहूर्त एकस्मिन् नानागारेषु ताः स्त्रियः ।

यथोपयेमे भगवान् तावद्रूपधरोऽव्ययः' ॥ भा० १०।५९।४२ इति च ।

इत्यत्र तादृग्रूपधरत्वं नाम युगपत्तावत्प्रदेशप्रकाशत्वमेवेति व्याख्येयम् ।

यथोक्तं श्रीलघुभागवतामृते—

'अनेकत्र प्रकटता रूपस्यैकस्य यैकदा ।

सर्वथा तत्स्वरूपैव स प्रकाश इतीर्यते' ॥ इति

अनेन 'सर्वतः पाणिपादान्तः' इति तादृश्यां श्रीमूर्त्यामेव व्याख्यातं भवति । अत एव 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' [व्या० सू० ३।२।११] इति सूत्रं तत्त्ववादिभिरेवं योजितं, स्थानापेक्षयाऽपि परमात्मनो न भिन्नं रूपं, हि यस्मात् तद्रूपत्वं सर्वत्रैव । 'सर्वभूतेष्वेवमेव ब्रह्म इत्याचक्षत' इति श्रुतेः ।

'एक एव परो विष्णुः सर्वत्रापि न संशयः ।

ऐश्वर्याद्रूपमेकञ्च सूर्यवद्बहुधेयते ॥' इति मात्स्यात्

'प्रतिदृशमिव नैकधार्कमेकं

समधिगतोऽस्मि विधूतभेदमोहः ।१।९।४२ इति भागवतात् ।

'न भेदादिति चेन्न प्रत्येकमतद्वचनात् ।' [व्या० सू० ३।२।१२] इत्येतस्य 'अपि चैवमेके' [व्या० सू० ३।२।१३] इत्येतस्य च सूत्रस्य व्याख्यानं तद्भाष्ये द्रष्टव्यम् ।

एवं श्रीविग्रहस्य नित्यत्वविभुत्वे साधिते। अत्र विशेषजिज्ञासा चेत्तदा श्रीभागवतसन्दर्भस्तथा सिद्धान्तरत्नग्रन्थोऽनुसन्धेयौ ॥ ९

বঙ্গানুবাদ

যত্থপি শ্রীভগবান্ দ্যুলোকে অবস্থান করিতেছেন, তথাপি তিনি সমস্ত বস্তুতে

ব্যাপ্ত রহিয়াছেন। সুতরাং তিনি সাকার হইয়াও ব্যাপক। এক কালে সকল উপাসক তাহা প্রত্যক্ষ করেন বলিয়া তাঁহাকে ব্যাপক বলা হয়॥ ৯

श्रीदशमे च—
'न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्!
पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः॥ १०।९।१३
तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा॥' १०।९।१४ इति (क)

कान्तिमाला

न चान्तरिति। यस्य अन्तर्बहिरादिदेशपरिच्छेदो नास्त्यतो यो जगतः पूर्वादिषु देशेषु युगपदस्ति, यश्च स्वशक्त्या जगन्मयस्तमात्मजं गोपी यशोदा सापराधं मत्वा उलूखले दाम्ना बबन्ध। तं कीदृशं (१) इत्याह, मर्त्यलिङ्गं द्विभुजमनुष्याकृतिं, अधोक्षजं त्यक्तेन्द्रियकसुखं स्वानुबन्धिसुखवन्तम् इत्यर्थः। प्राकृतं यथेत्युक्तेर्विज्ञानघनत्वं स्पष्टं, विभोरेव मूर्तत्वञ्च। (क)

प्रभा

बन्धो हि बहिरेव संवीतेन दाम्नाऽन्तरावृतस्य भवति, तथा च पूर्वापर-विभागवतो वस्तुनः पूर्वं दामतो धृत्वा परितः परिवेष्टनेन भवति, न त्वेतदस्तीत्याह— न चेति। यस्य भगवतः श्रीकृष्णस्य अन्तर्मध्यभागो न विद्यते, तथा बहिर्बहिर्भागो न, पूर्वं पूर्वभागो न, अपरं पश्चाद्भागोऽपि नास्ति। यो जगतः पूर्वापरं पूर्वं पूर्वावधिः, अपरमुत्तरावधिः बहिरन्तश्च व्याप्य वर्तते, यश्च जगत् तच्छक्तिकार्यत्वात्। 'इदं हि विश्वं भगवानिवेतरः' (भा० १।५।२८) इत्युक्तदिशा शक्ति-शक्तिमतोरभेदात् सर्वस्य तत्कारणकतया विश्वशरीरकतया च तत्-पृथक्सिद्धवस्त्वन्तराभावात् स्वनिष्ठवस्तुसाधनकं बन्धनं तस्य न सम्भवतीत्यभि-प्रायेणाह—जगच्च यः। गोपिका यशोदा अव्यक्तं स्वप्रकाशात्मविग्रहत्वादि-न्द्रियाविषयं मर्त्यलिङ्गं मर्त्यस्येव लिङ्गं शरीरं यस्य तत् मनुष्यलक्षणशरीरम्, अधोऽक्षजम् इन्द्रियजं ज्ञानं यस्मात्, प्रत्यक्षादिप्रमाणाविषयमित्यर्थः। आत्मजं निजतनयं मत्वा प्राकृतं यथा सामान्यबालकवत् दाम्ना रज्ज्वा उलूखले बबन्ध। वत्सलाद्यभिधप्रेमरसविशेषस्य स्वभावोऽयं यदसौ स्वानन्दपूरेण भगवतो व्यापकत्वं प्रत्यनुभवपद्धतिमावृणोतीत्यर्थः। प्राकृतं यथा इत्यनेन अधो-

(१) इत्यथाह—इति 'घ' पुस्तके।

ऽस्वजमित्यनेन च वस्तुनो व्यापकत्वं मायया मर्त्यलिङ्गत्वमित्यपि परिहृतम्। यद्धि तर्कगोचरो भवति तत्रैव कदाचिदसम्भवरीतिदर्शनेन मायाऽभ्युपगम्यते, यत्तु स्वत एव तदतीतं तत्र तत्स्वीकरणं बालिशतामावहति॥ (क)

বঙ্গানুবাদ

ব্রজদেবী যশোদা অব্যক্ত, মনুষ্যরূপধারী, প্রত্যক্ষাদি প্রমাণের অগোচর শ্রীভগবান্‌কে নিজ পুত্র মনে করিয়া সামান্য বালকের ন্যায় উদূখলে বন্ধন করিয়াছিলেন॥ (ক)

श्रीगीतासु च—

"मया ततमिदं सर्वं जगदव्यक्तमूर्तिना।

मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥" ९।४ इति

"न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्॥" ९।५ इति च(ख)

कान्तिमाला

मयेति। अव्यक्तमूर्तिना प्रत्यग्विग्रहेण मयेदं सर्वं जगत् ततं व्याप्तं, सर्वभूतानि मत्स्थानि मया धृतानि न चाहं तेषु अवस्थितः तैर्धृतो नाहम्। तानि च भूतानि कलसे जलानीव मयि न धृतानि, किन्तु मत्संकल्पेनैव तानि धृतानि इति भावेनाह—न चेति। ननु कथमेवं सम्भवेदिति चेत्तत्राह—पश्येति। ईश्वरस्य ममासाधारणं योगं पश्येति॥ (ख)

प्रभा

श्रीगीतासु श्रीमद्भगवद्गीतासु इत्यर्थः। तत्रापि भगवतो विभुत्वमवगम्यते। मयेति। अव्यक्तमूर्तिना अव्यक्ताऽतीन्द्रिया मूर्तिः श्रीविग्रहो यस्य तेन मया चिद्घनविग्रहेण सर्वमिदं जगत् ततं धर्तुं नियन्तुं च व्याप्तम्। अतएव सर्वभूतानि सर्वाणि स्थावरजङ्गमात्मकानि भूतानि मत्स्थानि सर्वव्यापके धारके नियामके च मयि स्थितानि। मत्स्थत्वेऽपि यथा पृथिव्यां स्पृष्ट्वा स्थितानि न तथा मयीत्याह—न चेति। न च दृश्यश्चक्षुषासौ न स्पृश्यः स्पर्शनेन चेति। अहं तेषु भूतेषु नावस्थितः। भूतानि न मत्स्थानि मयि स्थितानि स्पर्शायोग्यत्वात्, तेषां स्थितिर्मदधीना इति वा तदर्थः। इह सर्वान्तर्यामिणा सांशभूतेनान्तःप्रविश्याहं नियच्छामि दधामि च इत्युक्तमाह

চৈব শ্রুতিঃ—'যঃ পৃথিব্যাং তিষ্ঠন্ পৃথিব্যা অন্তর্যমযতী'ত্যাদিঃ। ইহাপি বক্ষ্যতি দশমে—'বিষ্টভ্যাহমিদং কৃৎস্নমেকাংশেন স্থিতো জগত্' ইতি মে মম যোগমচিন্ত্যশক্তিবৈভবং পশ্য। 'ভূতভৃন্ন চ ভূতস্থো মমাত্মা ভূতভাবনঃ' ইতি চ শ্লোকাংশঃ ॥ (খ)

বঙ্গানুবাদ

শ্রীমদ্ভগবদ্গীতাতেও ভগবানের বিভুত্ব ও মূর্ত্তত্ব উক্ত হইয়াছে যথা—আমি অব্যক্ত মূর্ত্তিতে সমস্ত জগতে ব্যাপ্ত আছি। সমস্ত প্রাণী আমাতে অবস্থান করিতেছে, কিন্তু আমি কোথায়ও অবস্থিত নহি। যদিও প্রাণিগণ আমাতে আছে, তথাপি আমি স্পর্শযোগ্য নহি বলিয়া পৃথিবীতে অবস্থান করার ন্যায় আমাতে সংযুক্ত হইয়া অবস্থান করিতেছে না। আমার অসাধারণ যোগ দর্শন কর ॥ (খ)

অনন্যা শক্তিরস্তীশে যোগশব্দেন যোচ্যতে।
বিরোধভঞ্জিকা সা স্যাদিতি তত্ত্ববিদাং মতম্ ॥১০

কান্তিমালা

যুজ্যতে দুর্ঘটেষু কার্যেষ্বনেনেতি ব্যুৎপত্তেরচিন্ত্যা শক্তির্যোগঃ ॥ ১০

প্রভা

'পশ্য মে যোগমৈশ্বরম্' ইত্যত্র যোগোঽভিহিতস্তত্র কো নাম যোগ ইত্যপেক্ষায়ামাহ—অনন্যা শক্তিরিতি। ঈশে পরমেশ্বরে যা অনন্যা অপরিচ্ছিন্না শক্তিরস্তি সাঽত্র যোগশব্দেনোচ্যতে, ন তু পাতঞ্জলদর্শনপ্রতিপাদ্যশ্চিত্তবৃত্তিনিরোধলক্ষণো যোগোঽত্রাভিমতঃ। সা চ বিরোধভঞ্জিকা মূর্তে বিভুত্বমিতি যো বিরোধস্তস্য ভঞ্জিকা নাশিকা ভগবতোঽনন্যা শক্তিরেব ভবতি, এতত্তত্ত্ববিদাং তত্ত্বদর্শিনাং মতম্। অনন্তশক্তিমত্ত্বাদনন্তত্বলক্ষণা বিভুত্বমবশ্যমঙ্গীকর্তব্যম্ ॥ ১০

বঙ্গানুবাদ

ঈশ্বরে যে অচিন্ত্য শক্তি আছে, তাহাই এখানে যোগশব্দের দ্বারা অভিহিত হইতেছে। মূর্ত্ত বস্তুতে বিভুত্ব কিরূপে থাকে, এইরূপ বিরোধের ভঞ্জন সেই

অচিন্ত্য শক্তিই করিয়া থাকে। ঈশ্বরের অচিন্ত্যশক্তিবশতঃ তাঁহাতে মূর্ত্তত্ব ও বিভুত্ব এই উভয় থাকিলেও কোনরূপ বিরোধ হয় না। ইহা তত্ত্ববিৎ পণ্ডিত-গণের অভিমত ॥ ১০

আদিনা সর্ব্বজ্ঞত্বং, যথা মুণ্ডকে—

"যঃ সর্ব্বজ্ঞঃ সর্ব্ববিৎ" ॥১।১।৯,২।২।৭ ইতি (ক)

কান্তিমালা

বিভুচৈতন্যানন্দত্বাদীত্যত্রাহ—আদিনেতি। সর্ব্বং জানাতীতি সর্ব্বজ্ঞঃ, সর্ব্বং বিন্দতীতি সর্ব্ববিৎ ॥ (ক)

প্রভা

'হেতুত্বাদ্বিভুচৈতন্যানন্দত্বাদিগুণাশ্রয়াৎ' ইত্যস্যাং কারিকায়ামাদিপদেন সর্ব্বজ্ঞত্বং গৃহ্যতে। মুণ্ডকোপনিষদি ব্রহ্মণঃ সর্ব্বজ্ঞত্বং প্রতিপাদ্যতে যথা—যঃ সর্ব্বং জানাতি সামান্যত ইতি সর্ব্বজ্ঞঃ, সর্ব্বং বেত্তি বিশেষেণেতি সর্ব্ববিৎ, সর্ব্বং বিন্দতি লভত ইতি বা ॥ (ক)

বঙ্গানুবাদ

'হেতুত্বাৎ'—এই শ্লোকে যে আদিপদ আছে, তাহার দ্বারা 'সর্ব্বজ্ঞত্ব' পাওয়া যাইতেছে। মুণ্ডকোপনিষদে ব্রহ্মের সর্ব্বজ্ঞত্ব প্রতিপাদিত হইয়াছে যথা—যিনি সর্ব্বজ্ঞ ও সর্ব্ববিৎ অর্থাৎ যিনি সামান্য ও বিশেষভাবে সমস্ত জানেন অথবা সমস্ত বস্তুকে প্রাপ্ত হন ॥ (ক)

আনন্দিত্বং চ, তৈত্তিরীয়কে—

"আনন্দং ব্রহ্মণো বিদ্বান্ বিভেতি কুতশ্চন ॥" ২।৯।১ ইতি (খ)

কান্তিমালা

আনন্দমিতি। ব্রহ্মণো ধর্মভূতমানন্দং বিদ্বান্ কুতশ্চন কালকর্মাদের্ন বিভেতি ধর্মবেদী বিমুচ্যতে ইত্যর্থঃ ॥ (খ)

প্রভা

হেতুত্বাদিত্যত্র ব্রহ্মণ আনন্দিত্বমানন্দস্বরূপত্বেঽপি স্বাচিন্ত্যশক্ত্যা নিত্যানন্দবিভূতিকত্বমবগম্যতে। তচ্চ তৈত্তিরীয়োপনিষদি প্রতিপাদ্যতে। 'যতো বাচো নিবর্তন্তেঽপ্রাপ্য মনসা সহ' ইতি পূর্বার্দ্ধম্। যতো চিচ্ছক্তি-

विजृम्भितवाङ्मनोविशिष्टं यं विभुत्वादानन्त्याच्च, वाचो मनसा सहाप्राप्य निवर्तन्ते। ब्रह्मणो ब्रह्मसम्बन्धिनमानन्दं सच्चिदानन्दरसैकरूपया भक्त्या जानन् कदाचित् कुतश्चिन्न बिभेति जननमरणादिलक्षणं संसारभयं नाप्नोतीत्यर्थः॥ (ख)

বঙ্গানুবাদ

'হেতুত্বাৎ' ইত্যাদি শ্লোকে জানা যাইতেছে—শ্রীভগবান্ আনন্দস্বরূপ হইয়াও আনন্দবান্। তাহা তৈত্তিরীয়োপনিষদে দৃষ্ট হয়, যথা—ব্রহ্মের স্বরূপ অথচ ধর্ম্মভূত আনন্দকে প্রাপ্ত হইয়া কেহ কোথা হইতেও সংসারভয় প্রাপ্ত হন না॥ (খ)

(१) प्रभुत्व-सुहृत्त्व-ज्ञानदत्व-मोचकत्वानि च श्वेताश्वतरश्रुतौ—
"सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृत्॥" ३।१७ इति। (ग)

कान्तिमाला

सर्वस्येति। (२) प्रभुत्वं प्रभावशालित्वम्, ईशानत्वं नियन्तृत्वम्, सौहार्दं निर्निमित्तहितकारित्वम्॥ (ग)

प्रभा

प्रभुत्वेति। आदिपदेन प्रभुत्वादिकं गृह्यते। प्रभुत्वं सर्वकरणसमर्थत्वम्। सुहृत्त्वं सौहार्दं स्वभावेन हितकारित्वमिति यावत्। ज्ञानदत्वं स्वरूपभूतज्ञानदातृत्वम्। मोचकत्वम् अनाद्यविद्याकल्पितान्यथाभावरूपबन्धनिरसनपूर्वकशुद्धजीवस्वरूपेण पुनरावृत्तिशून्यभगवत्सन्निधौ स्थितिरूपमोक्षस्य दातृत्वम्। भगवतः प्रभुत्वं यथा श्रीमद्भगवद्गीतायाम्—

'मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्।' ९।१०। इति।

'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च।' ९।२४। इति च।

श्रीमद्भागवते च—

'वशीकृतविसृज्यविसर्गशक्तिः'। ७।९।२२। इति।

---

(१) '[नियन्तृत्वशरणत्व-]प्रभुत्व-सौहार्द-ज्ञानदत्व-मोचकत्वानि च श्वेताश्वतरश्रुतौ'—इति 'घ' पुस्तके पाठः।

(२) प्रभावशालित्वं प्रभुत्वम्, नियन्तृत्वम् ईशानत्वम्, दुःखहरत्वं शरणत्वम् इति पाठः 'ग' तथा 'घ' पुस्तके दृश्यते।

सुहृत्त्वं यथा तत्रैव—

'मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकम्।

सुहृदं प्रियमात्मानं साम्यासङ्गादयोऽगुणाः॥' ११।१३।४० इति।

ज्ञानदत्वं यथा श्रीगीतायां—

'मत्तः स्मृतिर्ज्ञानमपोहनञ्च' ।१५।१५ इति।

श्रीमद्भागवते—

'त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेऽत्र शक्तितः।' ११।२२।२८। इति।

मोचकत्वञ्च श्रीगीतायां—

'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।

ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥ १०।१०। इति।

सर्वस्य चिदचिदात्मकस्य जगतः प्रभुं प्रभुः स्वामीत्यर्थः। ईशानम् ईशानो नियन्ता इति यावत्। सर्वस्य शरणम् आश्रयः। सुहृत् निर्निमित्तहित-कारी। सुहृत्—इत्यत्र 'बृहत्' इति पठ्यते। 'सर्वेन्द्रियगुणाभासं सर्वेन्द्रिय-विवर्जितम्' इति च पूर्वार्द्धभागः॥ (ग)

বঙ্গানুবাদ

আদিপদের দ্বারা প্রভুত্ব, সৌহার্দ্দ্য ও জ্ঞানদাতৃত্ব পাওয়া যাইতেছে।

ভগবান্ সকলের স্বামী, নিয়ন্তা, আশ্রয় ও সুহৃৎ॥ (গ)

"प्रज्ञा च तस्मात् प्रसृता पुराणी॥"४।१८ इति। (घ)

कान्तिमाला

प्रज्ञा चेति। तस्मादुपासितादीशात् जीवानां पुराणी सनातनी प्रज्ञा धर्मभूता संवित् प्रसृता भवति प्रकटीभवतीत्यर्थः॥ (घ)

प्रभा

प्रज्ञेति। तस्मात् परमेश्वरात्, पुराणी सनातनी, प्रज्ञा बुद्धिः, प्रसृता आविर्भूता।

"यदाऽतमस्तन्न दिवा न रात्रि-

र्न सन्न चासन् शिव एव केवलः।

तदक्षरं तत्सवितुर्वरेण्यं

प्रज्ञा च तस्मात् प्रसृता पुराणी ॥" इति सम्पूर्णमन्त्रः। (घ)

বঙ্গানুবাদ

পরমেশ্বর হইতে সনাতনী বুদ্ধি আবির্ভূত হইয়া থাকে॥ (ঘ)

(१) "संसारमोक्षस्थितिबन्धहेतुः॥" ६।१६ इति च। (ङ)

प्रभा

संसारेति।

"स विश्वकृद् विश्वविदात्मयोनि-

र्ज्ञः कालकारो गुणी सर्वविद् यः।

प्रधानक्षेत्रज्ञपतिर्गुणेशः

संसारमोक्षस्थितिबन्धहेतुः॥" इति सम्पूर्णमन्त्रः।

स परमेश्वरः विश्वकृत् समष्टिसृष्टिकर्ता, विश्ववित् सर्वज्ञः। आत्मयोनिः—आत्मनां सोपाधिकानां जीवानां योनिरुपादानम्, सशक्तिकात् तस्मात् तेषामुत्पत्तेः। ज्ञः स्वतःसिद्धज्ञानवान्, कालकारः—कालस्य स्वचेष्टात्मकस्याविर्भावकः। ज्ञकालकार इति पाठो बहुषु ग्रन्थेषु दृश्यते। गुणी कल्याणगुणवृन्दकः। प्रधानक्षेत्रज्ञपतिः—प्रधानस्य प्रकृतेर्मायाया इति यावत्, क्षेत्रज्ञस्य जीवस्य च पतिः। गुणेशः—गुणानां सत्त्वरजस्तमसाम् ईशः प्रवर्तकः। संसारमोक्षस्थितिबन्धहेतुः—भगवदुन्मुखबहिर्मुखभेदेन द्विविधानां जीवानां संसारात् मायापरिणामरूपात् मोक्षः, तस्य स्थितिः पालनम्, तस्मिंश्च आसक्तिरूपो यो बन्धः, तेषां हेतुः कारणम्॥ (ङ)

বঙ্গানুবাদ

ভগবান্ সংসার হইতে মোক্ষ, স্থিতি ও বন্ধের কারণ॥ (ঙ)

माधुर्यञ्च, श्रीगोपालोपनिषदि—

"सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम्।

(१) संसारबन्धस्थितिमोक्षहेतुः—इति पाठः पुस्तकचतुष्टये दृश्यते, मूलपुस्तके तथा नोपलभ्यते।

द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥" इति ॥१५(पूर्व१०) (च)

कान्तिमाला

माधुर्य्यञ्चेति। मनुष्यभावेनैव पारमैश्वर्यसाध्यकार्यकारित्वं तदित्यर्थः। यथा स्तन-चूषणेन पूतनाप्राणहरणं, कोमलाङ्घ्रिक्षेपात्यातिकठोरशकटभङ्गः, सप्ताब्दिकया मूर्त्या गिरिराजस्य धारणमित्यादि।

मनुष्यभावमुदाहरति—सत्पुण्डरीकेति ॥ (च)

प्रभा

माधुर्य्यञ्चेति। आदिपदेन माधुर्य्यं च गृह्यते। माधुर्य्यन्तु पारमैश्वर्य्यस्य प्रकाशे चाप्रकाशे च नरलीलानतिक्रमः। यथा पूतनाप्राणहन्तृत्वे स्तनचूषण-रूपनरबालकचेष्टित्वम्? यथा चातिकठोरशकटोत्पातनेऽप्यतिकोमलाङ्घ्रित्वम् इति सिद्धत्वम्। अतिदीर्घदामाऽशक्यबन्धेऽपि मातृभीतिवैक्लव्यम्। ब्रह्मा-दिमोहनेऽप्यतिसारज्ञेऽपि वत्सचारणलीलत्वम्। पारमैश्वर्य्ये सत्यपि तस्या-ऽप्रकाशनेन दधिपयःस्तेयस्त्रीजनलोलुपत्वादि। इति च सिद्धान्तरत्ने ग्रन्थकृत्।

भगवतो माधुर्य्यञ्च श्रीगोपालपूर्वतापनीयोपनिषदि प्रतिपाद्यते। सती नित्यनिर्मले पुण्डरीके पद्मे इव नयने यस्य तं, मेघाभं—मेघस्य नवीननीरद-स्येव आभा दीप्तिर्यस्य तं, वैद्युताम्बरं—वैद्युतं विद्युद्भवमिवाम्बरं वासो यस्य, ज्ञानमुद्राढ्यम्—'अवचनेनैव प्रोवाच' इति श्रुतेः, ज्ञाने या मुद्रा रीतिः मौन-रूपा तया आढ्यं युक्तम्, मौनमुद्राढ्यमिति पाठः क्वचिद् दृश्यते। वन-मालिनम्—

'आपादलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला।
मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्तिता॥'

इत्युक्तदिशा सच्चिदानन्दमयी या माला तयोपेतम्, ईश्वरं—प्रकृतिकालचैतन्य-नियन्तारं 'चिन्तयन् चेतसा कृष्णं मुक्तो भवति संसृतेः" इति परे-णान्वयः ॥ (च)

বঙ্গানুবাদ

যাঁহার নয়নদ্বয় সতত নির্ম্মল পদ্মের ন্যায়, যাঁহার শরীরকান্তি মেঘতুল্য, যাঁহার

বস্ত্র বিদ্যুৎসদৃশ, যিনি দ্বিভুজ ও জ্ঞানমুদ্রাযুক্ত অর্থাৎ মৌনাবলম্বী, যিনি বনমালা-বিভূষিত, এবংবিধ ঈশ্বরকে ধ্যান করিয়া লোক মুক্তিলাভ করেন ॥ (চ)

न भिन्ना धर्मिणो धर्मा भेदभानं विशेषतः ।
यस्मात् कालः सर्वदास्तीत्यादिधीर्विदुषामपि ॥११

कान्तिमाला

ननु विभुत्वादयो धर्मा हरेर्भिन्ना न वा ? नाद्यः । "एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति" (कठ० ४।१४) इति तद्भेदनिषेधकश्रुतिव्याकोपात् । नान्त्यः, प्रत्याख्येयनैर्गुण्यापत्तेरिति चेत्तत्र समाधिः—न भिन्ना इति । भेदाभावेऽपि विशेषाद्भेदकार्यमस्ति इति न नैर्गुण्यापत्तिः । विशेषश्च भेदप्रतिनिधिर्न भेदः । नन्वेवं कुत्र दृष्टम् ? तत्राह । यस्मात् काल इति । आदिना सत्तासतीत्यादिसंग्रहः (१) अत्र कालस्य कालाश्रयत्वं, सत्तायाश्च सत्ताश्रयत्वं, भेदाभावेपि यथा प्रतीयते, तथा प्रकृतेऽपीत्यर्थः । अत्राधिकं तु सुसूक्ष्माद् (२) गोविन्दभाष्यादधिगन्तव्यम् ॥११

प्रभा

निर्भेदेऽपि वस्तुनि विशेषबलेन गुणगुणिभावमापाद्य धर्मधर्मिणोरभेदं प्रतिपादयति—न भिन्नेति । धर्मा विभुत्वसर्वज्ञत्वादयो धर्मिणो धर्मवतो हरेर्न भिन्नाः, कुतः इत्याह—विशेषत इति । विशेषात् । यथा वैदुर्यादौ नीलपीतादयो गुणा अभिन्ना एव मिथो भिन्ना व्यवह्रियन्ते । विशेषस्त्वभेदेऽपि सति भेदकार्यप्रत्यायकधर्मविशेषः । स च भेदप्रतिनिधिः, भेदाभावेऽपि भेदकार्यस्य धर्मधर्मिव्यवहारस्य सत्यादिशब्दापर्यायतायाश्च निर्वर्तकः, इतरथा सत्ता सती, भेदो भिन्नः, कालः सर्वदाऽस्ति, देशः सर्वत्र, इत्यबाधितव्यवहारानुपपत्तिः । परेषामप्यावश्यकस्तत्स्वीकारः, अन्यथा 'विज्ञानमानन्दं ब्रह्म', 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिस्वरूपमात्रबोधकानां विज्ञानादिशब्दानां पर्यायतापत्तिः —इत्यभिहितं ग्रन्थकृतैव पीठकभाष्ये । अस्मादेव विशेषाद् गुणगुणिभावः, अवतारावतारिभावश्च एकस्य विष्णोरुल्लसति इत्यादिकमभिप्रेत्याह—यस्मादिति । तथाच काठकवाक्यं—

---

(१) 'सत्ता सतीत्यादिग्रहः—इति 'ग' तथा 'घ' पुस्तके ।

(२) 'ससूक्ष्मात्'—इति 'ग' तथा 'घ' पुस्तके ।

"यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति ॥" (२।१।१४) इति ॥११

বঙ্গানুবাদ

বিভুত্ব-সর্ব্বজ্ঞত্ব-প্রভৃতি ধর্ম্মসমূহ ধর্ম্মিস্বরূপ ভগবান্ হইতে ভিন্ন নহে। তবে যে লোকে ও শাস্ত্রে ধর্ম্ম এবং ধর্ম্মীর ভেদ প্রতীতি হয়, তাহা বিশেষনামক একটী পদার্থ স্বীকার করিয়া উপপাদন করিতে হইবে। কারণ 'কাল' এই কথা বলিলে চলে, তথাপি 'সর্ব্বদা আছে' এইরূপ প্রয়োগ করা হইয়া থাকে। কেবল যে সাধারণ লোকের এইরূপ প্রতীতি হয় তাহা নহে, শাস্ত্রজ্ঞ ব্যক্তিরও হইয়া থাকে ॥ ১১

एवमुक्तं नारदपञ्चरात्रे—
"निर्दोषपूर्णगुणविग्रह आत्मतन्त्रो
निश्चेतनात्मकशरीरगुणैश्च हीनः ।
आनन्दमात्रकरपादमुखोदरादिः
सर्वत्र च स्वगतभेदविवर्जितात्मा ?" इति । (क)

कान्तिमाला

निर्दोषेति । मुग्धत्वादिदोषशून्यः सार्वज्ञ्यादिगुणपूर्णो विग्रहो यस्य स भगवान् विष्णुः, किं मायिनामिव विशुद्धसत्त्वात्मक(१)स्तस्य विग्रहस्तत्राह, निश्चेतनात्मकेति । चिद्विग्रहो विशेषाच्चिद्गुणकतया (२) प्रतीत इत्यर्थः । किं सांख्यानामिव चिदेकधातुस्तत्राह—आनन्द-मात्रेति । चिदानन्दविग्रह इत्यर्थः । किं विष्वक्सेनानुयायिनामिव देहदेहिभेदवान् ? तत्राह—सर्वचेति । देहदेहिभावे गुणगुणिभावे च स्वगतभेदेनापि रहित इत्यर्थः । त्रिविधो हि भेदः । आम्रः पनसो नेति सजातीयभेदः, आम्रः पाषाणो नेति विजातीयभेदः, आम्र-पुष्पाणि आम्रो न इति स्वगतो भेदः (३) ॥ (क)

---

(१) शुद्धसत्त्वात्मकः—इति 'ग' पुस्तके ।
(२) चिदस्ततया—इति 'ग' पुस्तके ।
(३) स्वगतश्च—इति 'ग' तथा 'घ' पुस्तके ।

प्रभा

निर्दोषेति।

"अष्टादशमहादोषैरहिता भगवत्तनुः।
सर्वैश्वरमयी सत्यविज्ञानानन्दरूपिणी॥" इति स्मरणात्।

दोषाश्चोक्ता विष्णुयामले—

"मोहस्तन्द्रा भ्रमो रुक्षरसता काम उल्बणः।
असत्यं क्रोध आकाङ्क्षा आशङ्का विश्वविभ्रमः॥
विषमत्वं परापेक्षा दोषा अष्टादशोदिताः॥" इति।

निर्दोष मोहाद्यष्टादशदोषरहितः सर्वैश्वर्यमाधुर्यादिगुणपूर्णो विग्रहः स्वरूपानुबन्धि शरीरं यस्य स विष्णुः। आत्मतन्त्रः कालकर्मादिभिरपराधीन इत्यर्थः। निश्चेतनात्मकाश्चेतनत्वरहिता जड़ा इति यावत्, ये शरीरगुणा-स्तैर्हीनः। आनन्दमात्रं ह्लादिन्येकसारं करपादमुखोदरादि यस्य सः। सर्वत्र गुणगुणिभावे देहदेहिभावेऽपि च सति स्वगतभेदरहितः। स्वगतादयो भेदाश्चोक्ताः पञ्चदश्यां—

"वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः।
वृक्षान्तरात् सजातीयो विजातीयः शिलादितः॥" २।२० इति।

यत्र स्वगतभेदो नास्ति तत्र सजातीयविजातीयभेदराहित्यन्तु कैमुतिकन्यायसिद्धम्॥ (क)

বঙ্গানুবাদ

এ বিষয় নারদপঞ্চরাত্রে উক্ত হইয়াছে যথা—ভগবানের শরীর মোহাদি অষ্টাদশদোষবিহীন এবং সর্ব্বজ্ঞত্বাদিগুণপূর্ণ, তাহা কাল ও কর্ম্মপ্রভৃতির অধীন নহে, জড়রূপ শরীরগুণ তাঁহাতে নাই, তাঁহার হস্ত, পাদ, মুখ, উদরপ্রভৃতি একমাত্র আনন্দ অর্থাৎ হ্লাদিনীবৃত্তির সারস্বরূপ এবং স্বগত, স্বজাতীয় ও বিজাতীয় ভেদ তাঁহাতে নাই॥ (ক)

अथ नित्यलक्ष्मीकत्वं यथा विष्णुपुराणे—

"नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम॥" १।८।१५ इति। (ख)

कान्तिमाला

नित्यैवेति। अनपायिनी नित्यसम्बन्धा स्वरूपानुबन्धिनीत्यर्थः। (ख)

प्रभा

हेतुत्वादिति कारिकायां भगवतः कृष्णस्य परतमत्वसाधने प्रोक्तनित्यलक्ष्म्यादिमत्त्वलक्षणं हेतुमुपपादयति—नित्यैवेति। सा विष्णोरनपायिनी स्वरूपानुबन्धिनी श्रीर्लक्ष्मीर्भगवती शक्तिरिति यावत्, जगन्माता सर्वजननी, नित्या सर्वकालवर्त्तिनी। हे द्विजोत्तम! ब्राह्मणश्रेष्ठ मैत्रेय! यथा विष्णुः सर्वगतः सर्वव्यापी तथा श्रीरपि, तदभिन्नत्वात्। 'श्रीश्च लक्ष्मीश्च पत्न्यौ' इति श्रुतेः।

'अनपायिनी भगवती श्रीः साक्षादात्मनो हरेः।'१२।११।२०

इति श्रीभागवतस्मरणाच्च।

तदनपायित्वं यथा हयशीर्षपञ्चरात्रे—

"परमात्मा हरिर्देवस्तच्छक्तिः श्रीरिहोदिता।
श्रीर्देवी प्रकृतिः प्रोक्ता केशवः पुरुषः स्मृतः।
न विष्णुना विना देवी न हरिः पद्मजां विना॥" इति। (ख)

বঙ্গানুবাদ

লক্ষ্মী যে ভগবানে নিত্যসম্বদ্ধ, তাহা বিষ্ণুপুরাণে কীর্ত্তিত হইয়াছে যথা—বিষ্ণুর স্বরূপসম্বদ্ধা ভাগবতী শক্তি নিত্যা এবং সকলের উপাদানকারণ, হে ব্রাহ্মণশ্রেষ্ঠ মৈত্রেয়! যেমন বিষ্ণু সর্ব্বব্যাপক, সেইরূপ তাঁহার শক্তিও সর্ব্বব্যাপিকা, কারণ শক্তি ও শক্তিমান্ অভিন্ন॥ (খ)

**विष्णोः स्युः शक्तयस्तिस्रस्तासु या कीर्तिता परा।
सैव श्रीस्तदभिन्नेति प्राह शिष्यान् प्रभुर्महान्॥१२**

कान्तिमाला

एतत् प्रतिपादयितुं (६) विष्णोः स्युरिति। ननु क्वचित् नित्यमुक्तजीवत्वं लक्ष्म्याः स्वीकृतं, तत्राह—प्राहेति। नित्यैवेति पद्ये सर्वव्याप्तिकथनेन, कलाकाष्ठेत्यादिपद्यद्वये यज्ञोऽपौ-

(६) 'प्रतिपादयति'—इति 'ध' पुस्तके।

শ্রুত্যা চ মহাপ্রভুণা স্বশিষ্যান্ প্রতি লক্ষ্যা ভগবদদ্বৈতমুপদিষ্টম্। ক্বচিদ্ যত্তস্যাস্তু দ্বৈতমুক্তং, তত্তু তদাবিষ্টনিত্যমুক্তজীবমাদায় সঙ্গতমস্তু ॥ ১২

প্রভা

বিষ্ণোঃ শক্তিত্রিতয়ং প্রতিপাদয়তি—বিষ্ণোরিতি। বিষ্ণোর্ব্যাপকস্য ভগবত কৃষ্ণস্য তিস্রঃ শক্তয়ঃ পরাঽপরা ক্ষেত্রজ্ঞাখ্যা চেতি স্যুঃ, তাসু তিসৃষু শক্তিষু মধ্যে যা পরা স্বরূপশক্তিঃ কীর্তিতা, সৈব শ্রীর্ভাগবতী শক্তিঃ, সা চ বিষ্ণোরভিন্না ইতি মহান্ প্রভুঃ মহাপ্রভুঃ শ্রীচৈতন্যদেবঃ শিষ্যান্ প্রাহ ॥ ১২

বঙ্গানুবাদ

বিষ্ণুর পরা, অপরা ও ক্ষেত্রজ্ঞা এই তিনটী শক্তি আছে, সেই তিনটী শক্তির মধ্যে যে পরা শক্তি, তাহাই ভাগবতী শক্তি শ্রী। ইহা মহাপ্রভু শ্রীচৈতন্যদেব শিষ্যগণকে উপদেশ দিয়াছেন ॥ ১২

তত্র ত্রিশক্তির্বিষ্ণুঃ, যথা শ্বেতাশ্বতরোপনিষদি—
"পরাস্য শক্তির্বিবিধৈব শ্রূয়তে
স্বাভাবিকী জ্ঞানবলক্রিয়া চ ॥" ৬।৮ ইতি। (ক)

কান্তিমালা

পরাস্যেতি। স্বাভাবিকী বস্তুস্বতা ইব স্বরূপানুবন্ধিনী, জ্ঞানবলক্রিয়া, সংবিৎ-সন্ধিনী-হ্লাদিনীরূপা ক্রমাদ্বোধ্যা ॥ (ক)

প্রভা

অস্য ভগবতো বাসুদেবস্য পরা শক্তির্বিবিধা শ্রূয়তে, সা চ শক্তিঃ স্বাভাবিকী স্বরূপভূতা, জ্ঞানবলক্রিয়া চ—জ্ঞানশক্তির্বলশক্তিঃ ক্রিয়াশক্তিশ্চেতি। তত্র জ্ঞানশক্তিঃ সংবিদ্রূপা, বলশক্তিঃ সন্ধিনী, ক্রিয়াশক্তিঃ হ্লাদিনীতি। ভগবৎপূজ্যপাদশঙ্করাচার্যাস্তু জ্ঞানক্রিয়া বলক্রিয়া চেতি ব্যাচষ্টে। তত্র 'জ্ঞানক্রিয়া সর্ববিষয়জ্ঞানপ্রবৃত্তিঃ, বলক্রিয়া স্বসন্নিধিমাত্রেণ সর্বং বশীকৃত্য নিয়মনম্'। 'ন তস্য কার্যং করণঞ্চ বিদ্যতে ন তৎ সমশ্চাভ্যধিকশ্চ দৃশ্যতে' ইতি পূর্বার্দ্ধভাগঃ ॥ (ক)

বঙ্গানুবাদ

বিষ্ণুর তিনটী শক্তি বিদ্যমান আছে, ইহা শ্বেতাশ্বতরোপনিষদে দৃষ্ট হয় যথা—

ভগবান্ বিষ্ণুর পরা শক্তি নানাবিধ শ্রুত হয়, এই শক্তি স্বাভাবিকী অর্থাৎ স্বরূপভূতা। (১) জ্ঞানশক্তি, (২) বলশক্তি ও (৩) ক্রিয়াশক্তি। জ্ঞানশক্তিকে সংবিৎ, বলশক্তিকে সন্ধিনী ও ক্রিয়াশক্তিকে হ্লাদিনী বলা হয়॥ (ক)

"প্রধানক্ষেত্রজ্ঞপতির্গুণেশঃ॥" ৬।১৬ ইতি চ। (খ)

প্রভা

প্রধানম্—অব্যক্তম্, ক্ষেত্রজ্ঞঃ—জীবঃ, তয়োঃ পতিঃ পালকঃ, গুণেশঃ—গুণানাং সত্ত্বরজস্তমসাম্ ঈশঃ ঈশ্বরঃ।

"স বিশ্বকৃদ্বিশ্ববিদাত্মযোনি-
র্জ্ঞঃ কালকারো গুণী সর্ববিদ্ যঃ।
প্রধানক্ষেত্রজ্ঞপতির্গুণেশঃ
সংসারমোক্ষস্থিতিবন্ধহেতুঃ॥ ৬।১৬ ইতি

সম্পূর্ণমন্ত্রঃ॥ (খ)

বঙ্গানুবাদ

তিনি প্রধান, ক্ষেত্রজ্ঞ, এই উভয়ের পতি—পালক, তিনিই সত্ত্ব, রজঃ ও তমোগুণের নিয়ন্তা॥ (খ)

শ্রীবিষ্ণুপুরাণে চ—

"বিষ্ণুশক্তিঃ পরা প্রোক্তা ক্ষেত্রজ্ঞাখ্যা তথাऽপরা।
অবিদ্যাকর্মসংজ্ঞাऽন্যা তৃতীয়া শক্তিরিষ্যতে॥" ৬।৭।৬১ ইতি। (গ)

কান্তিমালা

বিষ্ণুশক্তিরিতি। অবিদ্যেতি কর্মেতি চ সংজ্ঞা যস্যাঃ সা অন্যা তৃতীয়া শক্তিস্ত্রিগুণা মায়েত্যর্থঃ॥ (গ)

প্রভা

বিষ্ণুশক্তিরিতি। বিষ্ণোঃ স্বরূপভূতা শক্তিঃ পরা শ্রেষ্ঠা প্রোক্তা কথিতা বিদ্বদ্ভিরিতি শেষঃ। তথা ক্ষেত্রজ্ঞো জীব আখ্যা যস্যাঃ তাদৃশী যা শক্তিঃ সা অপরা, অন্যা অপরা আভ্যাং ভিন্না তৃতীয়া—অবিদ্যাকর্মসংজ্ঞা—অবিদ্যা কর্ম কার্যং যস্যাঃ সা তৎসংজ্ঞা মায়েত্যর্থঃ॥ (গ)

বঙ্গানুবাদ

বিষ্ণুপুরাণে উক্ত হইয়াছে যথা—বিষ্ণুর পরা, ক্ষেত্রজ্ঞা ও মায়া এই তিনটী শক্তি আছে, তন্মধ্যে বিষ্ণুর স্বরূপভূতা শক্তিকে পরা শক্তি বলে, ক্ষেত্রজ্ঞনাম্নী শক্তিকে জীবশক্তি এবং অবিদ্যা যাহার কার্য্য এবংবিধা শক্তিকে মায়াশক্তি বলে ॥ (গ)

परैव विष्णुभिन्ना श्रीरित्युक्तं तत्रैव—

"कलाकाष्ठानिमेषादि-कालसूत्रस्य गोचरे ।

यस्य शक्तिर्न शुद्धस्य प्रसीदतु स नो हरिः ॥" १।९।४४

"प्रोच्यते परमेशो यः यः शुद्धोऽप्युपचारतः ।

प्रसीदतु स नो विष्णुरात्मा यः सर्वदेहिनाम् ॥" १।९।४५ इति । (घ)

कान्तिमाला

कलेति । कलादिलक्षणो यः कालस्तदेव सूत्रं जगच्चेष्टानियामकत्वाद्रज्जुः तस्य गोचरे विषये, यस्य पराख्यशक्तिर्नास्ति, स विष्णुर्नः प्रसीदतु । यः केवलः पराभेदरहितोऽप्युपचारात् परमेशः प्रोच्यते । परा चासौ मा च लक्ष्मीस्तस्या ईशः स्वामीति निगद्यते इत्यर्थः, यः प्रसिद्धः स नः प्रसीदतु । स्फुटमन्यत् ॥ (घ)

प्रभा

तत्र विष्णुपुराणे । अत्र स्वामिभिरेवं व्याख्यातञ्च । 'कलाकाष्ठानिमेषादिः काल एव, सूत्रवत् सूत्रं जगच्चेष्टानियामकत्वात्, तस्य गोचरे विषये यस्य शक्तिर्लक्ष्मीर्न वर्तते स्वरूपाभिन्नत्वात्, नित्यैव सा कालाधीना न भवतीत्यर्थः । अत एतस्याः स्वरूपाभेदात् शुद्धस्य इत्युक्तम् । ननु यदि लक्ष्मीस्तत्स्वरूपाभिन्ना कथं तर्हि लक्ष्म्याः पतिरित्युच्यत इति । परा चासौ मा लक्ष्मीस्तस्या ईशो यः शुद्धः केवलोऽपि उपचारतो भेदविवक्षा प्रोच्यते । द्वितीयश्लोकः प्रसिद्धो ॥' (घ)

বঙ্গানুবাদ

পরা শক্তি শ্রী যে বিষ্ণু হইতে অভিন্ন, তাহা বিষ্ণুপুরাণে উক্ত হইয়াছে—যে শুদ্ধস্বরূপ ভগবানের শক্তি কলা, কাষ্ঠা, নিমেষপ্রভৃতি কালসূত্রের বিষয়ীভূত

নহে অর্থাৎ কালাধীন নহে, যিনি শুদ্ধ অর্থাৎ পরাখ্যশক্তি হইতে অভিন্ন হইলেও উপচারবশতঃ (গৌণপ্রয়োগবশতঃ) যাঁহাকে পরমেশ বলা হয়, সেই শ্রীহরি আমাদের প্রতি প্রসন্ন হউন ॥ (ঘ)

এষা পরৈব ত্রিবৃদিত্যপ্যুক্তং তত্রৈব—

"হ্লাদিনী সন্ধিনী সংবিৎ ত্বয্যেকা সর্বসংশ্রয়ে।

হ্লাদতাপকরী মিশ্রা ত্বয়ি নো গুণবর্জিতে ॥" ১।১২।৬৮ ইতি। (ঙ)

কান্তিমালা

এষেতি। ত্রিবৃৎ ত্রৈরূপ্যেণ বিভাতা। হ্লাদিনীতি। হ্লাদাত্মাপি যয়া হ্লাদতে, ভবতি হ্লাদবান্ সা হ্লাদিনী। সদাত্মাপি যয়া সত্তাং ধত্তে সা সর্বদেশকালব্যাপ্তিহেতুঃ সন্ধিনী। সংবিদাত্মাপি যয়া সংবেত্তি সা সংবিৎ। একা বিশেষবলনির্ভাতভেদকার্যাপি নির্ভেদেত্যর্থঃ। সত্ত্বাংশেন হ্লাদকরী, রজোঽংশেন তাপকরী, যা মিশ্রা ত্রিগুণা শক্তিঃ সা ত্বয়ি নো বর্ততে, কুত ইত্যাহ, গুণবর্জিতে মায়াগুণাস্পৃষ্টে ইত্যর্থঃ ॥ (ঙ)

প্রভা

'ত্রিবৃৎ ত্রিবৃত্তিকা। তত্র বিষ্ণুপুরাণে। হ্লাদিনীতি। ধ্রুববাক্যং জীবাদ্বৈলক্ষণ্যেনেশ্বরং স্তৌতি—হে ভগবন্! সর্বসংশ্রয়ে নিখিলপরমাশ্রয়ে ত্বয়ি হ্লাদিন্যাদিত্রিবৃত্তিকা একা অভিন্না শক্তির্বর্ততে। সত্ত্বাংশেন মনঃপ্রসাদলক্ষণা হ্লাদকরী, তমোঽংশেন বিষয়বিয়োগাদিতাপকরী, রজোঽংশেন তদুভয়োদয়ান্মিশ্রা ইত্যেবং ত্রিগুণা প্রকৃতিঃ ত্বয়ি নো ন বর্ততে, কুত ইত্যাহ—গুণবর্জিত ইতি। মায়াগুণাস্পৃষ্ট ইত্যর্থঃ, সা তু জীবেষ্বেব বর্তত ইতি জীবেভ্যস্ত্বমন্যোঽতিসুখৈশ্বর্যবানিত্যর্থঃ।' ইতি পীঠকভাষ্যে গ্রন্থকৃৎ।

'তত্র সন্ধিনীসংবিদ্‌হ্লাদিন্যো যথোত্তরমুৎকৃষ্টা জ্ঞেয়াঃ। 'অস্তীত্যেবোপলব্ধব্যঃ' ইত্যাদ্যুক্তসত্যাত্মকোঽপি যয়া 'সদেব সোম্য' ইত্যাদ্যুক্তাং সত্তাং ধত্তে, দ্রব্যকর্মকালস্বভাবজীবেভ্যঃ সত্তাং তত্তৎকার্যক্ষমতাঞ্চ দদাতি সা সর্বদেশকালদ্রব্যব্যাপ্তিহেতুঃ সন্ধিনী। সত্যং জ্ঞানমিত্যাদ্যুক্তজ্ঞানস্বরূপোঽপি 'যয়া যঃ সর্বজ্ঞঃ' ইত্যুক্তজ্ঞানবান্ ভবতি, যয়ৈব 'প্রজ্ঞা চ তস্মাৎ প্রসৃতা পুরাণী', 'ত্বত্তো জ্ঞানং হি জীবানাম্' ইত্যাদ্যুক্তধর্মভূতজ্ঞানবিশিষ্টান্ জীবান্ করোতি, সা

संवित्। 'विज्ञानमानन्दं ब्रह्म' इत्याद्युक्तानन्दस्वरूपोऽपि यया च 'आनन्दं ब्रह्मणो विद्वान्' इत्याद्युक्तानन्दवान् भवति। संविदभिन्नया श्रवणादिभावादिनाम्ना स्वानुकूल्यभूतया स्वसाम्मुख्यान् जीवानानन्दयति, 'रसं ह्येवायं लब्ध्वानन्दी भवति' इत्याद्युक्तप्रशस्तानन्दभाजः करोति सा ह्लादिनी।' इति श्रीपीठकभाष्यटीकायां श्रीबलदेवः॥ (ङ)

বঙ্গানুবাদ

এই পরা শক্তি যে ত্রিবিধবৃত্তিযুক্তা ইহা বিষ্ণুপুরাণে উক্ত হইয়াছে যথা—ধ্রুব বলিতেছেন—হে ভগবন্! সকলের আশ্রয়স্বরূপ তোমাতে হ্লাদিনীপ্রভৃতি বৃত্তিত্রয়রূপ একটী শক্তি বিদ্যমান আছে, সেই শক্তির সহিত তোমার কোনরূপ ভেদ নাই, মায়াগুণ তোমাকে স্পর্শ করিতে পারে না, এইজন্য হ্লাদ ও তাপকরী মিশ্রা বৃত্তি তোমাতে নাই॥ (৬)

एकोऽपि विष्णुरेकापि लक्ष्मीस्तदनपायिनी।
स्वसिद्धैर्बहुभिर्वेशैर्बहुरित्यभिधीयते॥ १२

कान्तिमाला

यथा (७) श्रीनारदपञ्चरात्रे—'मणिर्यथा विभागेन नीलपीतादिभिर्युतः। रूपभेदमवाप्नोति ध्यानभेदात् तथा विभुः॥' इति। मणिरत्र वैदुर्यम्। नीलपीतादयस्तद्गुणाः, एवम्। एकमेव परं तत्त्वं पुरुषोत्तमतया स्त्र्युत्तमतया च द्वेधा प्रकाशते। तस्य तस्याश्च वैदुर्यमणिवद् बहूनि रूपाणि सन्तीत्याह—एकोऽपि इति। स्वसिद्धैः स्वरूपानुबन्धिभिः वेशैः संस्थानैः बहुर्बह्वी चोच्यते॥ १२

प्रभा

अथ एकमेव परमस्वरूपं शक्तित्वेन शक्तिमत्त्वेन च विराजतीति पूर्वं यस्य भगवतः शक्तेः स्वरूपभूतत्वं निरूपितं तच्छक्तिमत्ताप्राधान्येन विराजमानं भगवत्संज्ञामाप्नोति। तदेव च स्वरूपं शक्तित्वप्राधान्येन विराजमानं लक्ष्मीसंज्ञामाप्नोतीति दर्शयितुं तस्य तच्छक्तेश्च स्वप्रकाशभेदेनानन्तस्य स्ववृत्ति-

(७) 'यथा—इत्यादिः—एवम्' इत्यन्तः पाठः 'ग' पुस्तके नास्ति।

भेदेनानन्तायाश्च भेदाः प्रदर्श्यन्ते इत्याशयेनाह—एकोऽपीति। विष्णुर्भगवान् वासुदेव एकः स्वगतस्वजातीयविजातीयभेदशून्योऽपि तथाऽनपायिनी स्वरूपानुबन्धिनी लक्ष्मीर्भगवती शक्तिरेकापि स्वसिद्धैः स्वयं निष्पन्नैः स्वरूपभूतैरित्यर्थः। बहुभिर्वंशैः संस्थानैः बहुः इति अभिधीयते कथ्यते। यद्यपि विष्णुरेकस्तच्छक्तिरप्येका, तथापि वामनादिरूपभेदेन जानकीरुक्मिण्यादिरूपभेदेन च तयोः बहुत्वम्।

एकमपि मुख्यं भगवद्रूपं युगपदनन्तरूपात्मकं भवति। तथैवाक्रूरेण स्तुतं—'बहुमूर्त्येकमूर्तिकम्' ।१०।४०।७ इति श्रीभागवतवचनात्, 'अनेकानेकस्वरूपाय' ।१।२।३ इति श्रीविष्णुपुराणाच्च। श्रुतिश्च भवति—'एकं सन्तं बहुधा दृश्यमानम्' इति। यतो यदा यादृशां येषामुपासनाफलोदयभूमिकावस्थानं तदा तथैव ते पश्यन्ति। 'प्रज्ञान्तरपृथक्त्ववद्दृष्टिश्च तदुक्तम्' ।३।३।५२ इत्यत्र ब्रह्मसूत्रे माध्वभाष्यम्—'उपासनाभेदाद्दर्शनभेदः' इति। दृष्टान्तश्च वैदूर्यमणिवद्दिव्याभिनेतृवच्च इति चैतद् बोध्यम्। स्वरूपशक्तिभूताया लक्ष्म्याश्च बहुत्वं यथा—श्रीभागवते—

"श्रिया पुष्ट्या गिरा कान्त्या कीर्त्या तुष्टेलयोर्जया।
विद्ययाऽविद्यया शक्त्या मायया च निषेवितम्॥"१०।३९।५५ इति।

श्रीविष्णुपुराणे च—

"यज्ञविद्या महाविद्या गुह्यविद्या च शोभने।
आत्मविद्या देवि त्वं हि विमुक्तिफलदायिनी॥" (१।९।११८)इति ॥१३

বঙ্গানুবাদ

যদ্যপি বিষ্ণু এক এবং তাঁহার স্বরূপভূতা শক্তিও এক, তথাপি বামনাদিরূপভেদে ও রুক্মিণীপ্রভৃতিরূপে বহু বলিয়া কথিত হইয়া থাকেন॥ ১৩

तत्रैकत्वे सत्येव विष्णोर्बहुत्वं, यथा—श्रीगोपालोपनिषदि—

"एको वशी सर्वगः कृष्ण ईड्य
एकोऽपि सन् बहुधा योऽवभाति।
तं पीठस्थं ये तु यजन्ति धीरा-
स्तेषां सुखं शाश्वतं नेतरेषाम्॥" (पूर्व २०) इति। (क)

कान्तिमाला

एक इति । बहुधा मत्स्यकूर्मादिरूपप्राकट्येन ॥ (क)

प्रभा

व्याख्यातं चैतज्जीवप्रभुणा—

'एकः स्वयं भगवत्त्वेनासमोर्द्धत्वात् । यथोक्तं श्रीभागवते—'स्वयं त्वसाम्यातिशयस्त्र्यधीशः' ३।२।२१ इति । अतो वशी सर्ववशयिता । यतः सर्वगः सर्वव्यापकः स कृष्णः । 'कृष्णस्तु भगवान् स्वयम्' इत्यादिप्रसिद्धो यः स एव । अत एवेड्यः सर्वस्तुत्यः । ननु कृष्णरूपेणापि बहव आविर्भावा दृश्यन्ते, कथमेकत्वं तत्राह—एकोऽपि सन्निति । अचिन्त्यशक्तित्वात् । यथोक्तं तत्रैव—

'चित्रं बतैतदेकेन वपुषा युगपत् पृथक् ।
गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत् ॥' भा० १०।६৯।२ इति ।

धीराः शुकादिवद्विवेकिनः । तेषां शाश्वतं यत् सुखं तत् सुखमितरेषामन्येषां महानारायणाद्युपासकानामपि नेत्यर्थः । तथोक्तं तत्रैव—

'यन्मर्त्यलीलौपयिकं स्वयोग-
मायाबलं दर्शयता गृहीतम् ।
विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ॥' भा० ३।२।१२ इति ।

पीठस्थं नित्यधामस्थ-यन्त्रात्मकपीठस्थमित्यर्थः ॥ (क)

বঙ্গানুবাদ

ভগবান্ কৃষ্ণ এক, সকলে তাঁহার বশীভূত, তিনি সর্ব্বব্যাপী, সকলের স্তবযোগ্য। তিনি এক হইয়াও মৎস্য, কূর্ম্মাদি বহুভাবে প্রকাশিত হন। শুক-নারদপ্রভৃতি বিবেকিগণ নিত্যধামস্থ যন্ত্রস্বরূপ পীঠমধ্যে যাঁহার পূজা করেন, তাঁহাদেরই নিত্য সুখ, অন্যের নহে ॥ (ক)

अथ लक्ष्म्यास्पद यथा—

"परास्य शक्तिर्विविधैव श्रूयते ॥" (श्वेता० ६।৮) इत्यादि । (ख)

कान्तिमाला

अथेति। तद्वद्बहुत्वम् परास्येति। विविधा ज्ञानक्रियादिरूपप्राकट्येन नानारूपा ॥ (ख)

प्रभा

तद्वद्बहुत्वम्। परेति। व्याख्यातश्चैतत् प्राक् ॥ (ख)

पूर्तिः सार्वत्रिकी यद्यप्यविशेषा तथापि हि।
तारतम्यञ्च तच्छक्तिव्यक्त्यव्यक्तिकृतं भवेत् ॥१४

कान्तिमाला

विष्णोरंशांशावतारेषु पूर्तिर्यद्यपि तुल्या, तथापि गुणप्राकट्यतारतम्यादंशांशिभावोऽप्यस्तीत्याह—पूर्तिरिति। सार्वत्रिकी सर्वेष्ववतारेषु वर्तमाना अविशेषा तुल्या ॥१४

प्रभा

पूर्तिरिति। यद्यपि सदैव नित्यधाम्नि विष्णोस्तत्स्वरूपशक्तेश्च लक्ष्म्या विलाससाम्यादिना सामान्यतः पूर्णताऽस्ति, तथापि विशेषतः—

'एकत्वञ्च पृथक्त्वञ्च तथांशत्वमुतांशिता।
तस्मिन्नेकत्र नायुक्तमचिन्त्यानन्तशक्तितः॥
शक्तेर्व्यक्तिस्तथाऽव्यक्तिस्तारतम्यस्य कारणम् ॥' (ल० भा०)

इति शक्त्याविर्भावतारतम्यनिबन्धनं भगवतो लक्ष्म्याश्चाविर्भावतारतम्यं प्रदर्शयति—पूर्तिरिति। यद्यपि विष्णोस्तदभिन्नायाश्च लक्ष्म्याः सार्वत्रिकी सर्वेष्वाविर्भावेषु पूर्तिः पूर्णता अविशेषा विशेषरहिता तुल्या इति यावत्, तथापि तच्छक्तिव्यक्त्यव्यक्तिकृतं तच्छक्तेर्विष्णुशक्तेर्व्यक्तिकृतं प्राकट्यकृतम् अव्यक्तिकृतमप्राकट्यकृतञ्च तारतम्यं तरतमभावो भवेत्। यद्यपि विष्णोः सर्वेष्वाविर्भावेषु सामान्यतः पूर्णता तुल्या, तथापि यत्र तच्छक्तेरभिव्यक्तिस्तत्र पूर्णता, यत्र तच्छक्तेः सम्यगनभिव्यक्तिस्तत्र पूर्णता नाभिव्यज्यते। एतदुक्तं भवति—'सर्वे नित्याः' इत्यादि पूर्णतावाक्यं, तथैव 'एते चांशकलाः पुंसः' इत्याद्यंशांशित्ववाक्यञ्चास्ति। पूर्णं स्वरूपसत्सर्वगुणकत्वात् सङ्गतिमत्। परन्त्वभिव्यक्ता-

नभिव्यक्तसर्वगुणकत्वात्तथा, इति न काचित् क्षतिः। अन्यथा परं व्याकुप्येत्। एवमुक्तं श्रीलघुभागवतामृते श्रीरूपगोस्वामिपादैः—

'तस्मात् कथं तारतम्यं तेषां व्याख्यायते त्वया ।
अत्रोच्यते परेशत्वात् पूर्णा यद्यपि तेऽखिलाः ॥
तथाप्यखिलशक्तीनां प्राकट्यं तत्र नो भवेत् ।
अंशत्वं नाम शक्तीनां सदाल्पांशप्रकाशिता ॥
पूर्णत्वञ्च स्वेच्छयैव नानाशक्तिप्रकाशिता ।
शक्तिरैश्वर्यमाधुर्यकृपातेजोमुखा गुणाः ॥'१४॥ (श्रीकृष्णप्रकरणे ४४-४७)

বঙ্গানুবাদ

যদ্যপি সমস্ত অবতারে ভগবান্ বিষ্ণুর পূর্ণতা তুল্য, তথাপি তাঁহার শক্তির আবির্ভাব ও অনাবির্ভাববশতঃ তারতম্য হইয়া থাকে ॥ ১৪

तत्र, विष्णोः सार्वत्रिकी पूर्तिर्यथा वाजसनेयके—
"पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥" (बृह० ५।१।१) इति । (क)

कान्तिमाला

पूर्णमिति। अदोऽवतारिरूपम्, इदम् अवताररूपम्, उभयं पूर्णं सर्वशक्तिमत्, पूर्णादवतारिरूपात् पूर्णमवताररूपं लीलाविस्ताराय स्वयमुदच्यते प्रादुर्भवति। तल्लीलापूर्तौ पूर्णस्यावताररूपस्य पूर्णं स्वरूपमादाय स्वस्मिन्नैक्यं नीत्वा, पूर्णमवतारिरूपमन्यत्राविलीनं सदवशिष्यते तिष्ठतीत्यर्थः। अत्र ऐक्यमुक्तं,पार्थक्ये न स्थितिस्तोच्यते,तदिदं यथेष्टं बोध्यम् ॥(क)

प्रभा

वाजसनेयके बृहदारण्यके। पूर्णमिति। अदः अवतारिरूपं पूर्णं सर्वशक्तिमत्। इदम् अवताररूपं पूर्णं सर्वशक्तिमत्। पूर्णात् अवतारिरूपात् पूर्णम् अवताररूपम् उदच्यते प्रादुर्भवति। पूर्णस्यावताररूपस्य पूर्णं स्वरूपमादाय नीत्वा लीलायाः परं पूर्णमवतारिरूपमेवाशिष्यते। अवतारित्वं नाम मूलरूपत्वमंशित्वमिति यावत्, स्वेच्छया नानाशक्तिप्रकाशित्वमित्यर्थः। तथा चोक्तं ग्रन्थकृद्भिः पीठकभाष्ये—'यथैकस्य षट्शास्त्रज्ञस्य विदुषः क्वचित् कृत्स्नशास्त्रोद्ग्राहिणः सर्वज्ञत्वं प्रतीयते, क्वचिदकृत्स्न-तद्-

ग्राहिणो ह्यकतद्ग्राहिणश्च सर्वज्ञकल्पन्वञ्च, इत्येवमेकस्य बहुलशक्तिव्यक्ति-सव्यपेक्षिणोऽंशित्वांऽशत्वादीनि।' एवमेव भगवतोऽंशित्वांऽशत्वादीनि विज्ञे-यानि ॥ (क)

বঙ্গানুবাদ

অবতারিরূপ ও অবতাররূপ পূর্ণ অর্থাৎ সর্ব্বশক্তিযুক্ত, অবতারিরূপ হইতে অবতাররূপ লীলাপূরণের জন্য আবির্ভূত হইয়া থাকেন। অবতাররূপের পূর্ণ-স্বরূপ গ্রহণ করিয়া অবতারিরূপই অবশিষ্ট থাকে, পূর্ণস্বরূপকে অবতারী ও অংশকে অবতার বলা হয়। ভগবান্ কৃষ্ণ সর্ব্বাবতারী, মৎস্য, কূর্ম্মপ্রভৃতি অবতার ॥ (ক)

महावाराहे च—

"सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः।
हानोपादानरहिता नैव प्रकृतिजाः क्वचित् ॥
परमानन्दसन्दोहा ज्ञानमात्राश्च सर्वतः।
सर्वे सर्वगुणैः पूर्णाः सर्वदोषविवर्जिताः ॥" इति। (ख)

कान्तिमाला

सर्वे इति। शाश्वता जगति पुनःपुनराविर्भाविनो देहाः स्वरूपानुबन्धिनो विग्रहाः, स्वरूपानुबन्धित्वादेव हानेन उपादानेन च वर्जिता। स्फुटार्थमन्यत् ॥ (ख)

प्रभा

महावाराहे तदाख्यपुराणे। सर्वे इति। तस्य परात्मनः परमेश्वरस्य भगवतः कृष्णस्य सर्वे देहा नित्याः सनातनाः, शाश्वता जगति पुनः पुनराविर्भाविनः। उपलक्षणञ्चैतत्—'जायते, अस्ति, वर्द्धते, विपरिणमते, अपक्षीयते, नश्यति' इति यास्कपरिपठितानां षड्विधभावविकाराणां निषेधो बोद्धव्यः। हानोपादानरहिता इति। सच्चिदानन्दरूपत्वात् त्यागग्रहणविवर्जिताः। एते देहाः क्वचित् प्रकृतिजाः प्रकृतिसम्भूता न एव भवन्ति; अप्राकृता भगवद्देहा इति भावः। देहास्तस्येत्यत्राभेदे षष्ठी, चैतन्यमात्मनः स्वरूपमित्यादिवत्।

परमेति। सर्वतः—देशतः, कालतः, स्वरूपतश्च सर्वथा परमानन्दसन्दोहाः

परमानन्दसमष्टिभूताः, ज्ञानमालाश्च केवलं ज्ञानस्वरूपाः,' सर्वगुणैरशेष-कल्याणगुणगणैः पूर्णाः, सर्वदोषविवर्जिताः मुग्धत्वादिसर्वदोषैश्च रहिताः ॥ (ख)

বঙ্গানুবাদ

মহাবরাহপুরাণে উক্ত হইয়াছে যথা,—ভগবান্ শ্রীকৃষ্ণের সমস্ত অবতারদেহই সনাতন এবং পুনঃ পুনঃ জগতে আবির্ভাবশীল। সেই সমস্ত দেহ ত্যাগ ও গ্রহণযোগ্য নহে এবং প্রকৃতি হইতে উৎপন্ন নহে ॥

ভগবানের সমস্ত দেহ সর্ব্বপ্রকারে পরমানন্দসমষ্টিস্বরূপ এবং জ্ঞানরূপ, বিবিধ কল্যাণগুণপূর্ণ এবং মোহপ্রভৃতি-দোষরহিত ॥ (খ)

अथ श्रियः सा यथा श्रीविष्णुपुराणे—

"एवं यथा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येष तथा श्रीस्तत्सहायिनी ॥
पुनश्च पद्मादुद्भूता आदित्योऽभूद् यदा हरिः ।
यदा च भार्गवो रामस्तदाभूद्धरणी त्वियम् ॥
राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णोरेषा सहायिनी ॥
देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ॥" १।९।१४०-१४३

इति । (ग)

कान्तिमाला

अथेति । सा पूर्तिः । तामुदाहरति—एवं यथा इति । प्रकटार्थम् । देवत्व इति । करोति प्रकटयति ॥ (ग)

प्रभा

सा पूर्तिः पूर्णतेत्यर्थः । एवमिति । एवमित्थंरूपेण यथा जगत्स्वामी जगतां प्रभुर्देवदेवो देवानां ब्रह्मादीनामपि देवो जनार्दनः कृष्णोऽवतारं करो-त्यवतरति, तथा श्रीर्लक्ष्मीस्तत्सहायिनी भगवतो नित्यसहाया । पुनश्च पुनरपि

যদা হরিরাদিত্যঃ অদিতিপুত্রো বামনোঽভবৎ, তদা শ্রীঃ পদ্মাদুদ্ভূতাঽভবৎ, যদা চ হরির্ভার্গবো ভৃগুপুত্রো রামঃ পরশুরামোঽভবৎ, তদা ইয়ন্তু লক্ষ্মীর্ধরণী পৃথিবীরূপাঽভবৎ। ইয়ং লক্ষ্মী রাঘবত্বে রামাবতারে সীতাঽভবৎ, কৃষ্ণজন্মনি কৃষ্ণাবতারে রুক্মিণ্যভবৎ, অন্যেষ্বেতদতিরিক্তেষু মৎস্যকূর্মাদ্যবতারেষু চ এষা লক্ষ্মীর্বিষ্ণোঃ সহায়িনী নিত্যসহায়ভূতা। বিষ্ণোর্দেবত্বে দেবাবতারেঽপ্রকট-লীলায়ামিয়ং লক্ষ্মীর্দেবদেহা দেবশরীরা, মনুষ্যত্বে বিষ্ণোর্মানুষাবতারে প্রকট-লীলায়ামিয়ঞ্চ মানুষী মানব্যভবৎ। ইতি পূর্বপূর্বকল্পীয়াবতারদৃষ্ট্যা ইতঃ পরমপি ভবিষ্যতি। এষা লক্ষ্মীর্বিষ্ণোর্দেহানুরূপাং দেহদৃষ্টীমাত্মনঃ তনুং শরীরং করোতি প্রকটয়তি॥ (গ)

বঙ্গানুবাদ

লক্ষ্মীর পূর্ত্তি অর্থাৎ পরিপূর্ণতাবিষয়ে বিষ্ণুপুরাণে কথিত হইয়াছে যথা,—এইরূপে দেবশ্রেষ্ঠ জগৎস্বামী জনার্দ্দন যেমন অবতীর্ণ হইয়া থাকেন, তাঁহার সহায়ভূতা লক্ষ্মীদেবীও সেইরূপ অবতীর্ণ হইয়া থাকেন।

আবার যখন হরি অদিতিপুত্র বামনরূপে আবির্ভূত হইয়াছিলেন তখন লক্ষ্মী পদ্ম হইতে প্রকাশিত হইয়াছিলেন, এবং আবার যখন ভগবান্ পরশুরামরূপে অবতীর্ণ হইয়াছিলেন, তখন লক্ষ্মীদেবী ধরণীরূপে আবির্ভূত হইয়াছিলেন।

রামাবতারে লক্ষ্মী সীতারূপে, কৃষ্ণাবতারে রুক্মিণীরূপে আবির্ভূত হইয়াছিলেন। লক্ষ্মীদেবী অন্য সমুদায় অবতারে বিষ্ণুর সহায়া ছিলেন।

বিষ্ণু দেবদেহরূপে আবির্ভূত হইলে লক্ষ্মী দেবদেহা, মনুষ্যদেহরূপে আবির্ভূত হইলে লক্ষ্মী মানুষী হইয়া থাকেন। বিষ্ণুর দেহানুরূপ লক্ষ্মী শরীর গ্রহণ করিয়া থাকেন॥ (গ)

স্যাৎ স্বরূপসতী পূর্তিরিহৈক্যাদিতি বিন্মতম্ ॥১৫

কান্তিমালা

স্যাৎ ইতি। এষু বাক্যেষু সৈব সর্বত্রেতি সর্বেষাং প্রাদুর্ভাবানাম্ অভেদাৎ সর্বেষু তেষু স্বরূপ-সতী পূর্তিরস্ত্যেবেতি শ্রুতিযুক্তিবিদাং মতম্ ইত্যর্থঃ। অন্যথা স্বরূপপূর্তেরভাবে (১) তদভেদো গৌণঃ স্যাৎ॥ ১৫

---

(১) 'স্বরূপপূর্তেরভাবে'—ইতি পাঠঃ 'গ' পুস্তকে নাস্তি।

प्रभा

ऐक्याद्विष्णोरवताराणामेकरूपत्वादिह शास्त्रे पूर्तिर्भगवतः पूर्णता स्वरूप-सती स्वाभाविकी स्यादिति विन्मतं विदां पण्डितानां सम्मतम् ॥ १५

বঙ্গানুবাদ

অবতারসমূহের ঐক্যহেতু পূর্ণতা স্বাভাবিকী, ইহা পণ্ডিতগণের অভিমত ॥১৫

अथ तथापि तारतम्यम्, तत्र श्रीविष्णोस्तद् यथा श्रीभागवते—

"एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ॥" इति । (क)

कान्तिमाला

अथेति । यद्यप्यविशेषा पूर्तिरस्ति तथापि तारतम्यमंशांशिभावोऽप्यस्ति इत्यर्थः । एते चेति । एते चतुर्विंशतिः, पुंसो गर्भोदशायिनो(१)ऽंशकलाः कथिताः । तन्मध्यपठितः श्रीकृष्णस्तु (२) स्वयं भगवान् अनन्यापेक्षिरूपी मूलमित्यर्थः ॥ (क)

प्रभा

यद्यपि विलासाः सांशाश्च स्वयंरूपवत् पूर्णास्तथाप्यभिव्यक्तानभिव्यक्त-सर्वगुणकत्वात्तारतम्यमंशांशिभावोऽस्ति । श्रीविष्णोः स्वयंप्रभोः श्रीकृष्णस्य । तत् तारतम्यम् । एत इति । एते पूर्वोक्ताः कुमाराद्याश्चतुर्विंशतिसंख्यकाः चकारादनुक्ताश्च हयग्रीवादयः पुंसो द्वितीयपुरुषावतारस्य गर्भोदशायिनः प्रद्युम्नस्य सहस्रशीर्ष्णः केचिदंशाः केचित् कलाः । अंशत्वं नामाविर्भावितयथा-प्रयोजनमल्पशक्तित्वम् । अंशा मत्स्यकूर्मवराहाद्याः, कलाः कुमारनारदा-दयश्च । अत्र प्राचां कारिकाः—

'नृसिंहो जामदग्न्यश्च कल्की पुरुष एव च ।
भगवत्त्वे च तत्रादेरैश्वर्यस्य प्रकाशकाः ॥
नारदोऽथ तथा व्यासो वराहो बुद्ध एव च ।
धर्माणामेव वैविध्यादमी धर्मप्रदर्शकाः ॥
रामो धन्वन्तरिर्यज्ञः पृथुः कीर्तिप्रदर्शिनः ।
बलरामो मोहिनी च वामनः श्रीप्रधानकाः ॥

---

(१) 'गर्भोदकशायिनः'—इति 'ग' पुस्तके ।

(२) 'कृष्णस्तु'—इति 'ग' पुस्तके ।

श्रीरत्न सौन्दर्यम् ।

दत्तात्रेयश्च मत्स्यश्च कुमारः कपिलस्तथा ।
ज्ञानप्रदर्शका एते विज्ञातव्या मनीषिभिः ॥
नारायणो नरश्चेति कूर्मश्च ऋषभस्तथा ।
वैराग्यदर्शिनो ज्ञेयास्तत्तत्कर्मानुसारतः ॥
कृष्णः पूर्णषड़ैश्वर्यमाधुर्याणां महोदधिः ।
अन्तर्भूतसमस्तावतारो निखिलशक्तिमान् ॥' इति । (क)

বঙ্গানুবাদ

যদ্যপি ভগবানের সকল অবতারই পূর্ণ, তথাপি শক্তির প্রকাশের তারতম্যানুসারে অংশাংশিভাব সিদ্ধ হয়। তদ্বিষয়ে শ্রীমদ্‌ভাগবতে ভগবান্ শ্রীকৃষ্ণের তারতম্য উক্ত হইয়াছে,—হিরণ্যগর্ভের স্রষ্টা গর্ভোদশায়ী প্রদ্যুম্ননামক দ্বিতীয় পুরুষের অবতারসমূহের মধ্যে কেহ অংশ ও কেহ কলা। কিন্তু কৃষ্ণ হইতেছেন স্বয়ং ভগবান্॥ (ক)

"अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ॥" इति च । (ख)

कान्तिमाला

अष्टमस्त्विति । तयोर्देवकीवसुदेवयोः ॥ (ख)

प्रभा

तु-शब्दः पृथगुपक्रमार्थः । 'तु स्याद्भेदेऽवधारणे' इत्यमरः । गर्भोदशायिप्रद्युम्नादाविर्भवत्सु मत्स्यकूर्मादिषु मध्ये कृष्णः पठितस्तथापि न स तदवतारः, किन्तु स्वयं भगवान् तदादिसर्वमूलभूत इत्यर्थः । अष्टमेति । तयोर्देवकीवसुदेवयोः, अष्टमः पुत्रस्तु स्वयमेव हरिरासीत्, तत्र तु स्वयमेव भगवान्, न तु भगवतः प्रादुर्भूततया, न वा भगवत्ताध्यासेन । तथा चोक्तं ब्रह्मसंहितायां—

'ईश्वरः परमः कृष्णः सच्चिदानन्द ईश्वरः ।
अनादिरादिर्गोविन्दः सर्वकारणकारणः ' ५।१

श्रीभागवते च—

'गोप्यस्तपः किमाचरन् यदमुष्य रूपं
लावण्यसारमसमोर्द्ध्वमनन्यसिद्धम् ।

দৃগ্ভিঃ পিবন্ত্যনুসবাভিনবং দুরাপ-
মেকান্তধাম যশসঃ শ্রিয় ঐশ্বরস্য ॥’ ১০।৪০।১৪ । ইতি ।

তস্মাৎ সর্বদাভিব্যক্তশক্তিকত্বাৎ কৃষ্ণস্যৈব স্বয়ংরূপত্বং সিদ্ধম্ ॥ (খ)

বঙ্গানুবাদ

স্বয়ং শ্রীহরি, দেবকী ও বসুদেবের অষ্টম-পুত্ররূপে আবির্ভূত হইয়াছিলেন ॥ (খ)

অথ শ্রিয়স্তদ্ যথা পুরুষবোধিন্যামথর্বোপনিষদি—

“গোকুলাখ্যে মাথুরমণ্ডলে” ইত্যুপক্রম্য, “দ্বে পার্শ্বে চন্দ্রাবলী রাধিকা চ” ইত্যভিধায় পরত্র, “যস্যা অংশে লক্ষ্মীদুর্গাদিকা শক্তিঃ” ॥ ইতি । (গ)

কান্তিমালা

অথেতি । শ্রিয়স্তৎ তারতম্যম্ । গোকুলাখ্যে ইতি । যস্যাংশিন্যাঃ শ্রীরাধায়াঃ লক্ষ্ম্যাদয়োঽংশা ইত্যর্থো বিস্ফুটঃ । দুর্গাঽত্র মন্ত্ররাজাধিষ্ঠাত্রী, ন তু প্রাকৃতী ॥ (গ)

প্রভা

শ্রিয়া লক্ষ্ম্যাঃ, তৎ তারতম্যং, পুরুষবোধিন্যাং পুরুষস্বরূপপ্রতিপাদিকায়ামথর্বোপনিষদি । চন্দ্রাবলী রাধিকা চ দ্বে পার্শ্বে পার্শ্বস্থানীয়ে । যস্যা অংশিন্যাঃ শ্রীরাধিকায়াঃ অংশে লক্ষ্মীর্বৈকুণ্ঠেশ্বরী রমা, দুর্গা অষ্টাদশাক্ষর-মন্ত্ররাজাধিষ্ঠাত্রী, তদাদিকা শক্তির্বর্ততে, আদিশব্দেনাত্র ভূলীলাদয়ো গ্রাহ্যাঃ ॥ (গ)

বঙ্গানুবাদ

লক্ষ্মীরও তারতম্য অর্থাৎ অংশাংশিভাবসম্বন্ধে পুরুষস্বরূপপ্রতিপাদক অথর্বোপনিষদে উক্ত হইয়াছে যথা,—উপক্রমে গোকুলনামক মথুরামণ্ডলসম্বন্ধে বলিয়া চন্দ্রাবলী ও রাধিকা দুই পার্শ্ব—এইরূপ বলার পর যে শ্রীরাধিকার অংশে লক্ষ্মী, দুর্গা অর্থাৎ অষ্টাদশাক্ষরা মন্ত্ররাজাধিষ্ঠাত্রীপ্রভৃতি শক্তি বিদ্যমান আছেন, এইরূপ বলিয়াছেন ॥ (গ)

গৌতমীয়তন্ত্রে চ—

“দেবী কৃষ্ণময়ী প্রোক্তা রাধিকা পরদেবতা ।
সর্বলক্ষ্মীময়ী সর্বকান্তিঃ সম্মোহিনী পরা ॥” ইতি । (ঘ)

कान्तिमाला

देवीति। राधिका देवी परेत्यन्वयः। अतः कृष्णमयी कृष्णात्मिका, तथापि परदेवता कृष्णार्चिका सर्वलक्ष्मीमयी, पुरुषबोधिनीश्रुतेः, निखिलानां लक्ष्मीणामंशिनी, सर्वासां तासां कान्तिरिच्छा पूज्यत्वाभिलाषो यस्यां सा, सम्मोहिनी कृष्णानुरञ्जिका॥ (घ)

प्रभा

देवीति। राधिका परेत्यन्वयः। देवी देवस्य कृष्णस्य पट्टमहिषी। भेदप्राप्तं निवारयितुमाह—कृष्णमयीति। कृष्णमयी कृष्णाभिन्ना। 'सत्त्वं तत्त्वं परत्वञ्च तत्त्वत्रयमहं किल' इत्यादिवचनात्। एवमपि परदेवता कृष्ण एव। सर्वलक्ष्मीमयी सर्वासां लक्ष्मीणां कान्तावर्गाणाञ्चांशिनी, यस्या अंशे लक्ष्मीदुर्गादिका शक्तिरित्युक्तेः, सर्वकान्तिः सर्वासां तासां कान्तिराभा यस्यां सा, सम्मोहिनी कृष्णानुरञ्जिका। परा परतमा, सर्वांशिनीत्वात्। 'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतेः।

'याऽतीतगोचरा वाचां मनसाञ्चाविशेषणा।
ज्ञानिज्ञानपरिच्छेद्या वन्दे तामीश्वरीं पराम्'॥

इति विष्णुपुराणाच्च। या भगवदभिन्नाऽभिहिता या च ह्लादिनीत्यादिना विशेषिता सा परैव राधिकेश्वरीति सिद्धम्॥ (घ)

বঙ্গানুবাদ

শ্রীরাধিকা পরতমা, তিনি শ্রীকৃষ্ণের পট্টমহিষী, শ্রীকৃষ্ণের সহিত তাঁহার ভেদ নাই। তিনি সমস্ত লক্ষ্মী অর্থাৎ কান্তাবর্গ ও মহিষীবর্গের অংশিনী, তাঁহাতে সমস্ত কান্তি বিদ্যমান। তিনি কৃষ্ণের অনুরঞ্জনকারিণী॥ (ঘ)

अथ नित्यधामत्वम् आदिशब्दात्, यथा छान्दोग्ये—

"स भगवः कस्मिन् प्रतिष्ठितः॥" इति।

"स्वे महिम्नि॥" इति। (ङ)

कान्तिमाला

"नित्यलक्ष्म्यादिमत्त्वा"दित्यत्रादिपदग्राह्यमाह—अथेति। भगवः भगवन् हे सनत्कुमार! स भूमाख्यो हरिरित्यादि प्रश्नः, स्वे महिम्नीति तदुत्तरम्॥ (ङ)

प्रभा

अथेति। 'नित्यलक्ष्म्यादिमत्त्वाच्च कृष्णः परतमो मतः' इत्यत्रादिशब्देन धाम्नोऽपि ग्रहणम्। स इति। नारदः सनत्कुमारमाह—भगवः भगवन्! स भूमा भूमाख्यो हरिः कस्मिन् प्रतिष्ठितः, तस्याधारः क इत्यर्थः। ततः 'स्वे महिम्नि' इति सनत्कुमारस्य प्रतिवचनम्। स्वे महिम्नि स्वस्वरूपे धाम्नि पराख्यशक्तिविजृम्भिते गोलोकादावित्यर्थः। विष्णोर्धाम्नोऽपि नित्यत्वम्॥ (ङ)

বঙ্গানুবাদ

'নিত্যলক্ষ্ম্যাদিমত্ত্বাৎ' এই কারিকায় যে আদিপদ আছে, তাহার দ্বারা ধামেরও গ্রহণ করিতে হইবে। ছান্দোগ্যে উক্ত হইয়াছে,—নারদ সনৎকুমারকে বলিলেন—হে ভগবন্! সেই সর্ব্বব্যাপক হরি কোথায় প্রতিষ্ঠিত? সনৎকুমার প্রত্যুত্তর দিলেন—স্বস্বরূপভূত ধামে অর্থাৎ পরাশক্তিবিলসিত গোলোকাদি ধামে অবস্থান করিতেছেন॥ (ঙ)

"दिव्ये ब्रह्मपुरे(१) ह्येष संव्योम्न्यात्मा(२) प्रतिष्ठितः॥"

(मुण्ड० २।२।७) इति। (च)

कान्तिमाला

दिव्य इति। पुरे विचित्रप्रासादादिशालिनि॥ (च)

प्रभा

दिव्य इति। संव्योम्नि आकाशवत् सर्वगते दिव्येऽलौकिकेऽप्राकृत इति यावत्। ब्रह्मपुरे ब्रह्मणः पुरे भवने, एष आत्मा ब्रह्माख्यो हरिः प्रतिष्ठितः। 'यः सर्वज्ञः सर्वविद् यस्यैव महिमा भुवि' इति श्लोकपूर्वभागः, 'संव्योम्नि' इति पाठो न सार्वत्रिकः॥ (च)

বঙ্গানুবাদ

আকাশের ন্যায় সর্ব্বব্যাপক অপ্রাকৃত ব্রহ্মপুরে এই ব্রহ্মাভিধেয় হরি প্রতিষ্ঠিত আছেন॥ (চ)

---

(१) 'पुरि' इति 'क' 'ख' तथा 'ग' पुस्तके।

(२) 'संव्योम्ना' इति 'ग' पुस्तके।

ऋक्षु च—

"ता (१) वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गा अयासः।
अत्राह तदुरुगायस्य वृष्णः
परमं पदमवभाति भूरि॥" (ऋग्वेदः १।१५४।६) इति। (छ)

कान्तिमाला

तामिति। तां तानि, वां युवयो राधिकाकृष्णयोर्वास्तूनि गृहाणि गमध्यै प्राप्तुम् उश्मसि कामयामहे। यत्र येषु गावो भूरिशृङ्गाः प्रशस्तविषाणाः सन्ति। अयासः शुभावहविधिरूपाः, "अयः शुभावहो विधि"रित्यमरः वाञ्छितदातार इत्यर्थः। अत्रार्थे श्रुतिराह। वृष्णः भक्तेच्छावर्षिणः कृष्णस्य, तत् परमं पदं, भूरि प्रचुरमवभाति, नास्यस्य संख्येत्यर्थः॥ (छ)

प्रभा

ऋक्षु ऋग्वेदमन्त्रेषु च। हे पत्नीयजमानौ वां युष्मदर्थं ता तानि गन्तव्यत्वेन प्रसिद्धानि वास्तूनि सुखनिवासयोग्यानि स्थानानि गमध्यै युवयोर्गमनाय उश्मसि कामयामहे। तदर्थं विष्णुं प्रार्थयाम इत्यर्थः। तानीत्युक्तं कानीत्याह। यत्र येषु वास्तुषु गावो रश्मयो भूरिशृङ्गा अत्यन्तोन्नत्युपेता बहुभिराश्रयणीया वायासोऽयना गन्तारोऽतिविस्तृताः। यद्वा यासो गन्तारः। अताहृशा अत्यन्तप्रकाशयुक्ता इत्यर्थः। अत्राह अत्र खलु वास्त्वाधारभूते द्युलोक उरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य कामानां वर्षितुर्विष्णोस्तत् तादृशं सर्वत्र पुराणादिषु गन्तव्यत्वेन प्रसिद्धं परमं निरतिशयं पदं स्थानं भूर्यति प्रभूतमवभाति। स्वमहिम्ना स्फुरति। अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयनाः। तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्द्धस्थमवभाति भूरि। पादः पद्यतेः। नि० २।७ इति सायनभाष्यम्।

एतन्मते व्याख्यानं प्रदर्श्यते यथा—ता इति। ता तानि वां युवयो

(१) 'तां' इति पाठः आदर्शपुस्तकचतुष्टये। मूलग्रन्थे 'ता' इति पाठो दृश्यते।

राधाकृष्णयोर्वास्तूनि धामानि गमध्यै गन्तुमाप्तुमिति यावत् । वयमुश्मसि कामयामहे । यत्र येषु धामसु गावो भूरिशृङ्गाः प्रशस्तविषाणा विद्यन्ते । अयासः अत्यन्तप्रकाशयुक्ताः । अत्राह—अत्र खलु दिव्ये स्थाने वृष्णो भक्तेच्छा-वर्षिण उरुगायस्य कृष्णस्य परमं पदं भूरि प्रचुरमवभाति प्रकाशते ॥ (छ)

বঙ্গানুবাদ

আমরা রাধা-কৃষ্ণের সেই ধামসমূহ পাইবার নিমিত্ত কামনা করিয়া থাকি। যে ধামসমূহে নিরতিশয়প্রকাশসমন্বিত বিশালশৃঙ্গযুক্ত গোসকল বিদ্যমান আছে। এই দিব্য স্থানে ভক্তগণের ইচ্ছামত ফলবর্ষী কৃষ্ণের পরম পদ অতিশয় প্রকাশ পাইতেছেন॥ (ছ)

श्रीगोपालोपनिषदि च—

"तासां मध्ये साक्षाद् ब्रह्मगोपालपुरी हि ॥" (उत्तर० ३५) इति । (ज)

कान्तिमाला

तासामिति । सप्तानां पुरीणां मध्ये, गोपालस्य पुरी मथुरा, साक्षाद् ब्रह्म, तत्पराख्य-शक्तिरूपत्वेन ताद्रूप्याद् अभिव्यक्तब्रह्मगुणत्वाच्च ॥ (ज)

प्रभा

श्रीगोपालोपनिषदि-श्रीगोपालोत्तरतापनीयोपनिषदीत्यर्थः ।

'अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥' इति स्मरणात्,

तासां काश्यादीनां सप्तानां मोक्षपुरीणां मध्ये साक्षाद् ब्रह्मगोपालपुरी ब्रह्म एव गोपालः कृष्णस्तस्य पुरी मथुरा हि ॥ (ज)

বঙ্গানুবাদ

শ্রীগোপালোত্তরতাপনীয় উপনিষদে উক্ত হইয়াছে যথা,—কাশীপ্রভৃতি সাতটী মোক্ষপুরীর মধ্যে মথুরা হইতেছে ব্রহ্মগোপালপুরী॥ (জ)

जितन्ते स्तोत्रे च—

"लोकं वैकुण्ठनामानं दिव्यषाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥

नित्यसिद्धैः समाकीर्णं तन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥
वापीकूपतड़ागैश्च वृक्षषण्डैः सुमण्डितम् ।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥" इति । (भ)

कान्तिमाला

लोकमित्यादि प्रस्फुटार्थम् । पाञ्चकालिकैरिति । अभिगमनोपादानेज्याध्ययनसमाधयः पञ्चकालास्तत्परायणैरित्यर्थः ॥ (भ)

प्रभा

श्रीनारदपञ्चरात्रे श्रीब्रह्मनारदसंवादे जितंते स्तोत्रे—

'प्रकृष्टसत्त्वशक्तिं त्वां कदा द्रक्ष्यामि चक्षुषा ।
क्रीड़न्तं रमया सार्द्धं लीलाभूमिषु केशवम् ॥' इति

परेणान्वयः । प्रकृष्टसत्त्वशक्तिं सच्चिदानन्दस्वरूपं महापुरुषं रमया स्वरूपशक्त्याख्यया लक्ष्म्या सह लीलाभूमिषु माधुर्यस्थानेषु क्रीड़न्तं केशवं त्वां कदा चक्षुषा द्रक्ष्यामि । लोकमिति । षड् गुणा एव षाड्गुण्यं 'चतुर्वर्ण्यादीनां स्वार्थे' ५।१।१२४ इति वार्तिकोक्त्या ष्यञ् । राज्ञां राज्यरक्षणे षड् उपायाः सन्धि-विग्रह-यानासनद्वैधीभावसमाश्रयाख्याः । दिव्यषाड्गुण्यसंयुतम् अप्राकृतषाड्गुण्यसमेतम् अवैष्णवानां विष्णुभक्तभिन्नानामप्राप्यं, गुणत्रयविवर्जितं सत्त्वादिगुणत्रयरहितं, पाञ्चकालिकैः—अभिगमनोपादानेज्यास्वाध्याययोगाः पञ्चकालाः, तत्र वाक्कायचेतसामवधानपूर्वकं देवतागृहागमनमभिगमनम्, पूजाद्रव्याणामर्जनमुपार्जनम्, इज्या पूजा, स्वाध्यायः—अष्टाक्षरादिमन्त्रजपरूपः, योगः—ध्यानम्, तानाचरद्भिः पाञ्चकालिकैस्तन्मयैः पूर्वोक्ताभिगमनादिपरायणैर्नित्यसिद्धैः शाश्वतसिद्धपुरुषैर्देवयोनिविशेषैर्वा समाकीर्णं समावृतम् । सभाप्रासादसंयुक्तं सभाभिः प्रासादैश्च समेतं, वनैः उपवनैः कृत्रिमैश्च शुभं विराजमानम् । वापीकूपतड़ागैः वृक्षषण्डैस्तरुसमूहैश्च सुमण्डितं शोभनं यथा स्यात् तथा भूषितम् । अप्राकृतसुरैः अप्राकृतैर्नित्यसिद्धैः सुरैर्देवैः वन्द्यं पूज्यम्, अयुतार्कसमप्रभं दशसहस्रसवितृकिरणतुल्यमतीवसमुज्ज्वलमित्यर्थः । अप्रा-

ক্লতমিতি পাঠে মায়াতীতমিত্যর্থঃ। বৈকুণ্ঠনামানং লোকং, প্রাপ্যেত্যধ্যাহার্য্যং, লোকাভিন্নং কেশবং বা, স্বরূপশক্তিবিলাসত্বেন শ্রীভগবত্তদ্ধাম্নোরভেদোক্তেঃ॥ (ঝ)

বঙ্গানুবাদ

শ্রীনারদপঞ্চরাত্রগ্রন্থে শ্রীব্রহ্মনারদসংবাদে "জিতং তে" এইরূপে যে স্তোত্র আরব্ধ হইয়াছে তাহাতে উক্ত হইয়াছে, যথা—অপ্রাকৃতষড়্গুণসমন্বিত, অবৈষ্ণবগণের অপ্রাপ্য, সত্ত্বাদিগুণত্রয়রহিত, অভিগমনাদিপঞ্চকালযুক্ত, অভিগমনাদিপরায়ণ-নিত্যসিদ্ধগণকর্তৃক সমাবৃত, সভা ও প্রাসাদ সংযুক্ত, বন ও উপবনসুশোভিত, জলাশয়, কূপ, তড়াগ ও বৃক্ষসমূহপরিবেষ্টিত, দেবগণেরও বন্দনীয়, অযুতসূর্য্যতুল্যপ্রভাযুক্ত বৈকুণ্ঠ ধাম প্রাপ্ত হইয়া অথবা বৈকুণ্ঠধামের সহিত অভিন্ন সচ্চিদানন্দস্বরূপ, লীলাভূমিতে লক্ষ্মীর সহিত ক্রীড়ায় রত, কেশব তোমাকে কোন্ সময় চক্ষুর দ্বারা দর্শন করিব॥ (ঝ)

ব্রহ্মসংহিতায়াঞ্চ—

"সহস্রপত্রং কমলং গোকুলাখ্যং মহৎপদম্।
তৎকর্ণিকারং তদ্ধাম তদনন্তাংশসম্ভবম্॥" ৫।২ ইতি। (ঞ)

কান্তিমালা

সহস্রেতি। মহতঃ স্বয়ং ভগবতঃ পদং স্থানং, "পদং ব্যবসিতি-ত্রাণ-স্থান-লক্ষ্মাঙ্ঘ্রি-বস্তুষু" ইত্যমরঃ। অনন্তস্য সংকর্ষণস্যাংশেন সম্ভবঃ প্রাকট্যম্ অনাদিতো যস্য তৎ॥ (ঞ)

প্রভা

ব্যাখ্যাতঞ্চৈতচ্ছ্রীমজ্জীবগোস্বামিভিঃ—'অথ তস্য তদ্রূপতাসাধকং নিত্যং ধাম প্রতিপাদয়তি—সহস্রপত্রং কমলমিত্যাদিনা। সহস্রাণি পত্রাণি যত্র তৎ কমলমিত্যাদিনা 'ভূমিশ্চিন্তামণিগণময়ী'তি বক্ষ্যমাণাচ্চিন্তামণিগণময়ং পদ্মং তদ্রূপং, তচ্চ মহৎ সর্ব্বোৎকৃষ্টং পদং স্থানম্। মহতঃ শ্রীকৃষ্ণস্য মহাভগবতো বা পদং মহাবৈকুণ্ঠরূপমিত্যর্থঃ। তত্তু নানাপ্রকারং শ্রূয়ত ইত্যাশঙ্ক্য প্রকারবিশেষত্বেন নিশ্চিনোতি গোকুলাখ্যমিতি। গোকুলমিত্যাখ্যা রূঢ়ির্যস্য তৎ গোপাবাসরূপমিত্যর্থঃ। রূঢ়ির্যোগমপহরতীতি ন্যায়েন তস্যৈব প্রতীতেঃ। এতদভিপ্রেত্যোক্তং শ্রীদশমে—'শ্রীভগবান্ গোকুলেশ্বরঃ' ইতি। অত এব তদনুকূলত্বেনোত্তরগ্রন্থোঽপি ব্যাখ্যেয়ঃ। তস্য শ্রীকৃষ্ণস্য ধাম শ্রীনন্দ-

यशोदादिभिः सह वासयोग्य महान्तःपुरम्, तैः सहवासिता त्वग्रे समुद्दिश्यते। तस्य स्वरूपमाह—तदिति। अनन्तस्य श्रीबलदेवस्यांशेन ज्योतिर्विभाग-विशेषेण सम्भवः सदाविर्भावो यस्य तत्। तथा तन्त्रेणैतदपि बोध्यते। अनन्तोऽंशो यस्य तस्य श्रीबलदेवस्यापि सम्भवो निवासो यत्र तदि'ति॥ (ञ)

বঙ্গানুবাদ

ব্রহ্মসংহিতায়ও উক্ত হইয়াছে গোকুলনামক স্থান সহস্রপত্রপদ্মস্বরূপ, তাহা শ্রীকৃষ্ণের সর্ব্বোৎকৃষ্ট স্থান, তাহার মধ্যস্থিত কর্ণিকাররূপ-ধামই ভগবান্, এই স্থান অনন্ত অর্থাৎ বলদেবের অংশ হইতে সম্ভূত॥ (ঞ)

प्रपञ्चे स्वात्मकं लोकमवतार्य महेश्वरः।
आविर्भवति तत्रेति मतं ब्रह्मादिशब्दतः॥१६
गोविन्दे सच्चिदानन्दे नरदारकता यथा।
अज्ञैर्निरूप्यते तद्वद्धाम्नि प्राकृतता किल॥१७

कान्तिमाला

ननु महिमादिशब्दवाच्यं हरेः पदं प्रकृतिमण्डलाद्बहिः श्रुतं, तन्मण्डलान्तःस्थं मथुरादि तस्य पदमित्येतत् कथम्? तत्राह प्रपञ्च इति। लोकस्य स्वात्मकत्वे हेतुः—ब्रह्मादिशब्दत इति। आदिना महिमसंव्योमशब्दसंग्रहः। एवं तर्हि मथुरादौ प्राकृतत्वं (२) कुतः स्फुरति तत्राह—गोविन्द इति। नरदारकता प्राकृतमनुष्यबालकता॥१६—१७

प्रभा

ननु मथुरायाः प्रपञ्चान्तर्गतत्वे कथं नित्यत्वमित्यत आह—प्रपञ्च इति। महेश्वरो महान् ईश्वरो भगवान् श्रीकृष्णः प्रपञ्चे जगति स्वात्मकं लोकं स्वस्वरूपं धाम स्थानमवतार्याविर्भाव्य तत्र धाम्नि स्वयमाविर्भवति। 'आविर्भावा तिरोभावा स्वपदे तिष्ठति' इति गोपालोत्तरतापनीये। व्याख्यातञ्च श्रीमज्जीवेन। 'या तु कदाचिदाविर्भावा जगत्यवतीर्णा, कदाचित्तिरोभावा ततोऽन्तर्हिता च भवति, सैव स्वपदे गोलोकाख्ये वृन्दावनस्यैव प्रकाशविशेषे निजधाम्नि तिष्ठति। अत्रेयमेव स्वपदे तिष्ठतीत्युक्ते तस्या एव तथा स्फूर्तिः

(२) 'प्राकृतत्वे' इति 'ग' पुस्तके।

पूर्णप्रकाशत्वस्वैत्यर्थः इति विदुषां मतम्। कुत इत्यत आह—ब्रह्मादिशब्दतः। मथुराया ब्रह्मादिशब्देनाऽभेदेनाभिहितत्वात्। यतः—'तासां मध्ये साक्षाद्-ब्रह्मगोपालपुरी हि' इति गोपालोत्तरतापनीयश्रुतौ मथुरा ब्रह्मशब्देनाभिहिता।

'मथ्यते तु जगत् सर्वं ब्रह्मज्ञानेन येन वा।
तत्सारभूतं यद् यस्यां मथुरा सा निगद्यते॥' (७४)

इति श्रुतौ च मथुरापदनिरुक्त्या ब्रह्माभिन्नत्वेन मथुरास्वरूपं प्रदर्शितम्। अतो ब्रह्मणो नित्यत्वात्तदभिन्नस्य धाम्नोऽपि नित्यत्वं वक्तव्यम्, तथा सति तस्योत्पत्तिस्तु वक्तुं न शक्यते, अपि त्वाविर्भावः। तर्हि मथुरायाः प्राकृतत्वं कथमिति चेत्? भ्रान्त्या इत्युत्तरं ब्रूमः। यथाऽज्ञैस्तत्त्वज्ञानहीनैः पुरुषैः सच्चिदानन्दे गोविन्दे नरदारकता प्राकृतमनुष्यबालकता निरूप्यते, तद्वद् धाम्नि तत्स्थाने प्राकृतता, किल अलीके॥ १६—१७

বঙ্গানুবাদ

ভগবান্ শ্রীকৃষ্ণ প্রপঞ্চে নিজস্বরূপভূত স্থানের প্রকাশ করিয়া তাহাতে স্বয়ং আবির্ভূত হইয়া থাকেন, ইহা তত্ত্ববিদ্‌গণের সম্মত। কারণ গোপালোত্তর-তাপনীয় উপনিষদে ব্রহ্মশব্দের দ্বারা অভেদে মথুরাপুরী উক্ত হইয়াছে। যেমন অজ্ঞ মনুষ্যেরা সচ্চিদানন্দস্বরূপ গোবিন্দকে সাধারণ মনুষ্যবালক বলিয়া নিশ্চয় করে, সেইরূপ তাঁহার ধামকেও প্রাকৃত বলিয়া থাকে॥ ১৬—১৭

अथ नित्यलीलत्वम्।

तथाहि श्रुतिः—

"यद्भूतं (१) भवच्च भविष्यच्च॥" (बृह० ३।८।३) इति। (क)

कान्तिमाला

अथेति। यदिति बृहदारण्यके। यद्भूतं ब्रह्मनिष्ठं गुणकर्म नित्यं, गत-भवद्-भविष्यच्छब्दैस्तस्य त्रैकालिकत्वप्रत्ययात्॥ (क)

---

(१) 'यद् भूतं,' इति मूलपुस्तके।

प्रभा

यदिति। यद् ब्रह्म गतं भूतं, भवद् वर्तमानं च, भविष्यच्च। कालत्रयेऽपि विद्यमानमित्यर्थः॥ (क)

বঙ্গানুবাদ

যিনি অতীত, বর্ত্তমান ও ভবিষ্যতে বিদ্যমান॥ (ক)

"एको देवो नित्यलीलानुरक्तो
भक्तव्यापी भक्तहृद्यन्तरात्मा॥" (ख)

कान्तिमाला

एको देव इति पिप्पलादशाखायाम्। अत्र लीलायाः नित्यत्वं (१) वाचनिकम्॥ (ख)

प्रभा

एकोऽद्वितीयो देवो हरिर्नित्यलीलानुरक्तः। नित्यलीला नाम नित्यधाम्नो नित्यक्रिया। सा च द्विविधा प्रकटाऽप्रकटभेदेन। अस्या विवृतिः श्रीकृष्णसन्दर्भे द्रष्टव्या। भक्तान् व्याप्नोतीति भक्तव्यापी। भक्तानां हृदयाख्यां परमांशिस्वरूपपरमात्मा॥ (ख)

বঙ্গানুবাদ

অদ্বিতীয় দেবতা নিত্য লীলাতে অনুরক্ত, যিনি ভক্তসমূহকে ব্যাপিয়া আছেন এবং যিনি ভক্তগণের হৃদয়ের অন্তরাত্মস্বরূপ॥ (খ)

स्मृतिश्च—

"जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥" ४।९ इति। (ग)

कान्तिमाला

जन्मेति। श्रीगीतासु। दिव्यमप्राकृतं नित्यमिति यावत्॥ (ग)

प्रभा

व्याख्यातञ्चैतद् ग्रन्थकृता—जन्मेति। मम सर्वेश्वरस्य सत्येच्छस्य वैदुर्यवन्नित्यसिद्धनृसिंहरघुनाथादिबहुरूपस्य तत्र तत्रोक्तलक्षणं जन्म तथा कर्म च

(१) 'लीलानित्यत्वम्' इति 'ग' पुस्तके।

तत्तद्भक्तसम्बन्धं चरितं तदुभयं दिव्यमप्राकृतं नित्यं भवतीत्येवमेवैतदिति यस्तत्त्वतो वेत्ति 'यद्‌ गतं भवच्च भविष्यच्च', 'एको देवो नित्यलीलानुरक्तो भक्तव्यापी भक्तहृद्यन्तराले'ति श्रुत्या दिव्यमिति मदुक्त्या च दृढ़श्रद्धो युक्तिनिरपेक्षः सन् हे अर्जुन! स वर्तमानं देहं त्यक्त्वा पुनः प्रापञ्चिकं जन्म नैति। किन्तु मामेव तत्तत्कर्ममनोज्ञमेति मुक्तो भवतीत्यर्थः। यद्वा मोचकत्वलिङ्गेन तत्त्वमसीति श्रुतेश्च मे जन्मकर्मणी तत्त्वतो ब्रह्मत्वेन यो वेत्तीति व्याख्येयम्। अन्यथा 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय' इति श्रुतिर्व्याकुप्येत्। समानमन्यत्। जन्मादिनित्यतायां युक्तयस्त्वन्यत्र विस्तृता द्रष्टव्याः॥ (ग)

বঙ্গানুবাদ

হে অর্জ্জুন! যিনি আমার দিব্য জন্ম ও কর্ম্ম যথার্থভাবে অবগত আছেন, তিনি এই দেহ ত্যাগ করিয়া আর জন্ম গ্রহণ করেন না, আমাকেই প্রাপ্ত হইয়া থাকেন॥ (গ)

रूपानन्त्याज्जनानन्त्याद्धामानन्त्याच्च कर्म तत्।
नित्यं स्यात्तदभेदाच्चेत्युदितं तत्त्ववित्तमैः॥१८

इति प्रमेयरत्नावल्यां भगवत्-पारतम्यप्रकरणं नाम प्रथमप्रमेयम्॥ १

कान्तिमाला

ननु लीलाया नित्यत्वं शब्दात् प्रतीतं, युक्तिविरहात्खपुष्पमिति चेत्तत्राह—रूपानन्त्यादिति। अत्राहुः—लीलायाः क्रियात्वात् प्रत्यवयवमप्यारम्भसमाप्तिभ्यां तस्याः सिद्धिर्वाच्या, ताभ्यां विना न तस्याः स्वरूपं सिध्येत्। तथा चारम्भसमाप्तिमत्तया विनाशित्वध्रौव्यात् कथं सा नित्येति चेत्? उच्यते। परात्मनः (२) सदैवाकारानन्त्यात् पार्षदानन्त्यात् स्थानानन्त्याच्च नानित्यत्वं तस्याः, तत्तदाकारगतयोस्तत्तदारम्भसमाप्त्योः सत्त्वेऽप्येकत्रैकत्र तत्तत्क्रियावयवा यावत् समाप्यन्ते न समाप्यन्ते वा, तावदेवान्यत्रान्यत्राप्यारब्धाः स्युरित्येवमविच्छेदान्नित्यत्वं सिद्धम्। ननु मास्तु विच्छेदः, पृथगारम्भादन्यैव सेति चेत्? उच्यते। समयभेदेनाभ्युदितानामप्येकरूपाणां क्रियाणामैक्यम्। यथा चोक्तं 'द्विःपाकोऽनेन कृतो न तु द्वौ पाका'विति, 'द्विर्गोशब्दोऽयमुच्चा-

(२) 'परमात्मनः' इति 'ग' तथा 'घ' पुस्तके।

रितो न तु द्वौ गोशब्दा'विति प्रतीतिनिर्णीतशब्दैक्यवदिदं द्रष्टव्यम्। तदेतदाह—तदभेदाच्चेति। तेषां रूपादीनां चतुर्णां भेदविरहादित्यर्थः ॥१८

इति प्रमेयरत्नावल्यां भगवत्पारतम्यप्रकरणं व्याख्यातम् ॥१

प्रभा

ननु सन्तु भगवति विचित्रा लीलास्तत्तद्देशादिसम्बन्धा नित्यास्तु ता न स्युरारम्भपरिसमाप्तिभ्यामिति तार्किकाः प्रत्यवतिष्ठन्ते, तत्र समादधति—रूपेति। रूपानन्त्याद् भगवति सदैवाकारानन्तत्वात्। भगवदाकारानन्त्यञ्चोक्तं श्रीगोपालपूर्वतापनीयोपनिषदि—'एकोऽपि सन् बहुधा यो विभाति' इति। 'एकाऽनेकस्वरूपाय' १।२।३ इति विष्णुपुराणात्, 'बहुमूर्त्येकमूर्तिकम्' १०।४०।७ इति श्रीभागवतवचनाच्च। जनानन्त्यात् जनानामनन्तब्रह्माण्डानन्तवैकुण्ठगतानां तत्तत्पार्षदानां व्यक्तिप्रकाशानन्त्यात्। धामानन्त्यात्—तत्तल्लीलास्थानानामानन्त्याच्च तत्कर्म लीलारूपं नित्यं स्यात्। एवमेवोक्तं श्रीभगवत्सन्दर्भे श्रीमज्जीवगोस्वामिपादैः—'ननु कथं जन्मकर्मणोर्नित्यत्वं ते हि क्रिये, क्रियात्वञ्च प्रतिनिजांशमप्यारम्भपरिसमाप्तिभ्यामेव सिध्यतीति ते विना स्वरूपहान्यापत्तिः। नैष दोषः, श्रीभगवति सदैवाकारानन्त्यात् प्रकाशानन्त्याज्जन्मकर्मलक्षणतत्तल्लीलापरिकराणां व्यक्तिप्रकाशयोरानन्त्याच्च, यत एवं सत्योरपि तत्तदाकारप्रकाशगतयोस्तदारम्भसमाप्त्योरेकत्रैकत्र ते जन्मकर्मणोरंशा यावत् समाप्यन्ते न समाप्यन्ते वा तावदेवान्यत्रान्यत्राप्यारब्धा भवन्तीत्येव' श्रीभगवति विच्छेदाभावात्, नित्ये एव ते जन्मकर्मणी वर्तेते। तत्र ते क्वचित् किञ्चिद्विलक्षणत्वेनारभ्येते, ते क्वचिदैक्यरूप्येण चेति ज्ञेयम्। विशेषणभेदाद् विशेषणैक्याच्च एक एवाकारः प्रकाशभेदेन पृथक्क्रियास्पदं भवतीति 'चित्रं बतैतदेकेन वपुषा युगपत् पृथक्' इत्यादौ प्रतिपादितम्। ततः क्रियाभेदात् तत्तत्क्रियात्मकेषु प्रकाशभेदेष्वभिमानभेदश्च गम्यते। तथा सत्येकत्रैकत्र लीलाक्रमजनितरसोद्बोधश्च जायते। नन्वस्त्वविच्छेदः, कथं सा वर्तत इत्युच्यते पृथगारम्भादिवैरसेति चेत्? उच्यते—यथा शाङ्करशारीरके—'कालभेदेनोदितानामपि समानरूपाणां क्रियाणामेकरूपत्वमिति। द्विर्गोशब्दोऽयमुच्चारितो न तु द्वौ गोशब्दाविति प्रतीतिनिर्णीतं शब्दैकत्वमिति। ततो जन्मकर्मणोर्नित्यता युक्ता। अत एवागमादावपि भूतपूर्वं लीलोपासन-

विधानं युक्तं, तथा चोक्तं मध्वभाष्ये—'परमात्मसम्बन्धित्वेन नित्यत्वात् त्रिविक्रमत्वादिष्वप्युपसंहार्य्यत्वं युज्यत इति । अनुमतञ्चैतच्छ्रुत्या 'यद्भूतं भवच्च भविष्यच्च' इति ।' अत्रोपसंहार्य्यत्वं नामोपासनायामुपादेयत्वमित्यर्थः । तत्र तस्य जन्मनः प्राकृतात्तस्माद्विलक्षणत्वं प्राकृतजन्मानुकरणेनाविर्भावमात्रत्वं, क्वचित्तदननुकरणेन वा । 'अजायमानो बहुधा विजायत' इति श्रुतिः ।

'देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ।
आविरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः ॥' १०।३।८ इति ।
'सत्यं विधातु' निजभृत्यभाषितं
व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः ।
अदृश्यताऽत्यद्भुतरूपमुद्वहन्
स्तम्भे सभायां न मृगं न मानुषम् ॥' इति श्रीभागवतवचनाभ्याञ्च ।

तथा कर्मणो वैलक्षण्यं स्वरूपानन्दविलासमात्रत्वं, तद् यथा 'लोकवत्तु लीलाकैवल्यम्' । २।१।३३ इति । व्याख्यातञ्च मध्वाचार्य्यैः—'यथा लोके मत्तस्य सुखोद्रेकादेव नृत्यादिलीला, न तु प्रयोजनापेक्षया एवमेवेश्वरस्य ।

नारायणसंहितायाञ्च—

'सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्ष्य तु ।
कुरुते केवलानन्दाद् यथा मत्तस्य नर्त्तनम् ॥
पूर्णानन्दस्य तस्येह प्रयोजनमतिः कुतः ।
मुक्ता अप्याप्तकामाः स्युः किमुतास्याखिलात्मनः ॥' इति ।

न चोन्मत्तदृष्टान्तेनासर्वज्ञत्वमपि प्रसञ्जयितव्यं, स्वरूपानन्दोद्रेकेण स्वप्रयोजनमननुसन्धायैव लीलायते, इत्येतदंशेनैव स्वीकारात् । उच्छ्वासप्रश्वासदृष्टान्तेऽपि सुषुप्त्यादौ तद्दोषापातात् । तस्मात् स्वरूपानन्दस्वाभाविक्येव तल्लीला, तदभेदादिति । तदभेदात् तेषां स्वरूपशक्तिविलसितानां रूपादीनां शक्तित्वेन परस्परमभेदादिति तत्त्ववित्तमैर्ब्रह्मनारदादिभिरुदितम् ॥ १८

বঙ্গানুবাদ

শ্রীভগবানের আকারের অনন্তত্বহেতু, লীলাস্থানস্থিত পার্ষদগণের আনন্ত্যহেতু, লীলাস্থানের অনন্তত্বহেতু এবং রূপাদির পরস্পর অভিন্নতানিবন্ধন শ্রীভগবল্লীলারূপ কর্ম্ম নিত্য, ইহা ব্রহ্ম-নারদাদি তত্ত্বদর্শিগণ বলিয়াছেন ॥ ১৮

द्वितीयप्रमेयम्

अखिलाम्नायवेद्यत्वप्रकरणम्।

अथाखिलाम्नायवेद्यत्वं, यथा श्रीगोपालोपनिषदि—

"योऽसौ सर्वैर्वेदैर्गीयते॥" (उत्तरतापनीय २७) इति। (क)

कान्तिमाला

सर्ववेदबोध्यत्वं हरेर्वक्तुमाह—अथेति। योऽसाविति। यः श्रीगोपालः कृष्णः॥ (क)

प्रभा

य इति। योऽसौ भगवान् श्रीकृष्णाख्यं परब्रह्म सर्वैर्मन्त्रब्राह्मणात्मकैर्वेदैर्गीयते साक्षात् परम्परया प्रतिपाद्यते। 'योऽसौ सर्वैर्वेदैर्गीयते' इत्यपि पाठः क्वचिद् दृश्यते॥ (क)

বঙ্গানুবাদ

শ্রীগোপালতাপনীয়োপনিষদে উক্ত হইয়াছে—সমস্ত বেদ সাক্ষাৎ অথবা পরম্পরায় পরব্রহ্মস্বরূপ ভগবান্ শ্রীকৃষ্ণকে প্রতিপাদন করিয়া থাকে॥ (ক)

काठके च—

"सर्वे वेदा यत् पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति॥" १।२।१५ इति। (ख)

कान्तिमाला

सर्वे इति। यत्पदं यद् ब्रह्माख्यं वस्तु, 'पदं व्यवसितित्राणे'त्याद्युक्तेः॥ (ख)

प्रभा

सर्वे इति। सर्वे वेदा ऋगादयः, यत्पदं यस्य स्वरूपम् आमनन्ति मुख्यया वृत्त्या बोधयन्ति। यत्प्रीत्यर्थं सर्वाणि च तपांसि कर्माणि वदन्ति सर्वेषां तपसां फलं तदेव ब्रह्मेत्यर्थः। 'यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत् ते पदं संग्रहेण ब्रवीम्योमित्येतत्' इत्यपरोऽंशः॥ (ख)

বঙ্গানুবাদ

কঠোপনিষদে কথিত হইয়াছে—সমস্ত বেদ মুখ্যভাবে যাঁহার স্বরূপ প্রতিপাদন করে, যাঁহার প্রীতির নিমিত্ত সমস্ত কর্ম্ম—এই কথা পণ্ডিতেরা বলিয়া থাকেন॥ (খ)

श्रीहरिवंशे च—

"वेदे रामायणे चैव पुराणे भारते (१) तथा।

आदावन्ते च मध्ये च हरिः सर्व्वत्र गीयते॥" इति। (ग)

कान्तिमाला

वेदे रामायणे इति स्फुटार्थम् (२)॥ (ग)

प्रभा।

वेद इति। वेदे सर्व्वेषु वेदेषु रामायणे पुराणे सर्व्वेषु पुराणेषु तथा भारते महाभारते, उपलक्षणञ्चैतत् सर्व्वेषु शास्त्रेष्वित्यर्थः। आदौ उपक्रमे, अन्ते उपसंहारे, मध्ये च सर्व्वत्र हरिः गीयते, सर्व्वेषां शास्त्राणां प्रतिपाद्यो हरिरेव। एवमेवोक्तं श्रीमज्जीवगोस्वामिपादैः—'तदेतत् सर्व्वशास्त्राणां समन्वयस्तस्मिन्नेव भगवति। तथा च—सर्व्वैश्च वेदैः परमो हि देवो जिज्ञास्यो नान्यो वेदैः प्रसिध्येत्। तस्मादेनं सर्व्ववेदानधीत्य विचार्य्य च ज्ञातुमिच्छेन्मुमुक्षु'रिति चतुर्व्वेदशाखायाम्। 'यं सर्व्वदेवा आनमन्ति मुमुक्षवो ब्रह्मवादिनश्चे'ति श्रीनृसिंहतापन्याम्। सर्व्वे वेदा यत् पदमामनन्ति तपांसि सर्व्वाणि च यद्वदन्ति', 'नावेदविन्मनुते तं बृहन्तं', 'सर्व्वानुभूतमात्मानं साम्पराये', 'तं त्वौपनिषदं पुरुषं पृच्छामी'त्यादिरन्यत्र। 'वेदैश्च सर्व्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाह'मिति श्रीगीतोपनिषत्सु। सिद्धान्ते पुन'रेक एव भगवान् विष्णुः समस्तागमव्यापारेषु विवेचनव्यतिकरं नीतेषु निश्चीयते' इति पाद्मे, 'सर्व्वनामाभिधेयश्च सर्व्ववेदेड़ितश्च सः' इति स्कान्दे। 'न ताः स्म सर्व्वजगतां वचसां प्रतिष्ठा यत्र शाश्वती'ति वैष्णवे।

---

(१) 'भागवते' इति 'ग' पुस्तके।

(२) 'स्फुटार्थः' इति 'घ' पुस्तके।

'सर्ववेदान् सेतिहासान् सपुराणान् सयुक्तिकान्।
सपञ्चरात्रान् विज्ञाय विष्णुर्ज्ञेयो न चान्यथा ॥' इति ब्रह्मतर्के।
तदेवं सर्ववेदसमन्वयं स्वस्मिन् श्रीभगवत्येव स्वयमाह—मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् (भा० ११।२१।४३) इति। मामेव यज्ञपुरुषं विधत्ते श्रुतिः, मामेव तत्तद्देवतारूपमभिधत्ते। यच्चाकाशादिप्रपञ्चजातं 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादिना विकल्प्यापोह्यते तदप्यहमेव न मत्तः पृथगस्ति सर्वस्य मदात्मकत्वादिति भावः' ॥ (ग)

বঙ্গানুবাদ

সমস্ত বেদ, রামায়ণ, পুরাণ, মহাভারত এমন কি সমস্ত শাস্ত্রে উপক্রম, উপসংহার ও মধ্যে সর্ব্বত্র ভগবান্ শ্রীহরিই প্রতিপাদিত হইয়া থাকেন ॥ (গ)

साक्षात्-परम्पराभ्यां वेदा गायन्ति माधवं सर्वे।
वेदान्ताः किल साक्षादपरे तेभ्यः परम्परया ॥ १

कान्तिमाला

(१) ननु वेदेषु कर्मप्रतिपादनं भूरि दृष्टं, कथमुक्तोदाहरणानि संगच्छेरन् इति चेत्? तत्राह—साक्षादिति। वेदान्ताः साक्षान्माधवं गायन्ति, तेभ्योऽपरे वेदाः कर्मकाण्डानि तु परम्परया, तज्ज्ञानाङ्गहृद्विशुद्धिकरकर्मविधानपरीपाट्येति(१) सर्ववेदवेद्यत्वं हरेः सूपपन्नम् ॥१

प्रभा

साक्षादिति। सर्वे वेदाः साक्षात् परम्परया च माधवं श्रीहरिं गायन्ति प्रतिपादयन्ति। तेभ्यस्तेषु वाक्येषु मध्ये वेदान्ता उपनिषद्भागाः साक्षात् प्रत्यक्षेण श्रीहरिं प्रतिपादयन्ति, किल निश्चये। अपरे कर्मकाण्डात्मका वेदाः परम्परया चित्तशुद्धिद्वारा। सर्वेषां वेदानां साक्षात् परम्परया च प्रतिपाद्यः श्रीहरिरेव ॥ १

বঙ্গানুবাদ

সমস্ত বেদ সাক্ষাৎ বা পরম্পরায় ভগবান্ শ্রীহরিকে প্রতিপাদন করিয়া থাকে। তন্মধ্যে বেদান্ত সাক্ষাৎ শ্রীহরিকে প্রতিপাদন করে, এবং কর্ম্মকাণ্ডরূপ

(१) 'तत्त्वज्ञानाङ्गहृदयशुद्धिकरधर्म-इति 'ग' पुस्तके।

বেদভাগ চিত্তশুদ্ধিদ্বারা পরম্পরাক্রমে ভগবান্ শ্রীহরিকে প্রতিপাদন করিয়া থাকে ॥ ১

क्वचित् क्वचिदवाच्यत्वं यद्वेदेषु विलोक्यते।
कार्त्स्न्येन वाच्यं न भवेदिति स्यात्तत्र सङ्गतिः।
अन्यथा तु तदारम्भो व्यर्थः स्यादिति मे मतिः ॥२

कान्तिमाला

ननु 'यतो वाचो निवर्तन्ते' (तैत्तिरीय० २।४।१, २।९।१) इत्यादौ हरेर्वेदावाच्यत्वं दृष्टं, तत्र का गतिरिति चेत्तत्राह—क्वचिदिति। दृष्टोऽपि मेरुः कार्त्स्न्येनादर्शनाददृष्टो यथोच्यते तद्वत्। अन्यथा सर्वथा तदवाच्यत्वे तज्ज्ञानाय वेदाध्ययनारम्भो निरर्थकः स्यात् ॥२

प्रभा

क्वचिदिति। ननु यदि सर्वेषां वेदानां प्रतिपाद्यो हरिरेव तर्हि 'यतो वाचो निवर्तन्ते' इत्यादीनां श्रुतीनाम् अप्रामाण्यं प्रसज्येतेत्यत आह—क्वचिदिति। वेदेषु क्वचित् कस्मिंश्चित् स्थले यद् ब्रह्मणोऽवाच्यत्वं वागविषयत्वं विलोक्यते तेषां वेदवाक्यानामेतदेव तात्पर्यं यत् कार्त्स्न्येन कृत्स्नतया सम्पूर्णतयेत्यर्थः, तद् ब्रह्म वाच्यं न भवेदिति तत्र वेदवाक्ये सङ्गतिः। अन्यथा यदि सर्वथा ब्रह्मणो वागविषयत्वमुच्यते तर्हि तु तदारम्भः ब्रह्मज्ञानाय वेदपाठारम्भो व्यर्थः स्यादिति मे मतिः। अतो हरेर्वेदवाच्यत्वं वक्तव्यं, न लङ्घ्यत्वम्। तदुक्तं ग्रन्थकृता भाष्यपीठके चतुर्थपादे—'ननु विष्णुरेव तद्वाच्यत्वे तु 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह।' 'यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। यत् श्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' इत्यादिश्रुतेः।

'यतोऽप्राप्य निवर्तन्ते वाचश्च मनसा सह।
अहं चान्ये इमे देवास्तस्मै भगवते नमः॥'

इत्यादि स्मृतेश्च का गतिरिति चेत्? न, साकल्यावाच्यतया तद्गतेर्दर्शयिष्यमानत्वात्। सर्वज्ञादयः शब्दाः सार्वज्ञ्यादिना निमित्तेन भगवति प्रवर्तन्ते, निर्गुणादयस्तु नैर्गुण्यादिनेति कृत्स्नस्य वेदस्य भगवत्परत्वम्। इत्यञ्च सर्व

বেদা যৎপদমামনন্তীত্যাদিশ্রুতিস্মৃত্যবিরোধঃ। তদিদং শুদ্ধস্য পূর্ণস্য বিষ্ণোর্বেদবাচ্যত্বং ভগবতা সূত্রকারেণোক্তম্ 'ঈক্ষতের্নাশব্দম্' ইত্যস্মিন্নধিকরণে। বেদেষু বাচ্যত্বদর্শনাদশব্দং ব্রহ্ম ন ভবতি, কিন্তু শব্দবাচ্যমেব ভবতীতি ভাষিতঞ্চ। যত্ত্বশব্দমিতি প্রধানং ব্যপষ্ট, তন্ন। তস্যা'প্যজামেকামি'ত্যাদিশব্দবাচ্যত্বাৎ। কিঞ্চ জ্ঞানকাণ্ডং সাক্ষাদেব ব্রহ্ম প্রাহ। 'তন্ত্বৌপনিষদং পুরুষং পৃচ্ছামী'তি শ্রুতেঃ। কর্মকাণ্ডন্তু জ্ঞানাঙ্গপ্রতিপাদনাৎ পরম্পরয়েতি। 'তমেতং বেদানুবচনেন ব্রাহ্মণা বিবিদিষন্তি যজ্ঞেন দানেন তপসাঽনাশকেনে'তি শ্রুতেঃ।

'যতঃ প্রবৃত্তির্ভূতানাং যেন সর্বমিদং ততম্।
স্বকর্মণা তমভ্যর্চ্য সিদ্ধিং বিন্দতি মানবঃ॥' ইতি স্মৃতেশ্চ।

ননু বৃষ্টিপুত্রস্বর্গাদিফলকানি কর্মাণি বিদধানোঽসৌ প্রতীয়তে, মৈবং, তথা তদ্বিধানস্য প্ররোচনাজনকত্বাৎ কারীর্যাদিফলস্য বৃষ্ট্যাদের্দৃষ্টত্বেন বেদে সশ্রদ্ধস্য তদভিরুচ্যা তদর্থং সম্যগ্ বিচারয়তো 'যো বা এতদক্ষরমবিদিত্বা গার্গ্যস্মাল্লোকাৎ প্রৈতি স কৃপণঃ' ইত্যব্রহ্মজ্ঞস্য দৈন্যং 'তমেতং বেদানুবচনেনে'ত্যাদিনা কর্মণাং তজ্জ্ঞানাজনকতাঞ্চ বিজানতো নিষ্কামানি তান্যনুতিষ্ঠতো ব্রহ্মধিষণামসৌ জনয়তীতি সিদ্ধং তস্য সর্বস্য তৎপরত্বম্। যদুক্তং—

'পরোক্ষবাদো বেদোঽয়ং বালানামনুশাসনম্।
কর্মমোক্ষায় কর্মাণি বিধত্তে হ্যগদং যথা॥' (ভা০ ১১।৩।৪৪)।
'বেদোক্তমেব কুর্বাণো নিঃসঙ্গোঽর্পিতমীশ্বরে।
নৈষ্কর্ম্যং লভতে সিদ্ধিং রোচনার্থা ফলশ্রুতিঃ॥' (ভা০ ১১।৩।৪৬) ইতি

কামিতস্যৈব স্বর্গাদেঃ ফলত্বেন প্রতীতেরকামিতোঽসৌ ন ভবেৎ, কিন্তু চিত্তশুদ্ধিরেব জ্ঞানোদয়ার্থা ভবেদি'তি॥ ২

বঙ্গানুবাদ

বেদের কোন কোন স্থলে দৃষ্ট হয়—ব্রহ্ম অবাচ্য অর্থাৎ শব্দের অবিষয়। কিন্তু সেই বেদবাক্যের তাৎপর্য্য এই যে, বেদ সম্পূর্ণরূপে ব্রহ্মকে বর্ণনা করিতে পারে না। যদি এইরূপে বেদবাক্যের সঙ্গতি না করিয়া সম্পূর্ণরূপে ব্রহ্ম শব্দের বিষয় নহে—ইহা বলা যায়, তাহা হইলে ব্রহ্মজ্ঞানের নিমিত্ত বেদাধ্যয়ন ব্যর্থ হয়, ইহা আমি মনে করি॥ ২

शब्दप्रवृत्तिहेतूनां जात्यादीनामभावतः ।
ब्रह्म निर्धर्मकं वाच्यं नैवेत्याहुर्विपश्चितः ॥ ३
सर्वैः शब्दैरवाच्ये तु लक्षणा न भवेदतः ।
लक्ष्यञ्च न भवेद् धर्महीनं ब्रह्मेति मे मतम् ॥ ४

इति प्रमेयरत्नावल्यां द्वितीयप्रमेयम् ॥२

कान्तिमाला

शब्देति। निर्विशेषब्रह्मवादिनान्तु ब्रह्मणि जातिगुणक्रियासंज्ञानामभावात्तद्वाचिभिर्वेदशब्दैर्न तद्वाच्यम् ॥ ३

न च (१) लक्षणया वेदशब्दानां तत्र प्रवृत्तेर्न तदारम्भो व्यर्थः इति चेत्? तत्राह—सर्वैरिति। सर्वशब्दावाच्यं ब्रह्म त्वया स्वीकृतम्। तत्र लक्षणा न सम्भवेत्, 'सोऽयं देवदत्तः' इत्यत्र पिण्डशब्दवाच्ये पिण्डे भागलक्षणा दृष्टा ॥४

इति प्रमेयरत्नावल्यां हरेर्वेदवेद्यत्वप्रकरणं व्याख्यातम् ॥ २

प्रभा

शब्देति। 'शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः। चातुर्विध्यादमीषान्तु शब्द उक्तश्चतुर्विधः ॥' इति वचनाद् यत् किञ्चित् शब्दप्रतिपाद्यं तदेतदन्यतमं स्यात्, ब्रह्मणि तु तदभावान्न तच्छब्दप्रतिपाद्यमिति निर्विशेषब्रह्मवादिनां शङ्करभगवत्पूज्यपादानां मतमाह—शब्देति। शब्दप्रवृत्तिहेतूनां शब्दव्यापारकारणभूतानां जात्यादीनां जातिगुणक्रियाद्रव्याणामभावतोऽभावेन निर्धर्मकं धर्मरहितं ब्रह्म वाच्यं शब्दप्रतिपाद्यं नैव भवेत्, इति विपश्चितः पण्डिता आहुः। आहुरित्यनेन परमतं प्रदर्श्य स्वमतमाह—सर्वैरिति। सर्वैः शब्दैरवाच्ये सर्वशब्दाविषयीभूते वस्तुनि यतो लक्षणा न भवेदतो धर्महीनं ब्रह्म लक्ष्यं लक्षणाविषयीभूतं न भवेदिति मे मतम्। इदमत्राकूतं—यस्य हि वाच्यत्वमस्ति तस्य कुत्रचित् तात्पर्यानुपपत्तितो लक्षणा भवेत्, सर्वथा शब्दाविषयीभूते वस्तुनि वाच्यत्वाभावाल्लक्ष्यत्वमपि न सम्भवति। ब्रह्म

---

(१) 'ननु' इति पाठ. 'घ' पुस्तके।

चेच्छब्दवाच्यं न भवेल्लक्ष्यं कथमपि भवितुं नार्हतीति बोद्धव्यम्। तदुक्तं ग्रन्थकृता पीठकभाष्ये प्रथमपादे—

‘न च विज्ञानत्वादिधर्मविशिष्टाभिधायिभिर्विज्ञानादिशब्दैर्विशिष्टमभिधेयं शुद्धमखण्डन्तु लक्ष्यमिति वाच्यम्। सर्वशब्दानभिधेयस्य तस्य लक्ष्यत्वायोगात्। तथापि ‘तत्त्वमसी’त्यत्र शोधितात् पदार्थाद् वाक्यार्थस्यैक्यस्य भेदो भेदाभेदो वा तव नाभिमतः। तथा सत्यैक्यस्य मिथ्यात्वाद्यापत्तेः। तत्र चेद्विशेषो न स्यात् तर्हि कथं स्वप्रकाशचित्प्रकाशेऽप्यैक्यस्याप्रकाशः, चित्प्रकाशस्य भेदभ्रमविरोधित्वेऽपि तदभिन्नैकप्रकाशस्य तद्विरोधश्चेति। तस्मादवश्यमभ्युपेयो विशेषः’॥

‘सत्यपि चित्प्रकाशे भेदभ्रमो न निवर्तते, अतः स न विरोधी, ऐक्यप्रकाशे जाते भेदभ्रमो विनिवर्तते, अतः स तद्विरोधीति निर्भेदेऽपि तत्त्वे भेदकार्यं वदतस्ते विशेषो गले निपतित इति भावः। तस्मादिति। नाप्यनुमेय एव विशेषः।

‘अव्यक्तबुद्ध्यहङ्कारमनोभूतेन्द्रियाणि च।
तन्मात्राणि विशेषश्च तस्मै तत्त्वात्मने नमः॥’ इति

भीष्मस्तवराजवचनेनापि सिद्धेः’॥ ३-४

বঙ্গানুবাদ

জাতি, গুণ, ক্রিয়া ও দ্রব্য এই চারিটী শব্দপ্রবৃত্তির কারণ অর্থাৎ যেটী শব্দজ্ঞানের বিষয় হইবে, তাহা এই চারিটীর অন্যতম হওয়া চাই। কিন্তু ব্রহ্মে কোন ধর্ম্ম না থাকায় ব্রহ্ম শব্দশক্তির বিষয় নহেন, ইহা পণ্ডিতগণ বলিয়া থাকেন। ব্রহ্ম সকল শব্দের অবাচ্য, অতএব লক্ষ্য হইতে পারেন না। কারণ ধর্ম্মহীন ব্রহ্ম লক্ষ্য হইতে পারেন না, ইহাই আমার অভিমত॥ ৩—৪

तृतीयप्रमेयम्

विश्वसत्यत्वप्रकरणम् ।

अथ विश्वसत्यत्वम् ।

स्वशक्त्या सृष्टवान् विष्णुर्यथार्थं सर्ववित्जगत् ।
इत्युक्तेः सत्यमेवैतद्वैराग्यार्थमसद्वचः ॥ १

कान्तिमाला

प्रपञ्चसत्यत्वं वक्तुमाह—यथेत्यादिना । स्वशक्त्येति । ननु "तस्मादिदं जगदशेषमसत्-स्वरूपम्" (भागवत १०।१४।२२) इत्यादिवाक्यं जगत्सत्यत्ववादिनां कथं सङ्गच्छेत ? तत्राह—वैराग्यार्थमिति । अनित्यजगत्सुखतृष्णापरित्यागार्थमेव, न तु तन्मृषात्वार्थं, तत्-सत्यत्वे प्रमाणलाभादिति भावः ॥ १

प्रभा

स्वशक्त्येति । इदानीं प्रपञ्चसत्यत्वं प्रतिपादयति—स्वशक्त्येति । सर्ववित् विष्णुर्हरिः स्वशक्त्या बहिरङ्गाख्यया मायया यथार्थं सत्यं जगत् सृष्टवान्, इति उक्तेः कथनात् एतज्जगत् सत्यमेव । कथं तर्हि श्रुतिस्मृतिपुराणादिषु कुत्रचित् प्रपञ्चासत्त्वमुच्यते, तत्राह—वैराग्यार्थमिति । वैराग्यार्थं विषयेषु विरक्तिजन-नार्थम् । वैराग्यं नाम प्रपञ्चवस्तुनासक्तिः । असद्वचः—विश्वमसत् मिथ्येति वाक्यमुपपद्यते । सतो भगवतः प्रशस्तत्त्वन्मिथ्या जगदुत्पत्तुं नार्हति, तथापि यत् श्रुत्यादिषु तस्यासत्त्वमुद्गीयते न तत्र तात्पर्यं, प्रपञ्चमिथ्यात्व-कथनेन तत्र वैराग्यं जायेत, तथा सति परमार्थभूते ब्रह्मणि मतिर्भवेदिति ॥ १

বঙ্গানুবাদ

সর্ব্বজ্ঞ ভগবান্ স্বকীয় বহিরঙ্গশক্তি মায়ার দ্বারা সত্য জগৎ সৃষ্টি করিয়াছেন, এইরূপ উক্তি থাকায় এই জগৎ সত্যই। শাস্ত্রে কোন কোন স্থানে যে বিশ্বকে মিথ্যা বলা হইয়াছে, তাহা কেবল তাহাতে বৈরাগ্য উৎপাদনের নিমিত্ত, বস্তুতঃ জগৎ মিথ্যা নহে ॥ ১

तथाहि, श्वेताश्वतरोपनिषदि—

"य एकोऽवर्णो बहुधा शक्तियोगाद्

वर्णाननेकान्निहितार्थो दधाति" ॥ (४।१) इति। (क)

कान्तिमाला

स्वशक्त्यैवेतत् प्रमाणयति—य इति। य ईश्वरः स्वयमवर्णः ब्राह्मणादिभिन्नः, स्वशक्तियोगादनेकान् ब्राह्मणादीन् वर्णान् दधाति उत्पादयतीत्यर्थः। "वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपयशोऽक्षरे" इति विश्वः। यद्वा स्वयम् अवर्णः रूपरहितोऽनेकान् शुक्लादीन् अर्थान्, निहितार्थः चेतसि धृतप्रयोजनः ॥ (क)

प्रभा

यः परमेश्वरः एकोऽद्वितीयः स्वगतसजातीयविजातीयभेदरहित इत्यर्थः, अवर्णो ब्राह्मणादिवर्णभिन्नः प्राकृतरूपरहितो वा, बहुधा नाना शक्तियोगात् निहितार्थः गृहीतप्रयोजनः अनेकान् बहून् वर्णान् ब्राह्मणादीन् शुक्लादीन् वा विदधाति सृजति। 'वि चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु' इति श्रुत्यंशः ॥ (क)

বঙ্গানুবাদ

শ্বেতাশ্বতর-উপনিষদে উক্ত হইয়াছে,—যিনি অদ্বিতীয়, ব্রাহ্মণাদি বা শুক্লাদিবর্ণরহিত, যিনি প্রয়োজনবশতঃ বিবিধশক্তির সহিত সম্বন্ধহেতু অনেক বর্ণের সৃষ্টি করিয়া থাকেন ॥ (ক)

श्रीविष्णुपुराणे च—

"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा।

परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥" (१।२२।५०) इति।(ख)

कान्तिमाला

एकदेशेति। परमव्योमनिलयस्य हरेः शक्तिकार्यमेतत्, तदतिदूरम् इदं परिदृश्यमानं जगदिति समुदायार्थः ॥ (ख)

प्रभा

व्याख्यातञ्चैतत् स्वामिभिः—'नन्वक्षरस्य परब्रह्मणस्तद्विलक्षणं जगत् कथं स्यादित्याशङ्का दृष्टान्तेनोपपादयति—एकदेशेति। एकदेशस्थितस्याग्नेः

श्रिकस्याग्नेर्दीपादेर्हकस्थापि तद्विलक्षणा ज्योत्स्ना प्रभा यथा तत्प्रकाश-विस्तारस्तथा ब्रह्मणः शक्तिकृतविस्तार इदमखिलं जगदि'ति ॥ (ख)

বঙ্গানুবাদ

বিষ্ণুপুরাণে উক্ত হইয়াছে—যেমন প্রদেশস্থ দীপাদি অগ্নির প্রভা বিস্তৃত-ভাবে পতিত হয়, সেইরূপ এই সমস্ত জগৎ পর ব্রহ্মের শক্তির বিস্তার ॥ (খ)

ईशावास्योपनिषदि—

"स पर्यगाच्छुक्रमकायमव्रण-
मस्नाविरं (१) शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयंभू-
र्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥" (८) इति। (ग)

कान्तिमाला

यथा श्रुतिः सर्वविदिति च प्रमाणयति—स पर्यगादिति। स प्रकृतः परमात्मा पर्यगात् सर्वं व्याप (२) शुक्रमित्याद्याः शब्दाः पुंस्त्वेन विपरिणम्याः, स इत्युपक्रमात्, शुक्री दीप्तिमान्, अकायोऽस्नाविर इति सूक्ष्मस्थूलदेहशून्यः, अव्रणः अक्षतः—विनाशशून्यः, शुद्धः रागाद्यनाविलः, अपापविद्धः कर्मशून्यः, कविः सर्वज्ञः मनीषी चतुरः परिभूः मायाभिभवी, (३) स्वयम्भूः निर्हेतुकः, याथातथ्यतः सत्यं, 'सत्यं तथ्यं ... याथातथ्यं सम्यक् तथ्यं यथातथम्' इति हलायुधः। अर्थान् महदादीन्, समाः (४) संवत्सरान् व्याप्य, "संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत् समाः" इत्यमरः ॥ (ग)

प्रभा

स इति। स प्रकृतः पुरुषोत्तमः पर्यगात् परि अगात् समन्ताद् व्याप्तवान्, शुक्रं शुभं यच्छति त्यजतीति शुक्र, शुक्र इति पुंस्त्वेन विपरिणामः कार्यः, एवं सर्वत्र। अकायः कायः सूक्ष्मदेहरहितः, अव्रणः अक्षतः पूर्ण इत्यर्थः, अस्नाविरः स्थूलदेहरहितः, शुद्धः ... अपापविद्धः निष्पापः धर्माधर्म-

---

(१) 'अस्थाविरं'—इति आदर्शपुस्तकीय पाठ

(२) 'व्याप्य' इति 'ग' पुस्तके

(३) 'मायाद्यभिभवी' इति 'घ' पुस्तके

(४) 'समाभ्यः' इति 'घ' पुस्तके।

रहित इत्यर्थः। कविः सर्वज्ञः, मनीषी ईशिता, परिभूः सर्वश्रेष्ठः, स्वयम्भूः सर्वाश्रयो निर्हेतुक इत्यर्थः। शाश्वतीभ्यः समाभ्यः शाश्वतीः समाः वत्सरान् व्याप्य याथातथ्यतः सत्यान् अर्थान् विषयान् व्यदधात् ससर्ज ॥ (ग)

বঙ্গানুবাদ

ঈশাবাস্য-উপনিষদে উক্ত হইয়াছে—ভগবান্ সর্ব্বব্যাপী, শোকরহিত, সূক্ষ্মশরীরশূন্য, পূর্ণ, স্থূলশরীররহিত, পবিত্র, ধর্ম্মাধর্ম্মশূন্য, সর্ব্বজ্ঞ, সর্ব্বশ্রেষ্ঠ, সর্ব্বাশ্রয়; তিনি বহুবর্ষ ব্যাপিয়া সত্য বিষয়সমূহের সৃষ্টি করিয়াছেন ॥ (গ)

श्रीविष्णुपुराणे च—

"तदेतदक्षयं (१) नित्यं जगन्मुनिवराखिलम् ।

आविर्भावतिरोभावजन्मनाशविकल्पवत् ॥" (१।२२।५८) इति। (घ)

कान्तिमाला

तदेतदिति। एतदीश्वरजीवप्रकृतिरूपम् अखिलं जगत्, हे मुनिवर! अक्षयं नित्यं, प्रकृतिजीवरूपमक्षयं स्वरूपेण क्षयरहितं परिणामीत्यर्थः। प्रकृतेर्महदादितया जीवस्य च ज्ञानविकाशेन परिणामः, ईश्वररूपन्तु नित्यं कूटस्थम्। एतदेवाह—आविर्भावेति। ईश्वरांश आविर्भावतिरोभाववान् प्रकृतिजीवरूपोऽंशस्तु जन्मनाशवानिति वा (२) पाठक्रम-मनादृत्य अर्थक्रमाद् व्याख्यातम्। "पूर्वं हि,

"द्वे रूपे ब्रह्मणस्तस्य मूर्त्तञ्चामूर्त्तमेव च।

क्षराक्षरस्वरूपे ते सर्वभूतेष्ववस्थिते ॥

अक्षरं तत् परं ब्रह्म क्षरं सर्वमिदं जगत् ॥" (विष्णुपुराणम् १।२२।५३)

इत्युक्त्वा, तन्मध्ये 'ब्रह्मविष्णुशिवरूपाणि' (विष्णु पु, १।११।५६) (३) पठित्वा, तदनन्तरं 'तदेतदि'ति पठितम् ॥ (घ)

प्रभा

तदेतदिति। नन्विन्द्रजालवत्त्वेतज्जगदिति तद् भ्रान्तमिदमित्याशयेनाह—तदेतदिति। हे मुनिवर! एतदखिलं जगत् अक्षयं नित्यञ्च। जगत्-सृष्टिं प्रति स्वरूपशक्तिसहायस्य ईश्वरस्य निमित्तत्वं जीवप्रकृत्योश्चोपादानत्वम्।

---

(१) 'तदेतदक्षरम' इति 'ग' पुस्तके।

(२) 'स्वरूपेणाक्षयोऽपि कार्यद्वारा जन्मनाशभेदवान्' इति 'ग' पुस्तके।

(३) 'ब्रह्म-विष्णु-शिवा ब्रह्मन्' इति 'ग' पुस्तके।

তত্রেশ্বরভাগরূপং নিত্যমেকরসং জীবপ্রকৃত্যাঃ স্বরূপতোঽপরিণামিত্বেঽপি শরীরাদ্যাত্মনা পরিণামীত্যর্থঃ। এতদেবাহ— আবির্ভাবেতি। ঈশ্বরভাগ আবির্ভাবতিরোভাববান্, জীবাদিভাগস্তু জন্মনাশবিকল্পবানিত্যর্থঃ। অবস্থোদয়ভঙ্গাচ্চাত্র জন্মনাশৌ ভবত ইতি ভাবঃ॥ (ঘ)

বঙ্গানুবাদ

বিষ্ণুপুরাণে উক্ত হইয়াছে—হে মুনিশ্রেষ্ঠ! এই সমুদয় জগৎ অক্ষয় ও নিত্য। স্বরূপশক্তিবিশিষ্ট ঈশ্বর জগতের নিমিত্তকারণ, জীব ও প্রকৃতি উপাদানকারণ, তন্মধ্যে ঈশ্বর নিত্য, প্রকৃতি পরিণামী, কিন্তু জীব পরিণামীর ন্যায় প্রতীয়মান হন॥ (ঘ)

মহাভারতে চ—

"ব্রহ্ম সত্যং তপঃ সত্যং সত্যং চৈব প্রজাপতিঃ।
সত্যাদ্ভূতানি জাতানি সত্যং ভূতময়ং জগৎ॥" ইতি।

(অশ্বমেধপর্ব ৩৫।৩৪) (ঙ)

কান্তিমালা

ব্রহ্মেতি। সচ্চিদানন্দং সত্যসঙ্কল্পং যদ্ ব্রহ্ম তৎ সত্যম্, আলোচনাত্মকং যৎ তস্য তপঃ তৎ সত্যং, তেন ব্রহ্মণা, স্বনাভিকমলাদুৎপাদিতো যঃ প্রজাপতিস্তৎ সত্যং, সত্যাৎ তস্মাজ্জাতানি ভূতানি, অতো ভূতময়ং জগৎ সত্যম্॥ (ঙ)

প্রভা

ব্রহ্মেতি। ব্রহ্ম সচ্চিদানন্দস্বরূপং পরংব্রহ্ম সত্যং, তপ আলোচনাত্মকং, প্রজাপতির্ব্রহ্মা সত্যঃ, ভূতানি প্রাণিনঃ সত্যাৎ জাতানি। ভূতময়ং পঞ্চভূতাত্মকং জগৎ সত্যম্, সত্যেশ্বরশক্তিময়ত্বাৎ। এবমেবোক্তং গ্রন্থকৃতা পীঠকভাষ্যে—

'সত্যেশ্বরশক্তিময়ত্বাজ্জগৎ সত্যং, জীবপ্রকৃত্যোশ্চ সত্যত্বম্ 'অজামেকাং লোহিতশুক্লকৃষ্ণা'মিত্যাদিমন্ত্রাৎ, 'একদেশস্থিতস্যাগ্নে'রিত্যাদি-বিষ্ণুপুরাণীয়বাক্যোচ্চয়াচ্চ ব্যক্তম্। জীবপ্রকৃত্যোরীশ্বরশক্তিত্বন্তু—

भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा॥
(श्रीमद्भगवद्गीता ७।४)
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो! ययेदं धार्यते जगत्॥' (७।५)। इति स्मृतेः।
जगतस्तत्कार्यत्वन्तु 'य एकोऽवर्णः' इत्यादि श्रुतेः।
'मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत!॥' (गीता १४।३) इति।

'इदं हि विश्वं भगवानिवेतरः' इत्यादिस्मृतेश्च। एतेन जन्मभङ्गान्यथानुपपत्त्या जगन्मिथ्या ब्रह्मवत् सत्यत्वेन तदनुपपत्तेरिति प्रत्युक्तम्। जन्मादिकं हि अनित्यत्वव्याप्यं, सत्यत्वं नित्यत्वसाधारणमतः सर्वमनित्यं जगत्। 'अनित्यसुखात्मक'मिति भगवत्कण्ठोक्तेश्च। त्रिकालबाध्यन्तु मिथ्या यथा खपुष्पादि॥' इति। (ঙ)

बङ्गानुवाद

সচ্চিদানন্দস্বরূপ ব্রহ্ম সত্য, আলোচনারূপ তপঃ সত্য, প্রজাপতি সত্য, প্রাণিগণ সত্য ব্রহ্ম হইতে উৎপন্ন হইয়াছে, সুতরাং তাঁহারা কারণরূপে সত্য, পঞ্চভূতময় জগৎও সত্য॥ (ঙ)

'आत्मा वा इद'मित्यादौ वनलीनविहङ्गवत्।
सत्त्वं विश्वस्य मन्तव्यमित्युक्तं वेदवेदिभिः॥ २

इति प्रमेयरत्नावल्यां तृतीयप्रमेयम्॥ ३

कान्तिमाला

ननु 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यादिश्रुतेस्तत्र पूर्वं परमात्मैक आसीत्, न तु प्रपञ्चोऽपि। "आत्मैवेद"मिति सामानाधिकरण्यव्यपदेशस्तु रज्जुभुजङ्गवत् आत्मनि तदध्यस्तत्वादेव ततो मिथ्यैव स इति चेत्? तत्राह—आत्मेति। वने लीनो विहङ्गो हि यथा तत्रास्त्येव, तथा आत्मनि लीनः प्रपञ्चः सौक्ष्म्येण अस्त्येव। अन्यथा सत्कार्यताप्रसक्तिः (१)॥ २

इति प्रमेयरत्नावल्यां विश्वसत्यत्वप्रकरणं व्याख्यातम्॥ ३

(१) 'अन्यथा असत्कार्यवादप्रसक्तिः' इति 'ग' पुस्तके।

प्रभा

'आत्मा वा इदमेवाग्र आसीत्' (ऐतरेय: १।१) इत्यादिश्रुतिषु प्रलये प्रपञ्चस्याभावात् कथं तस्य सत्यत्वमित्यत आह—आत्मेति। इदं जगत् अग्रे उत्पत्तेः प्राक् आत्मा एव आसीत् इत्यत्र जगदात्मनि लीनमासीत्, यथा वने विहङ्गेषु लीनेषु न तेषां पृथगस्तित्वमनुभूयते तद्वदिति भावः। अतो विश्वस्य सत्त्वं सत्यत्वं मन्तव्यमिति वेदवेदिभिर्वेदज्ञैरुक्तम् ॥ २

বঙ্গানুবাদ

'এই জগৎ উৎপত্তির পূর্ব্বে একই ছিল' ইত্যাদি শ্রুতিতে অবগত হওয়া যায় যে পূর্ব্বে প্রপঞ্চ ছিল না, সুতরাং তাহার সত্যত্ব কিরূপে সিদ্ধ হয়। তাহার উত্তরে বলা যায়—এই জগৎ আত্মাতে লীন ছিল, যেমন বিহঙ্গগণ বনে লীন থাকে। অতএব জগৎ মিথ্যা নহে, কিন্তু সত্য, ইহা বেদবিৎ পণ্ডিতগণ বলিয়া থাকেন ॥ ২

चतुर्थप्रमेयम्

भेदसत्यत्वप्रकरणम् ।

अथ विष्णुतो जीवानां भेदः ।

तथाहि श्वेताश्वतराः पठन्ति—

"द्वा सुपर्णा सयुजा सखाया
समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्व-
त्त्यनश्नन्नन्योऽभिचाकशीति ॥" (४।६) (क)

कान्तिमाला

ईश्वराज्जीवानां भेदं वक्तुमाह—द्वेति। 'सुपां सुलुगि'-(पा० ७।१।३९) त्यादि-सूत्राद्द्वौ विभक्तेरात्। द्वौ सुपर्णौ पक्षिणौ जीवेश्वरलक्षणौ समानमेकं वृक्षं देहं (१) परि-

(१) 'वृक्षं देहलक्षणं' 'वृक्षं देहं पिप्पलं' इति च पाठः 'ग' तथा 'घ' पुस्तके।

पञ्चजाते स्वीकृत्य तिष्ठत:। जीवो भोगाय, ईशो नियमनाय इति बोध्यम्। तौ कीदृशा-वित्याह,—सयुजौ सहयोगवन्तौ, सखायौ तत्तुल्यौ। तयोरन्य एको जीव: पिप्पलं कर्मफलं सुखदु:खरूपं स्वादु अत्ति। अन्य ईशस्तदनश्नन्नपि अभिचाकशीति प्रदीप्यते ॥ (क)

प्रभा

द्वा इति। द्वा द्वौ सुपर्णौ पक्षिणौ जीवेश्वरौ सयुजा सयुजौ सर्वदा संयुक्तौ, सखाया सखायौ मित्रभावापन्नौ समानम् एकं वृक्षं वृक्षवद्देहं परि-षस्वजाते समाश्रितवन्तौ। तयोर्जीवेश्वरयोर्मध्ये एको जीव: पिप्पलम् अनेक-विधिविधवेदनास्वादरूपं कर्मफलं सुखदु:खलक्षणं स्वादु यथा तथा अत्ति भुङ्क्ते। अन्य ईश्वर: अनश्नन् कर्मफलमभुञ्जान: अभिचाकशीति विराजते ॥(क)

বঙ্গানুবাদ

বিষ্ণু হইতে জীবগণের ভেদবিষয়ে শ্বেতাশ্বতর-শাখিগণ এইরূপ বলিয়া থাকেন—জীব ও ঈশ্বর দুইটী পক্ষিরূপ, সর্ব্বদা সম্মিলিত, পরস্পর মিত্রভাবাপন্ন, বৃক্ষের ন্যায় একটী দেহকে উভয়ে আশ্রয় করেন। জীব ও ঈশ্বর এই উভয়ের মধ্যে জীব সুখ-দুঃখ-রূপ কর্ম্মফল সুস্বাদুরূপে ভোগ করে, কিন্তু ঈশ্বর কর্ম্মফল ভোগ না করিয়া অবস্থিত আছেন ॥ (ক)

"समाने वृक्षे पुरुषो निमग्नो-
ऽनीशया शोचति मुह्यमान:।
जुष्टं यदा पश्यत्यन्यमीश-
मस्य महिमानमिति(१) वीतशोक: ॥"(मुण्डक० ३।१।२) इति ।(ख)

कान्तिमाला

समाने एकस्मिन् देहलक्षणे वृक्षे पुरुषो निमग्नो निरत:, अनीशया मायया मुह्यमान: सन् शोचति। यदा स्वस्मादन्यं भिन्नम् ईशं कल्याणगुणगणेन स्वेन च जुष्टं परिषेवितं पश्यति ध्यायति, तदा वीतशोक: सन् अस्य महिमानं धामेति ॥ (ख)

प्रभा

समान इति। पुरुषो भोक्ता जीव: समाने एकस्मिन् वृक्षे देहरूपे वृक्षे निमग्नो निश्चयेन देहात्मभावमापन्न:, हि यतोऽनीशयाऽसमर्थतया मुह्यमान:

---

(१) 'महिमानमेति' इति आदर्शपुस्तकेषु पाठ:।

सन् शोचति। यदाऽन्यं स्वस्माद्भिन्नं जुष्टं नित्यसिद्धैः सेवितमीशमीश्वरं पश्यति, अस्य परमेश्वरस्य इति इमं महिमानञ्च पश्यति तदा वीतशोको भवति। 'एति' इति पाठे साधर्म्यलक्षणं महिमानं प्राप्नोति ॥ (ख)

বঙ্গানুবাদ

ভোক্তা জীব এক দেহরূপ বৃক্ষে দেহাত্মভাব প্রাপ্ত হইয়া থাকে এবং অশক্তি-হেতু মোহপ্রাপ্ত হইয়া শোক করে। যখন সেই জীব নিজ হইতে ভিন্ন, নিত্যসিদ্ধগণ-কর্ত্তৃক সেবিত ঈশ্বরের সাক্ষাৎকার লাভ করেন, তখন তিনি ঈশ্বরের মহিমা অবলোকন করিয়া শোকরহিত হন অথবা ঈশ্বরের তুল্য মহিমা লাভ করিয়া শোকরহিত হন ॥ (খ)

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥
इति तात्पर्यलिङ्गानि षड्यान्याहुर्मनीषिणः।
भेदे तानि प्रतीयन्ते तेनासौ तस्य गोचरः ॥ १

कान्तिमाला

भेदे शास्त्रतात्पर्यं दर्शयितुमाह—उपक्रमेति बृहत्संहितायाम्। उपक्रमोपसंहारयो-रैकरूप्यमित्येकलिङ्गम्। 'द्वा सुपर्णा' इत्युपक्रमः। 'अन्यमीश'मित्युपसंहारः। 'द्व'ेति, 'तयोरन्यः' इति, 'अनश्नन्' इति, अविशेषपुनःपुनःश्रुतिरभ्यासः। अणुत्व-बृहत्त्वादि-विरुद्धनित्यधर्मावच्छिन्नप्रतियोगिकतया भेदस्य शास्त्रं विना लोकादप्रतीतिरपूर्वता। 'वीत-शोकः' इति फलम्। 'तस्य महिमानमिति' इत्यर्थवादः। 'अनश्नन्नि'ति उपपत्तिः। असौ भेदः तस्य शास्त्रतात्पर्यस्य गोचरो विषयः ॥ १

प्रभा

उपक्रमेति। उपक्रमोपसंहारयोरैक्यमाद्यं लिङ्गं, येनैवोपक्रम्यते तेनैव चेदुपसंह्रियते तर्हि तत्र तात्पर्यं निर्णेयम्। अभ्यासः पौनःपुण्यं, प्रकरण-प्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। प्रकरणप्रति-पाद्यस्य वस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता। प्रकरणप्रतिपाद्यस्य वस्तुनः श्रूयमाणं प्रयोजनं फलम्। प्रकरणप्रतिपाद्यस्य वस्तुनः प्रतिपादने

श्रूयमाणा युक्तिरुपपत्तिः। तात्पर्यनिर्णये एतानि षड्विधानि लिङ्गानि भवन्ति। यस्मिन् वाक्ये एतानि लिङ्गानि सन्ति, तत्रैव तस्य तात्पर्यमवसीयते। तानि षड्विधानि लिङ्गानि भेदे द्वैते प्रतीयन्ते, तेन हेतुनाऽसौ भेदः तस्य शास्त्रतात्पर्यस्य गोचरो विषयो भवति। भेदस्य तात्पर्यविषयत्वं प्रदर्श्यते। तथाहि—आथर्वणे 'द्वा सुपर्णा' इत्युपक्रमः, 'परमं साम्यमुपैति' इत्युपसंहारः, 'तयोरन्यः' 'अनश्नन्नन्यः', 'अन्यमीशः' इत्यभ्यासः, शास्त्रैकगम्येश्वरप्रतियोगिकस्य कालत्रयावाध्यभेदस्य शास्त्रं विनाऽप्राप्तेरपूर्वता, 'पुण्यपापे विधूय' इति फलम्, 'अस्य महिमानमिति' इत्यर्थवादः, 'अन्ति अश्नन्' इत्युपपत्तिः ॥ १

বঙ্গানুবাদ

উপক্রম ও উপসংহারের ঐক্য, অভ্যাস, অপূর্ব্বতা, ফল, অর্থবাদ ও উপপত্তি এই ছয়টী তাৎপর্য্যনির্ণয়ে লিঙ্গ। মনীষিগণ এই ছয়টীকে তাৎপর্য্যনির্ণয় করিবার লিঙ্গ বলিয়া থাকেন, সেই সকল লিঙ্গ দ্বৈতে দৃষ্ট হয়, অতএব ভেদ তাৎপর্য্যের বিষয় ॥ ১

किञ्च मुण्डके—

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्य-पापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥" (३।१।३) इति। (क)

कान्तिमाला

ननु नैतानि लिङ्गानि भेदं साधयितुमैकान्तानि, तेषामभेदसाधनेऽपि दर्शितत्वात्। "ब्रह्मविद् ब्रह्मैव भवति" (मुण्ड० ३।२।९), "ब्रह्मैव सन् ब्रह्माप्येति" (बृह० ४।४।६) इति मोक्षदशायामभेदावधारणाद् व्यावहारिकी भेदः स्यादिति चेत्? तत्राह—किञ्चेति। यदेति। पश्यः आत्मा जीवः ॥ (क)

प्रभा

यदेति। यदा यस्मिन् काले पश्यः पश्यतीति जीवो रुक्मवर्णं ज्योतिर्मयं कर्तारं सर्वस्य जगतो विधातारं ब्रह्मयोनिं ब्रह्मणो हिरण्यगर्भस्य वेदस्य वा

योनिं कारणम्, ईशं प्रभुं पुरुषं परमेश्वरं पश्यते पश्यति, तदा तस्मिन् काले विद्वान् पुण्यपापे पुण्यं पापञ्च विधूय निरस्य निरञ्जनो निरुपाधिः सन् परमं निरतिशयं साम्यं सादृश्यम् उपैति प्राप्नोति। जीवानां ब्रह्मसाधर्म्यप्राप्तिरेव कृतकृत्यता, न न तदभेदप्राप्तिः॥ (क)

बङ्गानुवाद

অপি চ মুণ্ডকোপনিষদে উক্ত হইয়াছে—

'যখন জীব জ্যোতির্ম্ময়, সমস্ত জগতের কর্ত্তা, হিরণ্যগর্ভ বা বেদের কারণ, সকলের প্রভু পরমেশ্বরের দর্শন লাভ করেন, তখন বিদ্বান্ পুণ্য ও পাপকে ত্যাগ-করত উপাধিরহিত হইয়া পরমেশ্বরের অত্যন্ত সাদৃশ্য প্রাপ্ত হইয়া থাকেন॥' (ক)

काठके च—

"यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति।

एवं मुने विजानत आत्मा भवति गौतम॥" (४।१।१४) इति। (ख)

कान्तिमाला

यथोदकमिति। विजानतस्तदनुभविनः॥ (ख)

प्रभा

यथेति। हे गौतम! हे नचिकेतः! यथा शुद्धे प्रसन्ने उदके जले आसिक्तं प्रक्षिप्तं शुद्धमुदकं तादृक् तत्सदृशं, न तु तदेव भवति। एवं विजानतो विज्ञानवतो मुनेरात्मा स्वामी मुक्तश्चतुर्मुखः सन् तादृग् भगवत्सदृश एव भवति, न तु स एव। जीवास्तु नाप्नुवन्तीति किमु वक्तव्यम्॥ (ख)

बङ्गानुवाद

হে নচিকেতঃ! যেমন নির্ম্মল জলে পবিত্র জল নিক্ষেপ করিলে সেই নিক্ষিপ্ত জল তৎসদৃশ হয়, এইরূপ জ্ঞানবান্ মুনির আত্মা ভগবৎসদৃশই হইয়া থাকে॥ (খ)

श्रीगीतासु च—

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।

सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥" (१४।२) इति। (ग)

कान्तिमाला

इदमिति। उपाश्रित्य प्राप्य ॥ (ग)

प्रभा

व्याख्यातञ्चैतद् ग्रन्थकृता—'इदमिति। गुरूपासनया इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य प्राप्य जनाः सर्वज्ञस्य मम नित्याविर्भूतगुणाष्टकस्य साधर्म्यं साधनाविर्भावितेन तदष्टकेन साम्यमागताः सन्तः सर्गे नोपजायन्ते सृष्टिकर्मतां नाप्नुवन्ति, प्रलये न व्यथन्ते मृतिकर्मताञ्च न यान्तीति जन्ममृत्युभ्यां रहिता मुक्ता भवन्तीति मोक्षे जीवबहुत्वमुक्तम्। 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इत्यादि श्रुतिभ्यश्चैतदवगतम्' ॥ (ग)

বঙ্গানুবাদ

লোক গুরুর উপাসনার দ্বারা এইরূপ জ্ঞান লাভ করিয়া আমার সাম্য প্রাপ্ত হন এবং সৃষ্টিকালে উৎপন্ন হন না এবং প্রলয়েও মরেন না ॥ (গ)

एषु (१) मोक्षेऽपि भेदोक्तेः स्याद्भेदः पारमार्थिकः।
ब्रह्माहमेको जीवोऽस्मि नान्ये जीवा न चेश्वरः ॥२

कान्तिमाला

एष्वेति (२)। एषु (३) वाक्येषु—साम्यमिति, तादृगेवेति, साधर्म्यमिति। मोक्षेऽपि भेदोक्तेस्तात्त्विको भेदः। एवञ्च ब्रह्मैवेत्यत्र ब्रह्मतुल्य इत्येवार्थः। "एवौपम्येऽवधारणे" इति विश्वः ॥ २

मदविद्या कल्पितास्ते स्युरितीत्यञ्च दूषितम्।
अन्यथा 'नित्य' इत्यादि श्रुत्यर्थो नोपपद्यते ॥ ३

कान्तिमाला

"स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम्" (कैवल्य १२) इत्यादिश्रुत्य-

---

(१) 'विषु' इति 'घ' पुस्तके।

(२) 'विष्विति' इति 'घ' पुस्तके।

(३) 'विषु' इति 'घ' पुस्तके।

र्थाभासमादाय शङ्करानुयायिनः केचित् (१) कल्पयन्ति । ब्रह्मैवाविद्यया मोहितम्, एको जीवो वास्तवः, स च अहमेव, मदन्ये जीवा मदविद्यया कल्पिताः । सर्वेश्वराख्यः पुरुषश्च, चिदाभासाः सर्वे स्वाप्निका इव रथाश्वादयः (२) । अथ ज्ञातात्मनि मयि चिन्मात्रतया अवस्थिते ते न भविष्यन्ति, स्वाप्निका इव रथाश्वादयः जागरे, इत्येक एव सत्यो जीव इति । तदिदं प्रत्याचष्टे—ब्रह्माहमिति । इत्थं मोक्षेऽपि (३) भेदप्रतिपादनेन । अन्यथा पारमार्थिकभेदानङ्गीकारे ॥ ३

प्रभा

एष्विति । एषु पूर्वोक्तश्रुत्यादिवाक्येषु मोक्षे मुक्तावपि भेदोक्तेर्भेदकथनाद् भेदः पारमार्थिकस्तात्त्विकः स्यात् । शङ्करभगवत्पूज्यपादमतमनूद्य दूषयति—ब्रह्माहमिति । तन्मतञ्चेत्थं प्रतिपेदे ग्रन्थकृता—'अद्वितीयश्चिन्मात्रो ह्यात्मा, स चात्मन्यविद्यया गुणमयीं मायां तद्वैषम्यजां कार्यसंहतिञ्च कल्पयन् अस्मदर्थमेकं युष्मदर्थांश्च बहून् कल्पयति । तत्राऽस्मदर्थः स्वस्वरूपः पुरुषः, युष्मदर्थश्च महादादीनि भूम्यन्तानि जड़ानि, स्वतुल्यानि पुरुषान्तराणि, सर्वेश्वराख्यः पुरुषविशेषश्च इत्येवं त्रिविधः । गुणयोगादेव कर्त्तृत्वभोक्तृत्वे तत्रात्मन्यध्यस्ते, यथा स्वप्ने कश्चिद् राजधानीं राजानं तत्प्रजाश्च कल्पयति, तन्नियम्यमात्मानञ्च मन्यते, तद्वद् जाते च ज्ञाने जागरे च सति ततोऽन्यन्न किञ्चिदस्तीति चिन्मात्रमेकमात्मवस्त्विति । तमिमं वादं निराकर्त्तुमाह—ब्रह्माहमिति । अहं ब्रह्मास्मि, जीव एकः, अन्ये जीवा न सन्ति, ईश्वरश्च नास्ति । ते जीवा मदविद्याकल्पिता मद्विषयकाज्ञानेन कल्पिताः स्युरित्यञ्च मतं दूषितं विद्वद्भिरिति शेषः । अन्यथा तात्त्विकभेदास्वीकारे 'नित्यो नित्याना'-मित्यादि-श्रुत्यर्थो न उपपद्यते संगच्छते । एतासां श्रुतीनामर्थवत्त्वाय जीवब्रह्मणोर्जीवानाञ्च भेदो वक्तव्यः ॥ २—३

বঙ্গানুবাদ

পূর্ব্বোক্ত শ্রুতি, স্মৃতি প্রভৃতিতে অবগত হওয়া যায় যে, মুক্তিতেও ভেদ

---

(१) 'क्वचित्' इति 'ग' पुस्तके ।

(२) 'रथादयः' इति 'ग' पुस्तके ।

(३) 'मोक्षे' इति 'ग' पुस्तके ।

আছে, সুতরাং ভেদ যথার্থ। 'আমি ব্রহ্মস্বরূপ, জীব ও ব্রহ্ম এক, জীবভেদ নাই এবং ব্রহ্মাতিরিক্ত ঈশ্বর নাই, জীবসমূহ মদ্বিষয়ক অজ্ঞানের দ্বারা কল্পিত'—ইহা ভগবান্ শঙ্করাচার্য্যের মত। এই মতে বিদ্বদ্গণ দোষ প্রদান করিয়াছেন। ভেদকে মিথ্যা স্বীকার করিলে 'নিত্যো নিত্যানাম্' ইত্যাদি শ্রুতির অর্থ সঙ্গত হয় না।

तथाहि कठाः पठन्ति—

"नित्यो नित्यानां (१) चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिः शाश्वती नेतरेषाम्॥" (२।२।१३) इति। (क)

कान्तिमाला

तां श्रुतिमुदाहरति। नित्य इति। आत्मनि मनसि स्थितम्॥ (क)

प्रभा

'अन्यथा नित्य इत्यादिश्रुत्यर्थो नोपपद्यते' इत्युक्तम्, तां काठकश्रुतिमुपन्यस्यति—नित्येति। यो नित्यानां जीवप्रकृतिकालानां नित्यः परमनित्यः इत्यर्थः, एतेषां नित्यत्वमेतदधीनमिति भावः। चेतनानां चेतनः परमचेतनः, चेतनानां चेतनत्वप्रदो वा। यश्च स्वयमेक एव बहूनां पुरुषाणां कामान् काम्यान् विदधाति, तमात्मस्थं येऽनुपश्यन्ति, धीराः पण्डितास्तेषामेव शाश्वती पुनरावृत्तिशून्या शान्तिर्मोक्षो नेतरेषाम्। 'मोक्षः शान्तिश्च शरणं निर्वाणश्चाभिधीयते' इति ब्राह्मे॥ (क)

বঙ্গানুবাদ

কঠশাখিগণ বলিয়া থাকেন—যিনি নিত্য জীব, প্রকৃতি এবং কালেরও নিত্যত্বসম্পাদক, যিনি চেতনসমূহের চেতনত্বপ্রদ, যিনি এক হইয়াও বহু পুরুষের অভীষ্ট বস্তু সম্পাদন করেন, যে পণ্ডিতগণ আত্মস্থিত তাঁহাকে দেখেন, তাঁহাদেরই মুক্তি হয়, অপরের হয় না॥ (ক)

---

(१) 'नित्योऽनित्यानां' इति पाठः अन्यत्र।

एकस्मादीश्वरान्नित्याच्चेतनात्तादृशा मिथः।
भिद्यन्ते बहवो जीवास्तेन भेदः सनातनः॥ ४
प्राणैकाधीनवृत्तित्वाद् वागादेः प्राणता यथा।
तथा ब्रह्माधीनवृत्तेर्जगतो ब्रह्मतोच्यते॥ ५

कान्तिमाला

श्रुत्यर्थं योजयति—एकस्मादिति। यः परेशो नित्यश्चेतन एको नित्यानां चेतनानां बहूनां जीवानां कामान् वाञ्छितानि, यथासाधनं विदधाति। तं ये धीराः पश्यन्ति ध्यायन्ति, तेषां शान्तिः संसारदुःखनिवृत्तिः शाश्वतीति तदर्थः। न खलु नित्यानां चेतनानाम् अविद्याकल्पितत्वं प्रेक्षावता शक्यमभिधातुम्, इत्येकजीववादकाष्ठकुठाररूपमितद्वाक्यम्। तादृशा इति, नित्याश्चेतनाश्चेत्यर्थः। तेनेति, नित्यानां चेतनानां नित्यात् चेतनाद् भेदप्रतिपादनेन इत्यर्थः॥ ४

नन्वेवं 'सर्वं खल्विदं ब्रह्म' (छान्दोग्य॰ ३।१४।१) 'तत्त्वमसि' (छान्दोग्य॰ ६।८।७) इत्यादेः का गतिरिति चेत्? तत्राह—प्राणैकेति॥ ५

प्रभा

एकेति। एकस्मादद्वितीयान्नित्याच्चेतनादीश्वरात् तादृशा नित्याश्चेतनाश्च बहवो जीवा मिथः परस्परं भिद्यन्ते, तेन हेतुना भेदः सनातनः पारमार्थिकः। ननु तर्हि 'एकमेवाद्वितीयं, नेह नानास्ति किञ्चन, तत्त्वमसी'त्याद्यद्वैतप्रतिपादकश्रुतीनां वैयर्थ्यं प्रसज्जेत, तत्राह—प्राणैकेति। यथा वागादेर्वागादीनामिन्द्रियाणां प्राणैकाधीनवृत्तित्वात् केवलप्राणाधीनव्यापारत्वात् तेषां प्राणता प्राणत्वमुच्यते, तथा जगतोऽचेतनमात्रस्य ब्रह्माधीनवृत्तेर्ब्रह्माधीनव्यापारत्वाज्जगतो ब्रह्मता जगद् ब्रह्मेत्युच्यते ब्रह्मविद्भिरिति शेषः। न खल्वचेतनस्य चेतनानधिष्ठितस्य व्यापारः सम्भवति, ततश्चेतनाधीनवृत्तित्वादचेतनस्य "सर्वं खल्विदं ब्रह्मे'त्यादावभेदेन निर्देशः। व्याख्यातञ्चैतद् ग्रन्थकृता पीठकभाष्ये—'किन्त्वयमेवार्थः, ब्रह्मायत्तवृत्तिकत्वाद् ब्रह्मात्मकमिदं जगद् व्यपदिश्यते, प्राणायत्तवृत्तिकत्वाद् यथा प्राणात्मकं वागादि व्यपदिष्टम्, तथा ब्रह्मनिष्ठत्वाद् ब्रह्मव्याप्यत्वाद् ब्रह्मात्मकं तत्। स्मर्यते च महाभारते मोक्षधर्मे जनकयाज्ञवल्क्यसंवादे—

অন্যশ্চ পরমো রাজন্! তথাঽন্যঃ পঞ্চবিংশকঃ।

তৎস্থত্বাদনুপশ্যন্তি হ্যেক এবেতি সাধবঃ॥" ইতি॥ ৪—৫

বঙ্গানুবাদ

ঈশ্বর এক, নিত্য ও চেতন, জীবসমূহ নিত্য ও চেতন এবং তাহারা পরস্পর ভিন্ন, ঈশ্বর হইতেও জীব ভিন্ন, সুতরাং ভেদ যথার্থ॥ ৪

যেমন বাগাদি ইন্দ্রিয়গণের ব্যাপার প্রাণের অধীন বলিয়া বাগাদিকে প্রাণ বলা হয়, সেইরূপ অচেতন জগতের ব্যাপার ব্রহ্মের অধীন বলিয়া জগৎকে ব্রহ্ম বলা হয়॥ ৫

তথাহি ছান্দোগ্যে পঠ্যতে—

"ন বৈ বাচো ন চক্ষূংষি ন শ্রোত্রাণি ন মনাংসীত্যাচক্ষতে,

প্রাণ ইত্যেবাচক্ষতে, প্রাণো হ্যেবৈতানি সর্বাণি ভবতি॥ (৫।১।১৫)

ইতি। (ক)

কান্তিমালা

ন বৈ ইতি, বাগাদীনামিন্দ্রিয়াণাং বাগাদিশব্দৈর্নাভিধানং, কিন্তু প্রাণায়ত্তবৃত্তিকত্বাৎ (১) প্রাণশব্দেনৈবাভিধানং, প্রাণরূপত্বঞ্চ যথা ভবতি, এবং ব্রহ্মায়ত্তবৃত্তিকত্বাৎ চিজ্জড়াত্মকস্য প্রপঞ্চস্য ব্রহ্মশব্দেনাভিধানং ব্রহ্মরূপত্বঞ্চ ইতি॥ (ক)

প্রভা

নেতি। বাগাদীনাং বসিষ্ঠত্বাদিকং প্রাণাধীনমিত্যত্র নিয়ামকমাহ—ন বা ইতি। যস্মাদ্ বাগাদীনি করণানি বাচ ইতি নৈবাচক্ষতে বিদ্বাংসঃ। এবং চক্ষূংষীতি নৈবাচক্ষতে। শ্রোত্রাণীতি নৈবাচক্ষতে। মনাংসীতি নৈবাচক্ষতে। কিং তর্হি? প্রাণা ইত্যেবাচক্ষতে। তস্মাৎ প্রাণা এবৈতানি সর্বাণি ভবন্তি, সর্বেন্দ্রিয়দৈবেষু স্থিতত্বান্নিয়ামকো ভবতীত্যর্থঃ॥ (ক)

বঙ্গানুবাদ

এ বিষয় ছন্দোগ্যোপনিষদে পঠিত হইয়াছে যথা—'বাগিন্দ্রিয়সমূহ, চক্ষুরিন্দ্রিয়সকল, শ্রবণেন্দ্রিয়গণ ও মনঃসমূহ কথিত হয় না, প্রাণই কথিত হইয়া থাকে। কারণ, এই সমস্ত ইন্দ্রিয় একমাত্র প্রাণস্বরূপ॥' (ক)

---

(১) 'প্রাণায়ত্তবৃত্তিত্বাৎ' ইতি 'গ' পুস্তকে।

ब्रह्मव्याप्यत्वतः कैश्चिज्जगद्ब्रह्मेति मन्यते ॥ ६

कान्तिमाला

'यद्धि यद्व्याप्यं तत् तद्रूप'मिति सङ्केतान्तरेणापि तदद्वैतवाक्यं सङ्गमनीयमित्याह—ब्रह्मेति ॥ ६

प्रभा

'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुतौ जगतो ब्रह्मशब्दाभिधेयत्वे हेत्वन्तरमाह—ब्रह्मेति। ब्रह्मव्याप्यत्वाद् ब्रह्मणा जगतो व्याप्यत्वाद् जगद् ब्रह्मेति कैश्चिद् विद्वद्भिर्मन्यते। ब्रह्मणा जगद् व्याप्यं, व्याप्यस्य व्यापकाधीनत्वाद् व্যাপक-शब्देन व्याप्यस्य निर्देशः ॥ ६

বঙ্গানুবাদ

যেহেতু জগৎ ব্রহ্মকর্তৃক ব্যাপ্ত, অতএব 'সর্বং খল্বিদং ব্রহ্ম' ইত্যাদি শ্রুতিতে জগৎকে ব্রহ্ম বলা হইয়াছে। ইহা কোন কোন পণ্ডিতের অভিমত ॥ ৬

यदुक्तं श्रीविष्णुपुराणे—

"योऽयं तवागतो देव ! समीपं देवतागणः ।

सत्यमेव जगत्स्रष्टा यतः सर्वगतो भवान् ॥ (१।९।६९) इति। (क)

कान्तिमाला

योऽयमिति श्रीविष्णुं प्रति देवानां वाक्यम्। स्फुटार्थम् (२)। इत्थं च 'स एव मां'-त्यादौ जीवस्य परमात्माभेदः तदायत्तवृत्तिकत्वादिभ्यां व्याख्यातो बोध्यः ॥ (क)

प्रभा

ब्रह्मव्याप्यत्वाद् जगद् ब्रह्मशब्देन निर्दिश्यत इत्यत्र विष्णुपुराणं प्रमाणत्वेनोपदर्शयति—योऽयमिति। हे देव ! भगवन् विष्णो ! यः अयं पुरोवर्त्ती देवतागणो देवसमूहस्तव समीपमागतः। यतः जगत्स्रष्टा भवान् सर्वगतो व्यापकः, इति सत्यमेव। व्याप्यस्य व्यापकान्तर्गतत्वात्। तथा चोक्तं श्रीमद्भागवते—

'ऋषयो मनवो देवा मनुपुत्रा महौजसः।

कलाः सर्वे हरेरेव सप्रजापतयः स्मृताः ॥' (१।३।२७) इति (क)

---

(२) 'प्रस्फुटार्थम्' इति 'ग' पुस्तके।

বঙ্গানুবাদ

এ বিষয়ে বিষ্ণুপুরাণে উক্ত হইয়াছে—হে ভগবন্! আপনি জগতের স্রষ্টা ও সর্ব্বব্যাপক ইহা সত্য, এই কারণে দেবগণ আপনার নিকট আসিয়াছেন ॥ (ক)

प्रतिविम्बपरिच्छेदपक्षौ यौ स्वीकृतौ परैः।
विभुत्वाऽविषयत्वाभ्यां तौ विद्वद्भिर्निराकृतौ ॥ ৭

कान्तिमाला

उपाधौ प्रतिविम्बितं तेन परिच्छिन्नं वा ब्रह्म जीवरूपं स्यात्, उपाधेर्विगमे तु ब्रह्मैवेकमित्याहुः केवलाद्वैतिनः। तन्निराकर्तुमाह—प्रतिविम्बेति। ब्रह्मणो विभुत्वान्नैरूप्याच्च न तस्य प्रतिविम्बम्। परिच्छेदविषयत्वास्वीकाराच्च न तस्य परिच्छेदः। वास्तवे परिच्छेदे टङ्कच्छिन्नपाषाणखण्डवद्विकारित्वाद्यापत्तिः ॥ ৭

प्रभा

प्रतीति। विम्बस्थानीय ईश्वरः, जीवस्तु प्रतिविम्ब इति विवरणमतम्। रूपरहितस्य चेतनस्य प्रतिविम्बासम्भवाद् घटावच्छिन्नाकाशवदन्तःकरणावच्छिन्नचेतनो जीवः। परिच्छेदो नामावच्छेदः, परैः शङ्करमतानुसारिभिरद्वैतवेदान्तिभिर्यौ प्रतिविम्बपरिच्छेदपक्षौ स्वीकृतौ, तौ विद्वद्भिर्निराकृतौ। तत्र हेतुमाह—विभुत्वाविषयत्वाभ्यामिति। रूपरहितस्य प्रतिविम्बासम्भवात् प्रतिविम्बपक्षो न युक्तः। तस्य चाविषयत्वान्न परिच्छेदपक्षः समीचीनः। तदुक्तं ग्रन्थकृता तत्त्वसन्दर्भटीकायां—"यस्त्विन्द्रो मायाभिः पुरुरूप ईयते" इत्यादिश्रुतेस्तस्याऽद्वितीयस्य ब्रह्मणो मायया परिच्छेदादीश्वरजीवविभागः स्यात्। तत्र विद्यया परिच्छिन्नो महान् खण्ड ईश्वरः, अविद्यया परिच्छिन्नः कनीयान् खण्डस्तु जीवः। यथा घटेनावच्छिन्नः शरावेणावच्छिन्नश्चाकाशखण्डो महदल्पताव्यपदेशं भजति। 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मे'त्यादिषु ब्रह्मणस्तस्य प्रतिविम्बश्रवणात्तद्विभागः स्यात्। विद्यायां प्रतिविम्ब ईश्वरोऽविद्यायां प्रतिविम्बस्तु जीवः। यथा सरसि रवेः प्रतिविम्बो यथा च घटे प्रतिविम्बो महदल्पत्वव्यपदेशं भजते, तद्वदित्याह शङ्करस्तदिदं निरसनाय दर्शयति—न चेति। तदुक्तं तत्त्वसन्दर्भे श्रीमज्जीवगोस्वामिभिः—

'न चोपाधितारतम्यमयपरिच्छेदप्रतिबिम्बत्वादिव्यवस्थया तयोर्विभागः स्यात्। तत्र यद्युपाधेरनाविद्यकत्वेन वास्तवत्वं तर्ह्यविषयस्य तस्य परिच्छेद-विषयत्वासम्भवः। निर्धर्मकस्य व्यापकस्य निरवयस्य च प्रतिबिम्बत्वायोगोऽपि; उपाधिसम्बन्धाभावाद् बिम्बप्रतिबिम्बभेदाभावाद् दृश्यत्वाभावाच्च। उपाधिपरिच्छिन्नाकाशस्थज्योतिरंशस्यैव प्रतिबिम्बो दृश्यते, न त्वाकाशस्य, दृश्यत्वाभावादेव। उपाधेराविद्यकत्वे तु तत्र तत्परिच्छिन्नत्वादेरप्यघटमान-त्वादाविद्यकत्वमेवेति घटाकाशादिषु वास्तवोपाधिमयतद्दर्शनया न तेषामवा-स्तवस्वप्रदृष्टान्तोपजीविनां सिद्धान्तः सिध्यति, घटमानाघटमानयोः सङ्गतेः कर्तुमशक्यत्वात्। ततश्च तेषां तत्तत् सर्वमविद्याविलसितमेवेति स्वरूपमप्राप्तेन तेन तेन तत्तद् व्यवस्थापयितुमशक्यम् ॥ ७

বঙ্গানুবাদ

বিম্বস্থানীয় ঈশ্বর, প্রতিবিম্বস্থানীয় জীব, ইহাই প্রতিবিম্বপক্ষ। ঘটের দ্বারা অবচ্ছিন্ন (সসীম) আকাশের ন্যায় অন্তঃকরণের দ্বারা অবচ্ছিন্ন চেতন জীব, ইহা শঙ্করমতাবলম্বিগণ স্বীকার করিয়া থাকেন। কিন্তু রূপরহিত বিভু চৈতন্যের প্রতিবিম্ব অসম্ভব, চৈতন্য অবিষয় বলিয়া পরিচ্ছেদও অযুক্ত। সুতরাং উভয়বাদই অসঙ্গত ॥ ৭

अद्वैतं ब्रह्मणो भिन्नमभिन्नं वा त्वयोच्यते।
आद्ये (१) द्वैतापत्तेरन्ते सिद्धसाधनताश्रुतेः ॥ ८

कान्तिमाला

चौदाद्यमत्वादप्यद्वैतं (२) नाभ्युपेयमित्याह—अद्वैतमिति। जीवब्रह्मणोरद्वैतं ब्रह्मणो भिन्नं न वा, नाद्यः, द्वैतापत्तेः। नान्त्यः, प्रतिपादयन्त्याः श्रुतेः सिद्धसाधनतापातात्, अद्वैतं हि ब्रह्मात्मकमतः सिद्धं तदस्ति किं तत्प्रतिपादनेन ॥ ८

प्रभा

अयुक्तिमत्त्वादप्युपेक्षणीयोऽद्वैतवादः इत्याह—अद्वैतमिति। त्वया-ऽद्वैतवेदान्तिनाऽद्वैतं ब्रह्मणो भिन्नमुच्यतेऽभिन्नं वा? आद्ये भेदपक्षे द्वैता-

---

(१) 'द्वैतापत्तिरन्ते' इति सर्वत्र पाठः।

(२) 'विचारासहत्वात् चौदाद्यमत्वादप्यद्वैतं'—इति 'ग' पुस्तके।

পক্ষেঽন্ত্যেঽদ্বৈতপক্ষে সিদ্ধসাধনতাপ্রসঙ্গাৎ। শ্রুতয়ো হি বহুধাঽদ্বৈতং ব্রহ্ম প্রতিপাদয়ন্তি, তচ্চেৎ ত্বয়োচ্যতে তর্হি সিদ্ধসাধনতা প্রসজ্যেত ॥ ৮

বঙ্গানুবাদ

এখন অদ্বৈতবাদীকে জিজ্ঞাসা করা যায় যে, অদ্বৈত ব্রহ্ম হইতে ভিন্ন অথবা অভিন্ন? যদি ভিন্ন বল, তাহা হইলে দ্বৈতবাদ আসিয়া পড়িল। যদি বল অভিন্ন, তাহা হইলে সিদ্ধসাধনতাদোষ হইল অর্থাৎ শ্রুতিতে যাহা সিদ্ধ আছে, তাহাই তুমি সাধন করিতেছ ॥ ৮

অলীকং নির্গুণং ব্রহ্ম প্রমাণাবিষয়ত্বতঃ।
শ্রদ্ধেয়ং বিদুষাং নৈবেত্যূচিরে তত্ত্ববাদিনঃ ॥৯

ইতি প্রমেয়রত্নাবল্যাং ভেদসত্যত্বপ্রকরণং নাম চতুর্থং প্রমেয়ম্ ॥ ৪

কান্তিমালা

ননু "সাক্ষী চেতাঃ কেবলো নির্গুণশ্চ" (শ্বেত০ ৬।১১) ইতি শ্রুতিঃ নির্গুণমেব ব্রহ্ম বাস্তবং তত্রাহ—অলীকমিতি। ন তাবৎ নির্গুণে ব্রহ্মণি প্রত্যক্ষং প্রমাণং রূপাদ্যভাবাৎ। নাপ্যনুমানং, তদ্ব্যাপ্যলিঙ্গাভাবাৎ। ন চ শব্দঃ প্রবৃত্তিনিমিত্তানাং জাত্যাদীনাং তস্মিন্নভাবাৎ। ন চ তত্র ভাগলক্ষণয়া ভাব্যং, সর্বশব্দাবাচ্যে তদসম্ভবাদিতি পূর্বমেবোক্তম্ ॥ ৯

ইতি প্রমেয়রত্নাবল্যাং ভেদসত্যত্বপ্রকরণং ব্যাখ্যাতম্ ॥ ৪

প্রভা

ননু 'সাক্ষী চেতাঃ কেবলো নির্গুণশ্চে'ত্যাদি-শ্রুতের্নির্গুণমেব ব্রহ্ম সত্যমন্যদুপাধিপরিকল্পিতমিত্যত আহ—অলীকমিতি। ব্রহ্ম নির্গুণং গুণরহিতমিতি যৎ তদলীকমসৎ। কুতঃ? প্রমাণাবিষয়ত্বতঃ—অলীকস্য শশশৃঙ্গাদেঃ প্রত্যক্ষাদিসর্বপ্রমাণাবিষয়ত্বাৎ, ব্রহ্মণো নির্গুণত্বে তস্যাপি সর্বপ্রমাণাগোচরত্বাদলীকত্বমেব প্রসজ্যেত, অতস্তন্মতং বিদুষাং পণ্ডিতানাং শ্রদ্ধেয়ং নৈব ভবতি, ইতি তত্ত্ববাদিনো ব্রহ্মজ্ঞা ঊচিরে প্রতিপেদিরে ॥ ৯

বঙ্গানুবাদ

যদি ব্রহ্ম নির্গুণ হন, শশশৃঙ্গাদির ন্যায় অলীক হইবেন, অলীক বস্তু প্রত্যক্ষাদি কোন প্রমাণের বিষয় হয় না। সুতরাং অদ্বৈতবাদ বিদ্বদ্গণের শ্রদ্ধার্হ নহে, ইহা তত্ত্ববাদিগণ বলিয়া থাকেন ॥ ৯

पञ्चमप्रमेयम्

भगवद्दासत्वप्रकरणम्।

अथ जीवानां भगवद्दासत्वम्।

तथाहि श्वेताश्वतराः पठन्ति—
"तमीश्वराणां परमं महेश्वरं
तं देवतानां परमञ्च दैवतम्।
पतिं पतीनां परमं परस्ताद्-
विदाम देवं भुवनेशमीड्यम्॥ (६।७) इति। (क)

कान्तिमाला

जीवानां हरिदासत्वं प्रतिपादयितुमाह—अथेति। ननु हरिदासत्वे स्वरूपसिद्धे किमर्थम् उपदेशः इति चेत्? तदभिव्यक्त्यर्थः स उपदेश इति गृहाण। एवमाह श्रुतिः—"घृतमिव पयसि निगूढं (१) भूते भूते वसति विज्ञानम्। सततं मन्थयितव्यं मनसा मन्थानदण्डेन"। (ब्रह्मबिन्दु० २०) इति। तमिति ईश्वराणां चतुर्मुखादीनाम्, देवतानाम् इन्द्रादीनाम्, पतीनां दक्षादीनाम्॥ (क)

प्रभा

तमिति। ईश्वराणां ब्रह्मरुद्रादीनां परममुत्कृष्टम्, देवतानामिन्द्रादीनां परमं श्रेष्ठं दैवतम्। पतीनां प्रजापतीनां पतिं परमं सर्वस्मादुत्कृष्टं परस्तादक्षरात् परतो देवं स्वयंप्रकाशं भुवनेशं भुवनानां नियन्तारम्, ईड्यं स्तुत्यं तं परमेश्वरं विदाम अनन्यया भक्त्या उपास्य साक्षात्करवाम॥ (क)

বঙ্গানুবাদ

জীবগণ যে ভগবানের দাস, এ বিষয়ে শ্বেতাশ্বতর-শাখিগণ এরূপ পাঠ করেন,

---

(१) 'गूढ़' इति 'क' तथा 'ख' पुस्तके। 'निरूढ़' इति 'ग' पुस्तके।

—'ব্রহ্মরুদ্রপ্রভৃতি ঈশ্বরগণের অপেক্ষা উৎকৃষ্ট, ইন্দ্রাদি দেবতাগণেরও শ্রেষ্ঠ, প্রজাপতিগণেরও পতি, সর্ব্বাপেক্ষা উৎকৃষ্ট, অক্ষর অপেক্ষা শ্রেষ্ঠ, স্বয়ংপ্রকাশ, সকল লোকের নিয়ন্তা, স্তবযোগ্য পরমেশ্বরকে একান্ত ভক্তিসহকারে আরাধনা করিয়া তাঁহার প্রত্যক্ষ করি ॥' (ক)

स्मृतिश्च—

"ब्रह्मा शम्भुस्तथैवार्कश्चन्द्रमाश्च शतक्रतुः ।
एवमाद्यास्तथैवान्ये युक्ता वैष्णवतेजसा ॥ इत्याद्या ।
सब्रह्मकाः सरुद्राश्च सेन्द्रा देवा महर्षिभिः ।
अर्चयन्ति सुरश्रेष्ठं देवं नारायणं हरिम् ॥" (१) इति च । (ख)

कान्तिमाला

ब्रह्मादीनामैश्वर्यं परमात्मदत्तमित्याह—ब्रह्मेति ॥ (ख)

प्रभा

ब्रह्मेति । ब्रह्मा हिरण्यगर्भः, शम्भुः शिवः, अर्कः सूर्यः, चन्द्रमाश्चन्द्रः शतक्रतुरिन्द्र एवमाद्या देवास्तथैवान्ये देवा वैष्णवतेजसा युक्ताः, सूर्यादीनां तेजो न स्वतः, किन्तु विष्णुतेजसा ते तेजस्विनो भवन्ति । अतस्ते विष्णोर्दासाः ।

सब्रह्मेति । सब्रह्मका ब्रह्मणा सहिताः, सरुद्राश्च एकादशरुद्रैः सह वर्तमानाः, सेन्द्राः इन्द्रेण सहिताः, महर्षिभिः सह देवाः सुरश्रेष्ठं देवं नारायणं हरिमर्चयन्ति पूजयन्ति ॥ (ख)

বঙ্গানুবাদ

স্মৃতিতে উক্ত হইয়াছে—'ব্রহ্মা, শিব, সূর্য্য, চন্দ্র, ইন্দ্র প্রভৃতি সমস্ত দেবতা বিষ্ণুর তেজের দ্বারা যুক্ত, সুতরাং তাঁহারা বিষ্ণুর দাস ।'

'ব্রহ্মা, একাদশ রুদ্র, ইন্দ্রাদি দেবগণ ও মহর্ষিগণ দেবশ্রেষ্ঠ শ্রীহরি নারায়ণদেবের পূজা করিয়া থাকেন ॥' (খ)

---

(१) 'इत्याद्या च' इति 'घ' पुस्तके ।

पाद्मे च जीवलक्षणे—

"दासभूतो हरेरेव नान्यस्यैव कदाचन ॥" इति । (ग)

इति प्रमेयरत्नावल्यां भगवद्दासत्वप्रकरणं नाम

पञ्चमं प्रमेयम् ॥ ५

कान्तिमाला

दासभूत इति । नान्यस्य ब्रह्मरुद्रादेः ॥ (ग)

इति प्रमेयरत्नावल्यां जीवानां हरिदासत्वप्रकरणं व्याख्यातम् ॥ ५

प्रभा

पाद्मे पद्मपुराणे, जीवलक्षणे जीवस्य स्वरूपनिर्णये । जीवो हरेर्भगवतो विष्णोरेव दासभूतः सेवकः, कदाचन कदापि, अन्यस्य देवस्य दासो न । श्रीविष्णुपुराणेऽप्येतदभिप्रेत्याह भगवान् पराशरः—

"जुषन् रजोगुणं तत्र स्वयं विश्वेश्वरो हरिः ।
ब्रह्मा भूत्वाथ जगतो विसृष्टौ संप्रवर्तते ॥
सृष्टञ्च यात्यनुयुगं यावत् कल्पविकल्पना ।
सत्त्वभुग् भगवान् विष्णुरप्रमेयपराक्रमः ॥
तमोद्रेकी च कल्पान्ते रुद्ररूपी जनार्दनः ।
मैत्रेयाखिलभूतानि भक्षयत्यतिभीषणः ॥" इति । (ग)

বঙ্গানুবাদ

পদ্মপুরাণে জীবলক্ষণে এইরূপ উক্ত হইয়াছে—'জীবগণ ভগবান্ শ্রীহরির দাস, অপর দেবের দাস নহে' ॥ (গ)

षष्ठप्रमेयम्

जीवतारतम्यप्रकरणम् ।

अथ जीवानां तारतम्यम् ।

अणुचैतन्यरूपत्वज्ञानित्वाद्यविशेषतः ।
साम्ये सत्यपि जीवानां तारतम्यञ्च साधनात् ॥ १

कान्तिमाला

जीवानां तारतम्यं वक्तुमाह—अथेति । अणु इति । आदिशब्दात् कर्तृत्वभोक्तृत्वापहतपाप्मत्वादीनि ग्राह्याणि । साधनादिति । कर्मरूपात् भक्तिरूपाच्च इत्यर्थः । कर्मतारतम्यादैहिकं, भक्तितारतम्यात्तु पारत्रिकं फलतारतम्यं बोध्यम् ॥ १

प्रभा

जीवानां तारतम्यं प्रतिपादयितुमुपक्रमते—अथ इति । अणुवति । जीवानामणुचैतन्यरूपत्व-ज्ञानित्वाद्यविशेषतः—अणुचैतन्यरूपत्वस्य ज्ञानस्वरूपत्वेऽपि ज्ञानाश्रयत्वस्य च विशेषाभावात् साम्ये तुल्यत्वे सत्यपि साधनादुपायात् कर्मरूपाद्भक्तिरूपाच्च तारतम्यमुत्कृष्टापकृष्टभावो विद्यते । यद्यपि सर्वे जीवा अणुत्वे सति चेतनरूपा ज्ञानरूपत्वेऽपि ज्ञानाश्रयाश्च,अतस्तुल्यास्तथापि कर्मादिसाधनतारतम्येन तेषां तारतम्यं भवति । जीवस्वरूपमुक्तं पाद्मोत्तरखण्डे प्रणवव्याख्याने—

"ज्ञानाश्रयो ज्ञानगुणश्चेतनः प्रकृतेः परः ।
न जातो निर्विकारश्च एकरूपः स्वरूपभाक् ॥
अणुर्नित्यो व्याप्तिशीलश्चिदानन्दात्मकस्तथा ।
अहमर्थोऽव्ययः क्षेत्री भिन्नरूपः सनातनः ॥
अदाह्योऽच्छेद्यः अक्लेद्यः अशोष्योऽक्षर एव च ।
एवमादिगुणैर्युक्तः शेषभूतः परस्य वै ॥

मकारेणोच्यते जीवः क्षेत्रज्ञः परवान् सदा।
दासभूतो हरेरेव नान्यस्यैव कदाचन॥" इति

तदुक्तं श्रीपरमात्मसन्दर्भे श्रीमज्जीवगोस्वामिभिः—'तदेवमनन्ता एव जीवाख्यास्तटस्थाः शक्तयः। तत्र तासां वर्गद्वयम्। एको वर्गोऽनादित एव भगवदुन्मुखः, अन्यस्त्वनादित एव भगवत्पराङ्मुखः। स्वभावतस्तदीयज्ञानभावात्तदीयज्ञानाभावाच्च। तत्र प्रथमोऽन्तरङ्गाशक्तिविलासानुगृहीतो नित्यभगवत्परिकररूपो गरुड़ादिकः।' इति॥ १

বঙ্গানুবাদ

এখন জীবসমূহের তারতম্য অর্থাৎ উৎকর্ষ ও অপকর্ষ বর্ণিত হইতেছে। সমস্ত জীবই অণুচৈতন্যস্বরূপ এবং জ্ঞানস্বরূপ হইয়াও জ্ঞানের আশ্রয়, এইরূপে সকল জীব তুল্য হইলেও কর্ম্ম, ভক্তি-প্রভৃতি সাধনতারতম্যবশতঃ উৎকৃষ্ট ও অপকৃষ্ট জীব প্রতীয়মান হয়॥ ১

तत्राणुत्वमुक्तं श्वेताश्वतरैः—
"बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥" (५।९) इति।(क)

कान्तिमाला

बालाग्रेति। स च जीवो भगवत्प्रपन्नः सन् आनन्त्याय मोक्षाय (१) कल्पते, अन्तो मरणं, तद्राहित्याय इत्यर्थः (२)॥ (क)

प्रभा

तत्रेति। तत्र तेषु अणुचैतन्यरूपत्व-ज्ञानित्वादिषु अणुत्वम् अणुपरिमाणत्वं श्वेताश्वतरशाखिभिरुच्यते—बालेति। बालाग्रशतभागस्य केशाग्रशतांशस्य शतधा शतकृत्वः कल्पितस्य विभक्तस्य स भागोऽंशो जीवस्तद्वत् सूक्ष्मो जीवात्मा विज्ञेयः ज्ञातव्यः। स च जीवो भगवत्प्रसादादानन्त्याय अन्तः मरणं तद्राहित्यमानन्त्यं तस्मै मुक्त्यै इत्यर्थः कल्पते समर्थो भवति॥ (क)

---

(१) 'मोक्षाय' इति 'क' तथा 'ख' पुस्तके नास्ति।

(२) 'इत्यर्थात्' इति 'ग' तथा 'घ' पुस्तके।

বঙ্গানুবাদ

পূর্ব্বোক্ত অণুচৈতন্যরূপ ও জ্ঞানিত্বের মধ্যে শ্বেতাশ্বতর-শাখিগণ জীবের অণুত্ব বলিতেছেন। 'যদি কেশাগ্রের শত ভাগের এক ভাগকে শত ভাগে বিভক্ত করা যায়, তাহা হইলে জীবাত্মা সেইরূপ সূক্ষ্ম। সেই জীব ভগবদনুগ্রহে মুক্তিলাভ করেন ॥'(ক)

চৈতন্যরূপত্বং জ্ঞানিত্বাদিকঞ্চ ষট্প্রশ্ন্যাং—
"এষ হি দ্রষ্টা স্প্রষ্টা শ্রোতা ঘ্রাতা রসয়িতা মন্তা
বোদ্ধা কর্তা বিজ্ঞানাত্মা পুরুষঃ ॥" (প্রশ্ন০ ৪।৯) ইতি। (খ)

কান্তিমালা

জ্ঞানিত্বাদিকঞ্চ ইত্যত্রাদিপদাৎ কর্ত্তৃত্বভোক্তৃত্বে। এষ হীতি। এষ বিজ্ঞানাত্মা পুরুষো জীবস্তস্য দ্রষ্টেত্যাদিনা রূপাদিভোগঃ প্রস্ফুটঃ। প্রকৃতেঃ কর্ত্তৃত্বে "যজেত, ধ্যায়েত্" ইত্যাদি-শ্রুতিবৈয়র্থ্যং, সমাধ্যভাবশ্চ। প্রকৃতেরন্যোঽহমস্মীতি সমাধিঃ। ন চৈষ জড়ায়াস্তস্যাঃ সম্ভবেত্, ন চ তস্য তস্যাত্মত্বং সম্ভবতি ॥ (খ)

প্রভা

চৈতন্যেতি। জীবানাং চৈতন্যস্বরূপত্বং জ্ঞানিত্বাদিকং জ্ঞানস্বরূপত্বেঽপি জ্ঞানাশ্রয়ত্বাদিকঞ্চ ষটপ্রশ্ন্যাং প্রশ্নোপনিষদি প্রতিপাদিতম্। এষ ইতি। এষ বিজ্ঞানাত্মা পুরুষো জীবো দ্রষ্টা দর্শনকর্তা, এবং সর্বত্র। তদুক্তং শ্রীরামানুজ-ভাষ্যে—'অত্র বোদ্ধা কর্তা বিজ্ঞানাত্মেতি নির্দেশাদাত্মনো জ্ঞাতৃত্বমেব ন তু জ্ঞানরূপত্বমিতি বদন্তস্তার্কিকাশ্চ। জ্ঞানত্বমেব ন তু জ্ঞাতৃত্বমিতি বদন্তো মৃষাবাদিনশ্চ নিরস্তাঃ।' 'স পরেঽক্ষরে আত্মনি সংপ্রতিষ্ঠতে' ইত্যপরভাগঃ।'(খ)

বঙ্গানুবাদ

প্রশ্নোপনিষদে জীবের চৈতন্যস্বরূপত্ব, জ্ঞানিত্বপ্রভৃতি উক্ত হইয়াছে যথা—'এই জীবাত্মা দ্রষ্টা, শ্রোতা, আঘ্রাণকর্ত্তা, রসাস্বাদনকারী, মননশীল, বোদ্ধা ও কর্ত্তা ॥' (খ)

আদিনা গুণেন দেহব্যাপিত্বঞ্চ শ্রীগীতাসু—
"যথা প্রকাশয়ত্যেকঃ কৃৎস্নং লোকমিমং রবিঃ।
ক্ষেত্রং ক্ষেত্রী তথা কৃৎস্নং প্রকাশয়তি ভারত ॥" (১৩।৩৩) ইতি।(গ)

कान्तिमाला

यथेति विग्रहार्थम् ॥ (ग)

प्रभा

आदिनेति। आदिना 'अणुचैतन्यरूपत्वज्ञानित्वाद्यविशेषतः' इत्यत्रादि-पदेनेत्यर्थः। गुणेन चैतन्यरूपगुणेन। अणोरपि जीवस्याखण्डदेहचेतयि-तृत्वं प्रभावविशेषाद् गुणादेव भवति। तथा चोक्तं परमात्मसन्दर्भे श्रीमज्जीव-गोस्वामिभिः—'यथा शिरआदौ धार्यमाणस्य जतुजटितस्यापि महौषधि-खण्डस्याखण्डदेहपुष्टिकरत्वादिहेतुप्रभावः। यथा वाऽयस्कान्तादेर्लौह-चालनादिहेतुप्रभाव एव तद्वत्।' तथा च महाभारते—

"अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति।
यथा व्याप्य शरीराणि हरिचन्दनविप्रुषः॥"

यथेति। हे भारत! यथा सूर्यः प्रभया इदं कृत्स्नं समग्रं लोकं दृश्यं वस्तु प्रकाशयति, यथा क्षेत्री जीवश्चैतन्यगुणात् कृत्स्नं क्षेत्रं देहं प्रकाशयति॥ (ग)

বঙ্গানুবাদ

'অণুচৈতন্যরূপত্ব-জ্ঞানিত্বাদ্যবিশেষতঃ' এই কারিকায় যে আদি পদ আছে, তাহার দ্বারা চৈতন্যরূপগুণ ও তাহা দেহব্যাপী বুঝিতে হইবে। এই চৈতন্যরূপ গুণ যে দেহব্যাপী, তাহা শ্রীমদ্ভগবদ্গীতায় উক্ত হইয়াছে, যথা—'হে অর্জ্জুন। যেমন সূর্য্য প্রভার দ্বারা সমস্ত জগৎ প্রকাশিত করে, সেইরূপ জীব চৈতন্যরূপ গুণের দ্বারা সমস্ত দেহ প্রকাশ করিয়া থাকে॥' (গ)

आह चैवं सूत्रकारः—

"गुणाद्वालोकवत्।" (ब्रह्मसूत्रं २।३।२४) इति। (घ)

कान्तिमाला

गुणाद्वेति। आलोको दीपादिर्यथा (१) प्रभाख्यगुणात् कृत्स्नं गेहं व्याप्नोति, एवं चेतनाख्यगुणात् कृत्स्नं देहं जीव इत्यर्थः॥ (घ)

---

(१) 'दीपार्चिर्यथा' इति पाठान्तरम्—इति 'घ' पुस्तकेऽधस्ताद् धृतः पाठः।

प्रभा

'अणुरपि जीवश्चेतयितृत्वलक्षणेन चिद्गुणेन निखिलदेहव्यापी स्यात्, आलोकवत्। यथा सूर्यादिरालोक एकदेशस्थोऽपि प्रभया कृत्स्नं खगोलं व्याप्नोति, तद्वत्' इति गोविन्दभाष्यम् ॥ (घ)

বঙ্গানুবাদ

সূর্য্যাদি আলোক যেমন একদেশে অবস্থিত থাকিয়াও প্রভার দ্বারা সমস্ত আকাশমণ্ডলে ব্যাপ্ত হয়, সেইরূপ জীব চৈতন্যরূপ গুণের দ্বারা সমস্ত দেহে ব্যাপ্ত হয় ॥ (ঘ)

गुणनित्यत्वमुक्तं वाजसनेयिभिः—

"अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मा ।" (बृह० ४।५।१४) इति। (ङ)

कान्तिमाला

अविनाशीति। अरे मैत्रेयि! अयमात्मा जीवः, स्वरूपतो(१)ऽविनाशी। अनुच्छित्तय उच्छेदरहिता धर्मा ज्ञानादयो यस्य सः अनुच्छित्तिधर्मा, गुणतोऽप्यविनाशीत्यर्थः। न चानुच्छित्तिरेव (२) धर्मो यस्य इति व्याख्यातव्यम्। अस्यार्थस्य अविनाशीत्यनेनैवावगतत्वात् ॥ (ङ)

प्रभा

गुणेति। वाजसनेयिभिः शुक्लयजुर्वेदविद्भिः, गुणनित्यत्वं गुणस्य चैतन्याख्यस्य नित्यत्वमुक्तम्। अविनाशीति। अरे मैत्रेयि! अयमात्मा अविनाशी विनाशरहितः, अनुच्छित्तिधर्मा अस्य उच्छेदलक्षणो धर्मो नास्ति, स्वरूपानुबन्धि-नित्यधर्म इत्यर्थः ॥ (ङ)

---

(१) 'पापाद्विरमति' इतिवत् 'स्वरूपतः' इति अपादाने पञ्चमी। 'जुगुप्सा-विराम-प्रमादार्थानामुपसंख्यानम्' इति वार्तिकाद् विरामो ह्यभावः। 'विरामोऽवसानम्' इत्यत्र तथा व्याख्यानात्। विनाशोऽप्यभाव एव, 'पापाद् विरमति' इत्यत्र पापाभाववानिति वत् स्वरूपतोऽविनाशीत्यत्र स्वरूपविनाशाभाववानित्यर्थः।' इत्यतिरिक्तपाठः 'ग' पुस्तके दृश्यते!

(२) 'न त्वनुच्छित्तिरेव' इति 'घ' पुस्तके।

বঙ্গানুবাদ

শুক্লযজুর্ব্বেদিগণ চৈতন্তরূপ গুণকে নিত্য বলিয়াছেন যথা—'হে মৈত্রেয়ি! আত্মাতে কোনরূপ অনিত্য ধর্ম্ম নাই, অর্থাৎ আত্মাতে স্বরূপভূত নিত্য ধর্ম্ম বিদ্যমান আছে॥' (৬)

एवं साम्येऽपि वैषम्यमैहिकं कर्मभिः स्फुटम्।
प्राहुः पारत्रिकं तत्तु भक्तिभेदैः सुकोविदः॥ २

कान्तिमाला

एवम् अणुत्वादिभिर्जीवानां साम्यमुक्त्वा, अर्थसाधनहेतुकं (१) वैषम्यमाह—एवमिति। ऐहिकं प्रपञ्चगतं, पारत्रिकं भगवल्लोकगतम्॥ २

प्रभा

साम्यमुक्त्वा वैषम्यमाह—एवमिति। एवमुक्तप्रकारैरणुत्वादिधर्मैर्जीवानां साम्ये तुल्यत्वे विद्यमानेऽपि कर्मभिः भक्तिभेदैर्भक्तिविशेषैरैहिकं जागतिकं पारत्रिकं पारलौकिकं च वैषम्यं भेदं स्फुटं तत्तु सुकोविदस्तत्त्वविदः प्राहुर्वदन्ति। अयमाशयः—जीवः कर्मभिरस्मिन् जगत्युत्कृष्टापकृष्टभावं प्राप्नोति भक्तेस्तारतम्येन स्वरूपशक्तिविजृम्भितं नित्यधामलक्षणं श्रीवैकुण्ठगोलोकादिकं प्राप्य तद्गतसेवादितारतम्यञ्च लभते॥ २

বঙ্গানুবাদ

পূর্ব্বোক্তরূপ অণুত্বাদি-ধর্ম্মসমূহের দ্বারা সকল জীব তুল্য হইলেও কর্ম্ম ও ভক্তিরূপ সাধনের দ্বারা ঐহিক ও পারলৌকিক স্পষ্ট বৈষম্য আছে, এ কথা তত্ত্ববিদ্‌গণ বলিয়া থাকেন। জীব কর্ম্মের দ্বারা উৎকৃষ্ট ও অপকৃষ্ট যোনি প্রাপ্ত হয় এবং ভক্তির তারতম্যবশতঃ বৈকুণ্ঠ, গোলোকপ্রভৃতি লোকে গমন করিয়া থাকেন এবং সেবাদির তারতম্য লাভ করেন॥ ২

तथाहि कौथुमाः पठन्ति—
"यथाक्रतुरस्मिँल्लोके पुरुषो भवति
तथेतः प्रेत्य भवति॥" इति। (क)

---

(१) 'अथ साधनहेतुकं'—इति 'घ' पुस्तके।

কান্তিমালা

যথেতি। অস্মিন্ লোকে পুরুষো যথাক্রতুঃ যাদৃশং সাধনং করোতি, তথা ইতঃ প্রেত্য অস্মাৎ লোকাৎ পরলোকং গত্বা ভবতি। সাধনানুরূপং ফলং ভজতি ইত্যর্থঃ॥ (ক)

প্রভা

তথেতি। কৌথুমাঃ কুথুমশাখিনঃ। যথেতি। অস্মিন্ লোকে পুরুষো যথাক্রতুর্যাদৃশসাধনবান্ ভবতি, তথা ইতোঽস্মাল্লোকাৎ প্রেত্য পরলোকং গত্বা মৃত্বেতি যাবৎ, তাদৃশ এব ভবতি, সাধনানুরূপং ফলঞ্চ লভত ইত্যর্থঃ॥ (ক)

বঙ্গানুবাদ

এ বিষয়ে কুথুমশাখিগণ পাঠ করিয়া থাকেন যথা—'মানব এই সংসারে থাকিয়া যেরূপ সাধনানুষ্ঠান করে, এই লোক হইতে পরলোকে গমন করিয়া তাদৃশ ফল লাভ করিয়া থাকে'॥ (ক)

স্মৃতিশ্চ—

"যাদৃশী ভাবনা যস্য সিদ্ধির্ভবতি তাদৃশী॥" ইতি। (খ)

কান্তিমালা

যাদৃশীতি গদিতার্থম্॥ (খ)

প্রভা

যাদৃশীতি। যাদৃশী ভাবনা সংকল্পঃ সাধনমিতি যাবৎ। তাদৃশী সিদ্ধির্লোকাদিপ্রাপ্তির্ভবতি, সংকল্পানুরূপা সিদ্ধিরিতি ভাবঃ। তথা চোক্তং শ্রীমদ্ভগবদ্গীতায়াং—

'যে যথা মাং প্রপদ্যন্তে তাংস্তথৈব ভজাম্যহম্।' (৪।১১) ইতি।

'দেবে তীর্থে তথা মন্ত্রে ব্রাহ্মণে ভেষজে গুরৌ।' ইতি

শ্লোকপূর্বভাগঃ॥ (খ)

বঙ্গানুবাদ

যেরূপ সঙ্কল্প, সেইরূপ সিদ্ধিলাভ হয়॥ (খ)

शान्त्याद्या रतिपर्यन्ता ये भावाः पञ्च कीर्तिताः ।
तैर्दैवं स्मरतां पुंसां तारतम्यं मिथो मतम् ॥ ३

इति प्रमेयरत्नावल्यां जीवतारतम्यप्रकरणं नाम
षष्ठं प्रमेयम् ॥ ६

कान्तिमाला

उपसंहरति—शान्त्याद्या इति । शान्ति-दास्य-सख्य-वात्सल्य-मधुररतयः पञ्च भावाः । तैर्दैवं भजतां वैषम्यं प्रस्फुटम् । ये खलु विष्वक्सेनानुयायिनः "निरञ्जनः परमं साम्यमुपैति" (मुण्ड० ३।१।३) इति श्रुतेः, मोक्षे जीवानां परमं साम्यं स्वीचक्रुः, तेषामपि वैषम्यं दुष्परिहरं, जीवान् प्रति श्रीदेव्याः शेषित्वाङ्गीकाराद् विष्वक्सेनस्य नियामकत्वस्वीकाराच्च (१) ॥ ३

इति प्रमेयरत्नावल्यां जीवतारतम्यप्रकरणं व्याख्यातम् ॥ ६

प्रभा

न केवलं कर्मादितारतम्याज्जीवभेदो भावभेदादपि तमाह—शान्त्येति । शान्त्याद्या रतिपर्यन्ताः शान्ति-दास्य-सख्य-वात्सल्य-मधुररतिरूपा ये पञ्च भावाः कीर्त्तिता भक्तिशास्त्रविज्ञैरिति शेषः । तैः पञ्चभिर्भावैः स्मरतां ध्यायतामुपासीनानामिति यावत् । पुंसां जनानां मिथः परस्परं तारतम्यं भवति । अयमभिप्रायः—पञ्चानां भावानां मध्ये यस्तावद् यं कञ्चन भावं गृहीत्वा भगवन्तमुपास्ते तद्भावतारतम्यादपि जीवतारतम्यं वक्तव्यम् । तदुक्तं श्रीविश्वनाथचक्रवर्तिभिर्भक्तिरसामृतसिन्धुविन्दौ—

'एवं शान्तदास्यसख्यवात्सल्योज्ज्वलाख्य पञ्च मुख्यरसा यथोत्तरं श्रेष्ठाः । शान्ते श्रीकृष्णनिष्ठबुद्धिवृत्तिता, दास्ये सेवा, सख्ये निःसम्भ्रमता, वात्सल्ये स्नेहः, उज्ज्वलेऽङ्गसङ्गदानेन सुखमुत्पाद्यम् । एवं पूर्वपूर्वगुणादुत्तरोत्तरस्याः श्रेष्ठाः स्युः ॥'३

বঙ্গানুবাদ

শান্ত, দাস্য, সখ্য, বাৎসল্য ও মধুর এই পাঁচটী ভাব ভক্তিশাস্ত্রে উক্ত হইয়াছে। সেই সমস্ত ভাব লইয়া যাঁহারা ভগবানের উপাসনা করেন, তাহার তারতম্যবশতঃ জীবেরও তারতম্য হইয়া থাকে। উক্ত পাঁচটী ভাবই রতিরূপ ॥ ৩

---

(१) 'परमसाम्यं गतया लक्ष्म्या नित्यदेहित्वं परमसाम्यं' गतस्य विष्वक्सेनस्य देहाभावेन नियामकत्वम् उपदिष्टं त्वं न घटतेत्यर्थः' इत्यपि पाठः 'ग' पुस्तके ।

सप्तमप्रमेयम्

श्रीकृष्णप्राप्तिरूपमोक्षप्रकरणम् ॥

अथ श्रीकृष्णप्राप्तेर्मोक्षत्वम् ।

यथा—

"ज्ञात्वा देवं सर्वपाशापहानिः ॥" (श्वेत० १।१०) इत्यादि । (क)

"एको वशी सर्वगः कृष्ण ईड्यः ॥" (गोपालपूर्व० २०)

इत्यादि च । (ख)

कान्तिमाला

कृष्णप्राप्तेर्मुक्तित्वं वक्तुमाह—ज्ञात्वेत्यादि (१) गदितार्थम् ॥ (क—ख)

प्रभा

अथेति । श्रीकृष्णप्राप्तिरेव मोक्षः । श्रीकृष्णस्य प्राप्तिः प्रेमभक्तिविषयत्वेन साक्षात्कारः ॥

ज्ञात्वेति एक इति च श्रुतिद्वयं व्याख्यातं तारतम्यप्रकरणे ॥ (क-ख)

बहुधा बहुभिर्वेशैर्भाति कृष्णः स्वयं प्रभुः ।

तमिष्ट्वा तत्पदे नित्ये सुखं तिष्ठन्ति मोक्षिणः ॥ १

इति प्रमेयरत्नावल्यां श्रीकृष्णप्राप्तेर्मोक्षत्वप्रकरणं नाम

सप्तमं प्रमेयम् ॥ ७

कान्तिमाला

बहुधेति । श्रीकृष्णोपासकानामिव श्रीरामाद्युपासकानाञ्च मोक्षः । सुखतारतम्यं तु अवर्जनीयम् ॥ १

इति प्रमेयरत्नावल्यां भक्तमोक्षकत्वप्रकरणं व्याख्यातम् ॥ ७

---

(१) 'गतार्थम्' इति 'ग' पुस्तके ।

प्रभा

बहुधेति। स्वयं प्रभुः अनन्यापेक्षिरूपः श्रीकृष्णः, स्वयंप्रभ इति पाठे तु स्वयंप्रकाशः श्रीकृष्णः, बहुधा विविधैर्लीलोपयोगिभिर्बहुभिर्वपुर्भिः श्रीरामनृसिंहादिरूपैर्भाति प्रकाशते। मोक्षिणः पार्षदभावं गता मुक्ता जीवास्तं कृष्णमिष्ट्वा परया भक्त्याराध्य नित्ये शाश्वते तत्पदे वैकुण्ठगोलोकादौ धाम्नि सुखमप्राकृतं सुखं यथा स्यात् तथा तिष्ठन्ति ॥ १

বঙ্গানুবাদ

অনন্যাপেক্ষস্বরূপ শ্রীকৃষ্ণ শ্রীরাম-নৃসিংহপ্রভৃতি বিবিধ রূপে প্রকাশ পাইয়া থাকেন। মুক্ত জীবগণ অনন্যা ভক্তির দ্বারা শ্রীকৃষ্ণের অর্চ্চনা করিয়া নিত্য বৈকুণ্ঠ, গোলোকাদিধামে সুখে অবস্থান করেন॥ ১

अष्टमप्रमेयम्

विशुद्धभक्तेर्मुक्तिप्रदत्वप्रकरणम्।

अथैकान्तभक्तेर्मोक्षहेतुत्वम्।

यथा श्रीगोपालतापन्यां—
"भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्यम् ॥" (गोपालपूर्व० १४) इति।(क)

कान्तिमाला

निष्कामभक्तेर्मुक्तिकारत्वं वक्तुमाह—अथेति। भक्तिरस्येति। अस्य श्रीकृष्णस्य आनुकूल्येन श्रवणादिका भक्तिः भजनम्। तथा अमुष्मिन् कृष्णे, मनःकल्पनं चित्तानुरञ्जनञ्च। मनः कल्प्यते अनुरज्यते अर्प्यतेऽनेन इति निरुक्तेः। तादृशश्रवणादिहेतुको भावस्तदित्यर्थः। उत्तमात्वसिद्धये—तदिहेति। इह लोके परलोके चोपाधिनैरास्येन कृष्णान्यफलाभिलाषराहित्येन तन्मात्रस्पृहया जायमानमित्यर्थः। एतदेव नैष्कर्म्यम् आनुसङ्गेन मोक्षकरमित्यर्थः ॥ (क)

प्रभा

अथेति । एकान्तभक्तेरनन्यभक्तेर्ह्लादिनीसारसमवेतसंवित्साररूपायाः । एकान्तभक्तिस्वरूपत्वं ग्रन्थकृतैवोक्तं पीठकभाष्ये—'अत्रैवं पुनश्चिन्त्यते भगवद्वशीकारहेतुभूता भक्तिः किंस्वरूपेति । किं प्राकृतसत्त्वमयज्ञानानन्दरूपा, किं वा भगवज्ज्ञानानन्दरूपा, अथवा जैवज्ञानानन्दरूपा, उत ह्लादिनीसारसमवेतसंवित्साररूपेति । नाद्यः, भगवतो मायावश्यत्वाश्रवणात् स्वतः पूर्णत्वाच्च । न द्वितीयः, अतिशयासिद्धेः । नापि तृतीयः, जैवयोस्तयोः क्षोदिष्ठत्वात् । किन्तु चतुर्थ एवासौ भवेत्' इति । श्रीगोपालतापन्यां श्रीगोपालपूर्वतापन्यामित्यर्थः । भक्तिरिति । अस्य श्रीकृष्णस्य भजनमानुकूल्येन श्रवणकीर्तनादिका भक्तिः । आनुकूल्यञ्चात्र उद्देश्याय श्रीकृष्णाय रोचमाना प्रवृत्तिः । इहास्मिन् लोकेऽमुत्र स्वर्गादौ च उपाधिनैरास्येनोपाधिपरित्यागेन कृष्णान्यतात्पर्यराहित्येनेत्यर्थः, तत् तत्र श्रीकृष्णे मनःकल्पनं, मनः कल्प्यतेऽनुरज्यतेऽर्प्यते इति निरुक्तेश्चित्तानुरञ्जनात्मकः श्रवणकीर्तनादिहेतुको भाव इत्यर्थः । नैष्कर्म्यं नित्यनैमित्तिकादिकर्मयोगाद्यनावृतम् । भक्तेरुत्तमात्वसिद्धये—इहामुत्रोपाधिनैरास्येनेति । एव-शब्देन सकामा भक्तिर्व्यावृत्ता ॥ (क)

বঙ্গানুবাদ

এখন অনন্যা ভক্তি যে মোক্ষহেতু, ইহাই বলা হইতেছে। শ্রীগোপালপূর্বতাপনীয়োপনিষদে উক্ত হইয়াছে, যথা—'অনুকূলভাবে শ্রীকৃষ্ণের ভজন অর্থাৎ শ্রবণ, কীর্ত্তন প্রভৃতির নাম ভক্তি। ঐহিক ও পারত্রিক ফলকামনাপরিত্যাগপূর্ব্বক জ্ঞান ও কর্ম্মপ্রভৃতির দ্বারা অমিশ্রিতভাবে চিত্তের প্রসন্নতাজনক শ্রীকৃষ্ণে শ্রবণ-কীর্ত্তনাদিরূপ যে ভাববিশেষ, তাহাই উত্তমা ভক্তি বলিয়া কথিত হয় ॥ (ক)

नारदपञ्चरात्रे च—

"सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ॥" इति । (ख)

कान्तिमाला

सर्वोपाधीति । सर्वैरुपाधिभिः कृष्णान्याभिलाषैर्विनिर्मुक्तं, निर्मलं कर्माद्यनाविलं

तत्परत्वेनानुकूल्येन विशिष्टम्। हृषीकेण श्रोत्रादिना हृषीकेशस्य सेवनं कायिकं वाचिकं मानसिकं च परिशीलनं भक्तिरित्यर्थः। अत्र उत्तमात्वं स्फुटम्॥ (ख)

प्रभा

सर्वेति। सर्वोपाधिविनिर्मुक्तं—सर्वैरुपाधिभिः कृष्णान्याभिलाषैर्भोग-मोक्षाद्यभिलाषैरिति यावत्, विनिर्मुक्तं रहितम्। तत्परत्वेनानुकूल्येन निर्मलं ज्ञानकर्माद्यनावृतं, हृषीकेण सर्वेन्द्रियेण हृषीकेशसेवनं हृषीकेशस्य सर्वान्तर्यामि-श्रीकृष्णस्य सेवनं कायिकं वाचिकं मानसिकञ्च परिशीलनं भक्तिरुच्यते॥ (ख)

বঙ্গানুবাদ

ভোগ-মোক্ষাদির অভিলাষ ত্যাগ করিয়া শ্রোত্রাদি ইন্দ্রিয়ের দ্বারা অনুকূলভাবে জ্ঞানকর্ম্মাদি-আবরণবিহীন ভগবৎসেবাকে ভক্তি বলা হয়॥ (খ)

नवधा चैषा भवति—

यदुक्तं श्रीभागवते—

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ (७।५।२३)
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥" (७।५।२४) इति। (ग)

कान्तिमाला

तद्भेदानाह(१)—श्रवणमिति। एषा नवलक्षणा भक्तिरर्पितैव पुंसा क्रियते, न तु कृत्वा अर्पिता (२)। तत्रापि अद्धा साक्षादेव, न तु फलान्तरेच्छाद्यव्यवधानेन क्रियते चेदुत्तममधीतमुत्तमा भक्तिरित्यहं मन्ये॥ (ग)

प्रभा

नवधेति। एषा भक्तिः। नवधा नवलक्षणा। नवलक्षणात्वं चास्याः क्रमेण प्रदर्श्यते। हिरण्यकशिपुः पुत्रं 'प्रह्लादमुवाच—प्रह्लादोऽनूच्यतां तात! स्वधीतं किञ्चिदुत्तमम्। कालेनैतावतायुष्मन् यदशिक्षद् गुरोर्भवान्॥७।५।२२।

---

(१) 'साधनभेदानाह'—इति 'ग' पुस्तके।

(२) 'अर्प्यते' इति 'ग' पुस्तके।

इति। तच्छ्रुत्वा प्रह्लादः तं श्रवणादिकं प्रत्यवोचत्। तथाचोक्तं श्रीभक्तिरसामृतसिन्धौ पूर्वविभागे द्वितीयलहर्यां—

'श्रवणं नामचरितगुणादीनां श्रुतिर्भवेत्। इति।

तच्च श्रवणं त्रिविधं नामश्रवणं, चरितश्रवणं गुणश्रवणञ्च। अत्रायं निष्कर्षः प्रोक्तः श्रीमज्जीवगोस्वामिभिः—श्रवणं नामरूपगुणपरिकरलीलामयशब्दानां श्रोत्रस्पर्शः। 'तत्र प्रथमं नाम्नः श्रवणमन्तःकरणशुद्धार्थमपेक्ष्यम्। शुद्धे चान्तःकरणे रूपश्रवणेन तदुदययोग्यता भवति। सम्यगुदिते च रूपे गुणानां स्फुरणं सम्पद्यते। सम्पन्ने गुणानां स्फुरणे परिकरवैशिष्ट्येन तद्वैशिष्ट्यं सम्पद्यते। ततस्तेषु नामरूपगुणपरिकरेषु सम्यक् स्फुरितेषु लीलानां स्फुरणं भवतीत्यभिप्रेत्य साधनक्रमो लिखितः।' एवं कीर्तनस्मरणयोर्ज्ञेयम्। अथ कीर्तनम्—

'नामलीलागुणादीनामुच्चैर्भाषा तु कीर्तनम्।'

तच्चापि त्रिविधं नामकीर्तनं, गुणकीर्तनं लीलाकीर्तनञ्चेति। अस्मिन् कीर्तने निजदैन्यनिजाभीष्टविज्ञप्ति-स्तवपाठावप्यन्तर्भाव्यौ। अथ स्मरणम्—

'यथा कथञ्चिन्मनसा सम्बन्धः स्मृतिरुच्यते।' इति।

स्मृतिः स्मरणम्, तच्च मनसाऽनुसन्धानम्। 'अथ स्मरणापत्त्यादिभिः शुद्धान्तःकरणश्चे'तन्निर्विद्यमानानामिच्छतामकुतोभयमि'त्याद्युक्त्वा नामकीर्तनापरित्यागेन स्मरणं कुर्यात्।' 'तदिदं स्मरणं पञ्चविधम्। 'यत्किञ्चिदनुसन्धानं स्मरणं, सर्वतश्चित्तमाकृष्य सामान्याकारेण मनोधारणं धारणा, विशेषतो रूपादिचिन्तनं ध्यानम्, अमृतधारावदविच्छिन्नं तद् ध्रुवानुस्मृतिः। ध्येयमात्रस्फुरणं समाधिरिति। अथ रुचिः। शक्तिश्च चेत्तदपरित्यागेन पादसेवा च कर्तव्या। सेवास्मरणसिद्धार्थञ्च सा कैश्चित् क्रियते। पादसेवायां पादशब्दो भक्त्यैव निर्दिष्टः, ततः सेवायां सादरत्वं विधीयते। सेवा च कालदेशाद्युचिता परिचर्यादिपर्याया।

'परिचर्या तु सेवोपकरणादिपरिष्क्रिया।
तथा प्रकीर्णकच्छत्रवादित्राद्यैरुपासना॥' इति।

अथार्चनम्। 'शुद्धिन्यासादिपूर्वाङ्ग-कर्मनिर्वाहपूर्वकम्।
अर्चनन्तूपचाराणां स्यान्मन्त्रेणोपपादनम्॥' इति।

अर्चनमार्गे श्रद्धा चेदाश्रितमन्त्रगुरुस्तं विशेषतः पृच्छेत्।

तथोदाहृतं श्रीमद्भागवते—

'लब्धानुग्रह आचार्यात्तेन सन्दर्शितागमः ।
महापुरुषमभ्यर्च्चेन्मूर्त्याभिमतयात्मनः ॥' ११।३।४८ । इति

श्रीनारदादिवर्त्मानुसरद्भिः श्रीभगवता सह सम्बन्धविशेषं दीक्षाविधानेन श्रीगुरुचरणसम्पादितं चिकीर्षद्भिः कृतायां दीक्षायामर्च्चनमवश्यं क्रियेतैव ।

'दिव्यं ज्ञानं यतो दद्यात् कुर्यात् पापस्य संक्षयम् ।
तस्माद्दीक्षेति सा प्रोक्ता देशिकैस्तत्त्वकोविदैः ॥
अथ गुरुं प्रणम्यैव सर्वस्वं विनिवेद्य च ।
गृह्णीयाद्वैष्णवं मन्त्रं दीक्षापूर्वं विधानतः ॥' इत्यागमात् ।

दिव्यं ज्ञानं ह्यत्र श्रीमति मन्त्रे भगवत्स्वरूपज्ञानं तेन भगवतः सम्बन्धविशेषज्ञानञ्च । यथा—पाद्मोत्तरखण्डादावष्टाक्षरादिकमधिकृत्य विवृतमस्ति । ये तु सम्पत्तिमन्तो गृहस्थास्तेषान्त्वर्च्चनमार्ग एव मुख्यः । यथोक्तं श्रीवसुदेवं प्रति मुनिभिः—

'अयं स्वस्त्ययनः पन्था द्विजातेर्गृहमेधिनः ।
यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पुरुषः ॥' इति ।

तदकृत्वा हि निष्किञ्चनवत् केवलस्मरणादिनिष्ठत्वे वित्तशाठ्यप्रतिपत्तिः स्यात् । परद्वारा तत्सम्पादनव्यवहारनिष्ठत्वस्यालसत्वस्य वा प्रतिपादकम् । ततोऽश्रद्धामयत्वाद्धीनमेव तत् । ततश्च 'योऽमायया सन्ततयाऽनुवृत्त्या' इत्याद्युपदेशाद् भ्रश्येत् । किञ्च गृहस्थानां परिचर्यामार्गे द्रव्यसाध्यतयाऽर्च्चनमार्गादविशेषेण प्राप्तेऽप्यर्च्चनमार्गस्यैव प्राधान्यमत्यन्तविधिसापेक्षत्वात्तेषाम् । तथा गार्हस्थ्यधर्मस्य देवतायागस्य शाखापल्लवादिसेकस्थानीयस्य मूलसेकरूपं तदर्च्चनमित्यपि तदकरणे महान् दोषः । अत एव स्कान्दे श्रीप्रह्लादवाक्यं—

'केशवार्च्चा गृहे यस्य न तिष्ठति महीपते ।
तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं स्मृतम् ॥' इति ।

दीक्षितानान्तु सर्व्वेषां तदकरणे नरकपातः श्रूयते । अथ वन्दनम्—तच्च नमस्कारविशेषः । स एव नमस्कारस्तस्यार्च्चत्वेनाप्यतिदिष्टः । यथा नारसिंहे—

'नमस्कारः स्मृतो यज्ञः सर्वयज्ञेषु चोत्तमः ।
नमस्कारेण चैतेन साष्टाङ्गेन हरिं व्रजेत् ॥' इति ।

तथा चोक्तं श्रीमद्भागवते—

'तत्तेऽनुकम्पां सुसमीक्षमाणो
भुञ्जान एवात्मकृतं विपाकम् ।
हृद्वाग्वपुर्भिर्विदधन्नमस्ते
जीवेत यो मुक्तिपदे स दायभाक् ॥' (१०।१४।३८) इति ।

अथ दास्यम् । तच्च श्रीविष्णोर्दासम्मन्यत्वं कैङ्कर्यमिति यावत् । यथोक्तमितिहाससमुच्चये—

'जन्मान्तरसहस्रेषु यस्य स्यान्मतिरीदृशी ।
दासोऽहं वासुदेवस्य सर्वान् लोकान् समुद्धरेत् ॥' इति ।

अथ सख्यम् । तच्च हितार्शंसनमयं बन्धुभावलक्षणम् । तथा च अगस्त्यसंहितायां—

'परिचर्यापरा केचित् प्रासादादिषु शेरते ।
मनुष्यमिव तं द्रष्टुं व्यवहर्तुञ्च बन्धुवत् ॥' इति ।

अथात्मनिवेदम् । तच्च देहादिशुद्धात्मपर्यन्तस्य सर्वतोभावेन तस्मिन्नेवार्पणम् । तत्कार्यञ्चात्मार्थ-चेष्टाशून्यत्वं तन्न्यस्तात्मसाधनसाध्यत्वं तदर्थैकचेष्टामयत्वञ्च । तथा च श्रीभागवते रुक्मिणीवाक्ये—

'तन्मे वृतः खलु भवान् पतिरङ्ग जाया-
मात्मार्पितञ्च भवतोऽत्र विभो विधेहि ॥' (१०।५२।२९) इति ।

नव लक्षणानि स्वरूपाणि यस्याः सा नवलक्षणा । नवलक्षणत्वं चास्या अन्येषामप्यङ्गानां तदन्तर्भावादुक्तम् । सा यदि भगवति विष्णावद्धा साक्षादर्पिता क्रियेत, विष्णुसुखोद्देशेनैव, न तु तत्फलस्य स्वस्मिन् विनियोगे, न तु केवलमन्याभिलाषशून्यत्वं तदोत्तममधीतं मन्ये इति उत्तमा भक्तिरिति भावः ॥ (ग)

बङ्गानुवाद

এই ভক্তি নয় প্রকার। শ্রীমদ্‌ভাগবতে উক্ত হইয়াছে—হিরণ্যকশিপু প্রহ্লাদকে বলিলেন—বৎস! আয়ুষ্মন্! তুমি এতকাল ধরিয়া যে উত্তম বিষয়

অধ্যয়ন করিয়াছ এবং গুরু তোমাকে যাহা শিক্ষা দিয়াছেন, তাহা আমাকে বল। তাহা শুনিয়া প্রহ্লাদ বলিলেন—ভগবন্নামাদিশ্রবণ, তাঁহার নামাদিকীর্ত্তন, মনে মনে বিষ্ণুর ধ্যান, তাঁহার সাদরে সেবা, পূজা, সাষ্টাঙ্গপ্রণিপাত, তাঁহার দাসত্ব, তাঁহার উপর বিশ্বাসস্থাপনপূর্ব্বক বন্ধুত্ব, আত্মসমর্পণ—এই নবলক্ষণ ভক্তি পুরুষ-কর্ত্তৃক ভগবান্ বিষ্ণুতে সাক্ষাৎ অর্পিত হইলে, তাহাকে উত্তম অধ্যয়ন বলা হয়, অর্থাৎ ইহা হইল উত্তম ভক্তি॥ (গ)

सत्सेवा गुरुसेवा च देवभावेन चेद्भवेत्।
तदैषा भगवद्भक्तिर्लभ्यते नान्यथा क्वचित्॥ १

कान्तिमाला

भक्तिलाभस्य हेतुमाह—सत्सेवेति॥ १

प्रभा

सदिति। सत्सेवा—सतां साधूनां चौघादीघाणां भगवत्परायणानामिति यावत्, सेवा परिचर्या। गुरुसेवा—गुरूणां मातुः पितुराचार्य्याणाञ्च श्रवण-गुरु-शिक्षागुरु-दीक्षागुरूणां वा सेवा। देवभावेन भगवद्बुद्ध्या चेद् यदि भवेत्, तदा एषा शास्त्रप्रसिद्धा भगवद्भक्तिर्भगवति भक्तिर्लभ्यते, अन्यथा प्रकारान्तरेण क्वचित् कदापि न॥ १

বঙ্গানুবাদ

যদি ভগবদ্বুদ্ধিতে সাধুসেবা ও গুরুসেবা হয়, তাহা হইলে ভগবানের প্রতি ভক্তি হইয়া থাকে, অন্য প্রকারে হয় না॥ ১

देवभावेन सत्सेवा यथा तैत्तिरीयके—
"अतिथिदेवो भव"॥ (१।११।२) इति। (क)

कान्तिमाला

देवभावेनेति। अतिथिरभिकेतनो हरिभक्तो देवो हरिवत् पूज्यो यस्य स त्वमीदृशो भव इति शिक्षा॥ (क)

प्रभा

देवेति। अतिथिर्देवो यस्य तादृशस्त्वं भव, अतिथिं विष्णुबुद्ध्या पूजये-त्यर्थः॥ (क)

বঙ্গানুবাদ

দেবভাবে যে সাধুগণের সেবা করিতে হইবে, ইহা তৈত্তিরীয়োপনিষদে আছে যথা—'তুমি অতিথিকে বিষ্ণুরূপে চিন্তা করিয়া তাঁহার পূজা কর ॥' (ক)

तथा तद्भक्तिर्यथा श्रीभागवते—

"नैषां मतिस्तावदुरुक्रमाङ्घ्रिं

स्पृशत्यनर्थापगमो यदर्थः ।

महीयसां पादरजोऽभिषेकं

निष्किञ्चनानां न वृणीत यावत् ॥" (৭।৫।৩২) इति । (ख)

कान्तिमाला

नैषामिति प्रह्लादवाक्यम् । एषां बहिर्दृष्टीनां मतिस्तावदुरुक्रमाङ्घ्रिं न स्पृशति । यस्य मतिक्तस्य तदङ्घ्रिस्पर्शस्य अर्थः फलम् अनर्थापगमः संसृतिविनाशो भवति । तावत् कियदित्यत आह—महीयसामिति । निष्किञ्चनानां कृष्णैकधनानां महीयसां साधूनाम् अङ्घ्रिरजोऽभिषेकं यावन्न वृणीत, परिनिष्ठया यावत् तन्न (१) सेवेत इत्यर्थः ॥ (ख)

प्रभा

तथेति । तया सत्सेवया । तद्भक्तिर्भगवद्भक्तिः । तथा च व्याख्यातोऽयं श्लोकः श्रीविश्वनाथचक्रवर्तिभिः—'ननु च यदि विष्णुरेव स्वार्थरूपा गतिः शास्त्रैरुच्यते तदा त्वद्गुरूणां सर्वशास्त्रज्ञानामपि मतिः विष्णुनिष्ठैवोत्पद्येतेत्यतस्तेषां विष्णुनिष्ठमतित्वाभावादेव विष्णुभक्तिरशास्त्रीयेत्यनुमीयत इत्यत आह—नैषामिति । निष्किञ्चनानां मत्कृते त्यक्तकर्माणस्त्यक्तस्वजनबान्धवा इति भगवद्वाक्यविश्वासात्त्यक्तव्यावहारिकवित्तपुत्रकलत्राभिलाषकर्मज्ञानादीनां भक्तिमात्रैकवासनत्वेन महीयसां पादरजसा स्वस्य वैष्णवत्वेनाभिषेकं यावन्न वृणीत तावन्मतिरुरुक्रमाङ्घ्रिं न स्पृशति ।

'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥' इति ।

'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामि'त्यादिश्रुतिभ्यः ।

---

(१) 'तान्न'—इति 'घ' पुस्तके ।

अनर्थस्य संसारस्यापगमो यदर्थो यस्या अङ्घ्रिस्पर्शिन्या मतेरर्थः प्रयोजनमानुषङ्गिकमेव फलं, मुख्यं फलं तूरुक्रमाङ्घ्रिस्पर्शः स एव' ॥ (ख)

বঙ্গানুবাদ

সাধুসেবার দ্বারা যে ভগবদ্ভক্তির উদয় হয়, ইহা শ্রীমদ্ভাগবতে কথিত হইয়াছে যথা—'যে পর্য্যন্ত বিষয়াভিমানশূন্য মহাপুরুষগণের পাদধূলির দ্বারা অভিষিক্ত না হন, তদবধি তাঁহাদিগের মতি ভগবানের চরণস্পর্শ করিতে সমর্থ হয় না। যে ভগবানের চরণস্পর্শে সংসাররূপ অনর্থের নিবৃত্তি হইয়া থাকে ॥' (খ)

देवभावेन गुरुसेवा यथा तैत्तिरीयके—

"आचार्यदेवो भव ॥" (१।११।२) इति। (ग)

कान्तिमाला

आचार्यो मन्त्रोपदेष्टा, स देवो हरिवत् पूज्यो यस्य स त्वमीदृशो भव इति शिक्षा ॥ (ग)

प्रभा

देवेति। आचार्यो देवो यस्य सः, तादृशस्त्वं भव, आचार्यं विष्णुबुद्ध्या पूजयेत्यर्थः। देवशब्दस्तत्र विष्णुपरः। 'आचार्यवान् पुरुषो वेद' इति श्रुतिः ॥ (ग)

বঙ্গানুবাদ

বিষ্ণু-বুদ্ধিতে আচার্য্যসেবা কর্ত্তব্য, ইহা তৈত্তিরীয়োপনিষদে উক্ত হইয়াছে যথা—'তুমি আচার্য্যকে বিষ্ণু-বুদ্ধিতে পূজা কর ॥' (গ)

श्वेताश्वतरोपनिषदि च—

"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।

तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" (६।२३) इति।(घ)

कान्तिमाला

यस्येति। यस्य जिज्ञासोर्यथा देवे परमात्मनि तथा गुरौ च परा भक्तिः स्यात्, तस्यैते अस्यामुपनिषदि कथिता अर्थाः प्रकाशन्ते स्फुरन्ति, न त्वेतद्विपरीतस्य इत्यर्थः ॥ (घ)

प्रभा

यस्येति। यस्य पुरुषस्य देवे विष्णौ पराऽनन्या भक्तिः, यथा देवे तथा

গুরৌ পরা ভক্তিস্তস্য মহাত্মনো মনস্বিনঃ, এতে উপনিষৎপ্রতিপাদ্যা অর্থাঃ প্রতিভান্তি, হি নিশ্চয়ে—

'যস্য দেবে চ মন্ত্রে চ গুরৌ ত্রিষ্বপি নিশ্চলা।
ন ব্যবচ্ছিদ্যতে বুদ্ধিস্তস্য সিদ্ধিরদূরতঃ॥' ইতি তন্ত্রোক্তেঃ। (ঘ)

বঙ্গানুবাদ

যে ব্যক্তির বিষ্ণুতে অনন্যা ভক্তি, সেইরূপ গুরুতে অনন্যা ভক্তি, সেই মনস্বীর উপনিষৎ-প্রতিপাদ্য বিষয়সকল আবির্ভূত হইয়া থাকে॥ (ঘ)

তথা তদ্ভক্তির্যথা শ্রীভাগবতে—
"তস্মাদ্ গুরুং প্রপদ্যেত জিজ্ঞাসুঃ শ্রেয় উত্তমম্।
শাব্দে পরে চ নিষ্ণাতং ব্রহ্মণ্যুপশমাশ্রয়ম্॥ (১১।৩।২১)
তত্র ভাগবতান্ ধর্মান্ শিক্ষেদ্ গুর্বাত্মদৈবতঃ।
অমায়য়াঽনুবৃত্ত্যা যৈস্তুষ্যেদাত্মাত্মদো হরিঃ॥"(১১।৩।২২)ইতি।(ঙ)

কান্তিমালা

তস্মাদিতি। উত্তমং শ্রেয়ো জিজ্ঞাসুর্জনো গুরুং প্রপদ্যেত। কীদৃশং? শাব্দে ব্রহ্মণি বেদে, পরে ব্রহ্মণি শ্রীকৃষ্ণে চ নিষ্ণাতম্। তত্র গুরোরন্তিকে স্থিতোঽমায়য়া নিষ্কপটয়া অনুবৃত্ত্যা সেবয়া ভাগবতান্ ধর্মান্ শিক্ষেত্। স্ফুটার্থমন্যত্॥ (ঙ)

প্রভা

তথেতি। তথা আচার্যসেবয়া। তদ্ভক্তির্ভগবদ্ভক্তিঃ। তস্মাদিতি। 'উত্তমং শ্রেয়ো জ্ঞাতুমিচ্ছুঃ শাব্দে ব্রহ্মণি বেদাখ্যে ন্যায়তো নিষ্ণাতং তত্ত্বজ্ঞম্। অন্যথা সংশয়নিরাসকত্বাযোগাত্। পরে চ ব্রহ্মণি অপরোক্ষানুভবেন নিষ্ণাতম্। অন্যথা বোধসঞ্চারাযোগাত্। পরব্রহ্মনিষ্ণাতত্বদ্যোতকমাহ— উপশমাশ্রয়মিতি। গুরুরেবাত্মা দৈবতঞ্চ যস্য সঃ। অনুবৃত্ত্যা সেবয়া। যৈর্ধর্মৈঃ। বস্তুত আত্মা আত্মপ্রদশ্চোপাসকানাম্। যথা বলিপ্রভৃতীনাম্।' ইতি শ্রীধরস্বামী॥ (ঙ)

বঙ্গানুবাদ

আচার্য্যসেবার দ্বারা যে ভগবদ্ভক্তি হয়, ইহা শ্রীমদ্ভাগবতে উক্ত হইয়াছে যথা—'অতএব যিনি নিজেদের পরম শ্রেয়ঃ বস্তু জানিতে অভিলাষী হইয়া থাকেন,

তিনি বেদজ্ঞ ও পর ব্রহ্মে সাক্ষাৎকারবান্ গুরুর শরণাপন্ন হইবেন। গুরুকে নিজের ইষ্টদেবতা ভাবিয়া অকপটভাবে সেবার দ্বারা ভাগবতধর্ম্ম শিক্ষা করিবেন। যে সকল ভাগবত ধর্ম্মের দ্বারা বস্তুতঃ আত্মস্বরূপ হরি প্রসন্ন হইয়া নিজকে পর্য্যন্ত দান করেন॥ (৬)

अवाप्तपञ्चसंस्कारो लब्धद्विविधभक्तिकः।
साक्षात्कृत्य हरिं तस्य धाम्नि नित्यं प्रमोदते॥ १

कान्तिमाला

अन्यान् भक्तिभेदान् प्रपञ्चयितुमाह—अवाप्तेति। लब्धा विधिरुचिपूर्वतया द्विविधा भक्तिर्येन सः। नन्वेकस्य भक्तिद्वयलाभो विरुद्ध इति चेत्? सत्यं, यस्य यादृशदैशिकसङ्गस्तस्य तादृशभक्तिलाभः, इति न विरोधः॥ १

प्रभा

अवाप्तेति। अवाप्तपञ्चसंस्काराः—अवाप्ताः प्राप्ता वक्ष्यमाणाः पञ्च संस्कारा येन सः। लब्धद्विविधभक्तिकः लब्धा द्विविधा वैधी रागानुगा च भक्तिर्येन सः। हरिं साक्षात्कृत्य तस्य हरेर्गोलोकादौ नित्यधाम्नि नित्यं सततं प्रमोदते नन्दति। तथा च पाद्मोत्तरखण्डे—

'तापादिपञ्चसंस्कारी नवेज्याकर्मकारकः।
अर्थपञ्चकविद् विप्रो महाभागवतो हि सः॥' इति॥ १

বঙ্গানুবাদ

যিনি তাপাদি পাঁচটী সংস্কার প্রাপ্ত হইয়াছেন, যিনি বৈধী ও রাগানুগা এই দ্বিবিধ ভক্তি লাভ করিয়াছেন, তিনি শ্রীহরির সাক্ষাৎকার লাভ করিয়া গোলোকাদি নিত্য ধামে সতত সুখে অবস্থান করেন॥ ১

तत्र पञ्च संस्कारा यथा स्मृतौ—
"तापः पुण्ड्रं तथा नाम मन्त्रो यागश्च पञ्चमः।
अमी हि पञ्च संस्काराः परमैकान्तिहेतवः॥" इति। (क)

कान्तिमाला

ताप इति पाद्मोत्तरखण्डे (१)। अमी तापादयः संस्काराः पञ्च। (क)

(१) 'पाद्मोत्तरखण्डे' इति पाठः 'ग' पुस्तके नास्ति।

प्रभा

ताप इति। तापस्तप्तचक्रादिमुद्राधारणं, मद्वाप्रभुमते चन्दनादिना हरिनामाक्षरमुद्राधारणं, पुण्ड्रमूर्द्ध्वपुण्ड्रं, भगवतो हरेर्भृत्यत्वबोधकं हरिदास-इत्यादि-नामधारणं नाम, मन्त्रोऽष्टादशाक्षरादिः, पञ्चमस्तु यागः शालग्राम-शिलादिपूजनम्। एते पञ्च संस्काराः परमैकान्तिहेतवः—परमो य एकान्ती तस्य हेतवः। एकान्तित्वं नाम सर्वनैरपेक्ष्येण भगवदेकनिष्ठत्व-रूपं, तच्चतुर्विधं धर्मानादररूपं, कर्मज्ञानाद्यशेषनिरपेक्षत्वं, विघ्नाकुलत्वेऽपि रतिपरत्वरूपं, प्रेमैकपरत्वञ्चेति। परमैकान्तित्वं नाम प्रेमैकपरत्वम्। एते पञ्च संस्काराः परमैकान्तिहेतवः॥ (क)

বঙ্গানুবাদ

তাপ, পুণ্ড্র, নাম, মন্ত্র ও যাগ এই পাঁচটী সংস্কার প্রেমভক্তি-লাভের একমাত্র উপায়॥ (ক)

तापोऽत्र तप्तचक्रादिमुद्राधारणमुच्यते।
तेनैव हरिनामादिमुद्रा चाप्युपलक्ष्यते॥ २

कान्तिमाला

तापादीन् व्याचष्टे। तेनैवेति। तप्तचक्रादिधारणेनैव इत्यर्थः। तप्तचक्रादिधृतिं कलि-मलिनमनसां दुष्करां मत्वानः पतितानुद्दिधीर्षुर्भगवान् श्रीकृष्णचैतन्यश्चन्दनादिना श्रीभगव-न्नाममुद्राधृतिं प्राचापि स्वीकृतामुपादिचत्। सा च पञ्चसंस्कारवाक्ये तप्तचक्रादिधारणे-नोपलक्षिता इति भावः॥ २

प्रभा

ताप इति। अत्र वैष्णवशास्त्रे, ताप इत्यादिश्लोके वा, तापशब्देन तप्त-चक्रादिमुद्राधारणमुच्यते, शास्त्रविज्ञैरिति शेषः। तेन एव तापेन हरि-नामादिमुद्रा—चन्दनादिना हरिनामाङ्कनरूपा मुद्रा चापि उपलक्ष्यते। उपलक्षणत्वं नाम स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम्॥ २

বঙ্গানুবাদ

এখানে তাপ-শব্দের অর্থ তপ্তচক্রাদি-মুদ্রাধারণ, তাহার দ্বারা চন্দনাঙ্কিত হরিনামাদি-মুদ্রাধারণও উপলক্ষিত হইতেছে॥ ২

सा यथा स्मृतौ—

"हरिनामाक्षरैर्गात्रमङ्कयेच्चन्दनादिना।

स लोकपावनो भूत्वा तस्य लोकमवाप्नुयात्॥" इति। (क)

प्रभा

सेति। सा हरिनामादिमुद्रा। यश्चन्दनादिना हरिनामाक्षरैर्गात्र-मङ्कयेत् लिखेत्, स लोकपावनः भुवनपवित्रकारकः भूत्वा तस्य लोकं भगवद्धाम आप्नुयात् लभेत॥ (क)

বঙ্গানুবাদ

চন্দনপ্রভৃতির দ্বারা গাত্রে যে হরিনামাক্ষর লিখিতে হয়, ইহা স্মৃতিতেও আছে—'যিনি চন্দনপ্রভৃতির দ্বারা গাত্রে হরিনামাক্ষর অঙ্কন করেন, তিনি লোকপাবন হইয়া ভগবদ্ধাম প্রাপ্ত হইয়া থাকেন॥ (ক)

पुण्ड्रं स्यादूर्द्ध्वपुण्ड्रं तच्छास्त्रे बहुविधं स्मृतम्।

हरिमन्दिर-तत्पादाकृत्याद्यतिशुभावहम्॥

नामात्र गदितं सद्भिर्हरिभृत्यत्वबोधकम्।

मन्त्रोऽष्टादशवर्णादिः स्वेष्टदेववपुर्मतः॥

शालग्रामादिपूजा तु यागशब्देन कथ्यते।

प्रमाणान्येषु दृश्यानि पुराणादिषु साधुभिः॥ २

कान्तिमाला

पुण्ड्रमिति हरिमन्दिरादितिलकम्। "तिलकं तमालपत्रं चित्रकमुक्तं विशेषकं पुण्ड्रं" इति हलायुधः। स्फुटार्थमन्यत्॥ २

प्रभा

पुण्ड्रमिति। पुण्ड्रशब्देनोर्द्ध्वपुण्ड्रमभिधीयते, तच्चोर्द्ध्वपुण्ड्रं शास्त्रे बहुविधं स्मृतं कथितम्। हरिमन्दिराकृति हरिपादाकारञ्च, तत् अतिशुभावहम्। तथा च श्रुतिर्यजुर्वेदस्य हिरण्यकेशीयशाखायां—'हरेः पदाक्रान्तिमात्मनि

धारयति यः स परस्य प्रियो भवति स पुण्यवान् मध्ये छिद्रमूर्ध्वपुण्ड्रं यो धारयति स मुक्तिभाग् भवति' इति। तथा चोक्तं पद्मपुराणे—

'नासादिकेशपर्यन्तमूर्ध्वपुण्ड्रं सुशोभनम्।
मध्ये छिद्रसमायुक्तं तद्विद्याद्धरिमन्दिरम्॥' इति।

तथा च तत्रैव—

'एकान्तिनो महाभागाः सर्वभूतहिते रताः।
सान्तरालं प्रकुर्वन्ति पुण्ड्रं हरिपादाकृति॥' इति च।

अत्र वैष्णवे मते हरिभृत्यत्वबोधकं हरेर्दासत्वज्ञापकं 'हरिदासः' 'कृष्णदासः' इत्यादि नाम सद्भिः साधुभिर्गदितं भाषितम्। अष्टादशवर्णादिः स्वेष्टदेवतावपुः स्वेष्टमन्त्रमूर्तिर्मतः। यागशब्देन शालग्रामगोपालविग्रहादिपूजा कथ्यते। तथा च स्कन्दपुराणे—

'एवं श्रीभगवान् सर्वैः शालग्रामशिलात्मकः।
द्विजैः स्त्रीभिश्च शूद्रैश्च पूज्यो भगवतःपरैः॥' इति।

तत्रैव—

'ब्राह्मणक्षत्रियविशां सच्छूद्राणामथापि वा।
शालग्रामेऽधिकारोऽस्ति न चान्येषां कदाचन॥' इति च।
'ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि।
स्त्रीशूद्रकरसंस्पर्शो वज्रादपि सुदुःसहः॥' इति।
'प्रणवोच्चारणाद्धोमात् शालग्रामशिलार्चनात्।
ब्राह्मणीगमनाच्चैव शूद्रश्चण्डालतामियात्॥' इति च स्मृतेः।
'अतो निषेधकं यद् यद् वचनं श्रूयते स्फुटम्।
अवैष्णवपरं तत्तद्विज्ञेयं तत्त्वदर्शिभिः॥' इति।

वस्तुतस्तु स्त्रीशूद्राणां शालग्रामपूजायां यन्निषिद्धमुक्तं तत् साक्षात् पूजापरम्। विधायकवचनन्तु ब्राह्मणद्वारा पूजाकर्तव्यतापरम्। यथा हि पद्मपुराणे—

'दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः।
कर्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम्॥' इति।

सदाचारोऽपि तथा—इति स्मार्ताः।

अत्र वैष्णवाश्चैवं वदन्ति—

'शालग्रामं न स्पृशेत्तु हीनवर्णा वसुन्धरे ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाऽधिको मतः ॥
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुन्धरे !
दूरादेवास्पृशन् पूजां कारयेत् सुसमाहितः ॥' इति

वाराहोक्तेः स्पर्शं विना तुलसीपुष्पाद्यर्पणं भवत्येव । एवमाचारश्च सतां क्वचिद् दृश्यते । विशेषतो दक्षिणदेशे च महत्तमानां श्रीवैष्णवानाम् । इति श्रीरामानुजीयवैष्णवानां 'सत्सङ्गादि'ति पद्यद्वयस्य टीकायाम् । एषु पञ्चसु संस्कारेषु अन्यानि प्रमाणानि साधुभिः पुराणादिषु शास्त्रेषु दृश्यानि द्रष्टव्यानि ॥ ३

বঙ্গানুবাদ

পুণ্ড্রশব্দে ঊর্দ্ধপুণ্ড্রকে বুঝায়, তাহা শাস্ত্রে বহুপ্রকার কথিত হইয়াছে। এই ঊর্দ্ধপুণ্ড্র হরিমন্দির ও হরিপাদাকৃতিপ্রভৃতি, তাহা অত্যন্তশুভজনক।

নামশব্দে হরির ভৃত্যত্ববোধক হরিদাস, কৃষ্ণদাসপ্রভৃতি নাম, অষ্টাদশবর্ণাদি মন্ত্র, তাহা স্বেষ্টদেবতার মূর্ত্তি, যাগশব্দে শালগ্রামাদিদেবতার পূজা, এ বিষয়ে অন্যান্য প্রমাণ পুরাণাদি-শাস্ত্রে দ্রষ্টব্য ॥ ৩

नवधा भक्तिर्विधिरुचिपूर्वा द्वेधा भवेद् यया कृष्णः ।
भूत्वा स्वयं प्रसन्नो ददाति तत्तदीप्सितं धाम ॥ ४

कान्तिमाला

पूर्वंचोद्दिष्टं भक्तिद्वैविध्यं स्फुटयति—नवधेति । विधिपूर्वा वैधी, रुचिपूर्वा तु रागानुगा, इति हरिभक्तिरसामृतेऽस्य विस्तरः । स्फुटार्थमन्यत् ॥ ४

प्रभा

श्रवणकीर्तनादिभेदेन नवधा भक्तिरुक्ता, तस्याश्च द्वैविध्यमाह—नवधेति । नवधा—श्रवणादिभेदेन नवविधा भक्तिर्विधिरुचिपूर्वा विधिपूर्वा वैधी, रुचिपूर्वा रागानुगेति द्वेधा भवेत् । तथा चोक्तं भक्तिरसामृतसिन्धुबिन्दौ श्रीमद्विश्वनाथचक्रवर्तिभिः—'सा भक्तिः साधनभक्तिः, भावभक्तिः, प्रेमभक्ति-

रिति भेदेन त्रिविधा। साधनभक्तिः पुनर्वैधीरागानुगाभेदेन द्विविधा; अथ वैधीलक्षणं—श्रवणकीर्तनादीनि शास्त्रशासनभयेन यदि क्रियन्ते तदा वैधी भक्तिः। अथ रागानुगालक्षणं—निजाभिमतव्रजराजनन्दनस्य सेवाप्राप्तिलोभेन यदि तानि क्रियन्ते तदा रागानुगा भक्तिः।' यया भक्त्या कृष्णः स्वयं प्रसन्नो भूत्वा तत्तदीप्सितमभिलषितं धाम स्वसेवोपयोगि स्थानं ददाति ॥४

বঙ্গানুবাদ

পূর্ব্বে শ্রবণ-কীর্ত্তনাদি ভেদে নয় প্রকার ভক্তি বলা হইয়াছে, তাহা আবার দুই প্রকার—বিধিপূর্ব্বা অর্থাৎ বৈধী এবং রাগপূর্ব্বা অর্থাৎ রাগানুগা। যে ভক্তির দ্বারা ভগবান্ শ্রীকৃষ্ণ প্রসন্ন হইয়া সেই সেই অভিলষিত ধাম ভক্তগণকে প্রদান করেন ॥ ৪

विधिनाभ्यर्च्यते देवश्चतुर्बाह्वादिरूपधृक् (१)।
रुच्यात्मकेन तेनासौ नृलिङ्गः परिपूज्यते ॥ ५

कान्तिमाला

भक्तिभेदस्य भजनीयभेदमाह—विधिनेति। चतुरिति, परमव्योमाधिपतिर्वासुदेवः। चतुर्बाहुरनिरुद्धश्च श्वेतद्वीपपतिः। आदिना अष्टभुजो दशभुजश्चेति।

"चतुर्भुजः श्यामलाङ्गः श्रीभूलीलाभिरन्वितः।
विमलैर्भूषणैर्नित्यैर्भूषितो नित्यविग्रहैः॥
पञ्चायुधैः सेव्यमानः शङ्खचक्रधरो हरिः॥" इति।

"पीनायताष्टभुजमण्डलमध्यलक्ष्म्या
स्पर्द्धिश्रिया परिवृतो वनमालयाद्यः॥" (२) इति।

"दशबाहुर्महातेजा देवतारिनिसूदनः।
श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः॥" इति च स्मृतेः।

नृलिङ्गो यशोदास्तनन्धयः कौशल्यास्तनन्धयश्च इति वेदान्तस्यमन्तके अस्य विस्तरः॥ ५

प्रभा

विधिनेति। विधिना—वैधीभक्त्या चतुर्बाह्वादिरूपधृक्-चतुर्भुजादि-

---

(१)—'रूपधृत्,—इति 'क' 'ख' तथा 'ग' पुस्तके।

(२) 'वनमालयाढ्यः'—इति 'ग' पुस्तके।

मूर्तिधारी देवो वासुदेवोऽभ्यर्च्यते पूज्यते भक्तैरिति शेषः।' आदिनाष्टभुजादीनां ग्रहणम्। तेन रुच्यात्मकेन रागानुगया भक्त्या नृलिङ्गोऽसौ मनुष्यदेहधृक् कृष्णो राम इत्यादिः परिपूज्यते॥ ५

বঙ্গানুবাদ

চতুর্ভুজ, অষ্টভুজপ্রভৃতি ভগবন্মূর্ত্তি ভক্তগণ বিধিপূর্ব্বক পূজা করিয়া থাকেন। রাগানুগা ভক্তির দ্বারা মনুষ্যরূপ ভগবান্ কৃষ্ণ, রামপ্রভৃতি পূজিত হইয়া থাকেন॥ ৫

तुलस्यश्वत्थधात्र्यादि-पूजनं धामनिष्ठता।
अरुणोदयविद्धस्तु संत्याज्यो हरिवासरः।
जन्माष्टम्यादिकं सूर्योदयविद्धं परित्यजेत्॥ ६

कान्तिमाला

तुलस्यश्वत्थेति। धामनिष्ठता निष्ठया श्रीमथुरादिधामनिवासः। सामर्थ्ये सत्येतच्छरीरेण, तदभावे भावनया, इति बोध्यम्। अरुणोदयेत्यादि, हरिभक्तिविलासे अस्य विस्तरः॥ ६

प्रभा

तुलस्येति। तुलस्यश्वत्थधात्र्यादिपूजनं—तुलसीवृक्षस्याश्वत्थवृक्षस्यामलकीवृक्षस्य च पूजनं कार्यम्। आदिपदेन गोब्राह्मणवैष्णवपूजनं ग्राह्यम्। धामनिष्ठता मथुरादिधामवासः। तथा चोक्तं स्कान्दे—

'अश्वत्थतुलसीधात्रीगोभूमिसुरवैष्णवाः।
पूजिताः प्रणता ध्याताः क्षपयन्ति नृणामघम्॥' इति।

अत्रैवोक्तं श्रीमज्जीवगोस्वामिभिः—'अश्वत्थस्य तद्विभूतिरूपत्वात् पूज्यत्वम्। गोब्राह्मणयोर्हितावतारत्वाद् भगवतो भागवतैरेतावपि पूज्याविति। तत्र गवां पूजा तु श्रीगोपालोपासकानां परमाभीष्टप्रदा। यथा श्रीगौतमीये—

'गवां कण्डूयनं कुर्याद् गोग्रासं गोप्रदक्षिणम्।
गोषु नित्यं प्रसन्नासु गोपालोऽपि प्रसीदति॥' इति।

अत्र धामशब्देन गङ्गाद्वारकामथुरादिकं ग्राह्यम्। एवमेवोक्तं श्रीरूप-

गोस्वामिभिः श्रीभक्तिरसामृतसिन्धौ—गङ्गादिवासो यथा श्रीभागवते प्रथमे—

'या वै लसच्छ्रीतुलसीविमिश्र-
कृष्णाङ्घ्रिरेण्वभ्यधिकाम्बुनेत्री।
पुनाति सेशानुभयत्र लोकान्
कस्तां न सेवेत मरिष्यमाणः॥' (१।१९।६) इति।

स्कान्दे—

'संवत्सरं वा षण्मासान् मासं मासार्द्धमेव वा।
द्वारकावासिनः सर्वे नरा नार्यश्चतुर्भुजाः॥' इति।

ब्रह्माण्डे च—

'त्रैलोक्यवर्तितीर्थानां सेवनाद्दुर्लभा हि या।
परानन्दमयी सिद्धिर्मथुरास्पर्शमात्रतः॥' इति च।

हरिवासर एकादशी, अरुणोदयविद्धस्तु सन्त्याज्यः। अरुणोदये यदि दशमीतिथिर्भवेत्तदा तादृशी एकादशी वैष्णवानामुपवासयोग्या न भवति। तथा च हरिभक्तिविलासधृते भविष्ये—

'अरुणोदयकाले तु दशमी यदि दृश्यते।
न तत्रैकादशी कार्या धर्मकामार्थनाशिनी॥' इति।

'अरुणोदयवेधोऽत्र वेधः सूर्योदये तथा।
उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः क्रमात्॥' इति

निर्णयसिन्धुधृतकालमाधवीये।

जन्माष्टम्यादिकमित्यत्रादिपदेन रामनवमी-नृसिंहचतुर्दश्यादि। सूर्योदये यदि सप्तमीविद्धाऽष्टमी तदा सा नोपास्या। तथा च ब्रह्मवैवर्तपुराणे—

'वर्जनीया प्रयत्नेन सप्तमीसहिताष्टमी।
सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी॥'

ऋक्षं रोहिणीनक्षत्रम्॥ ६

বঙ্গানুবাদ

তুলসী, অশ্বত্থ ও আমলকীপ্রভৃতি বৃক্ষের পূজা করা উচিত এবং মথুরাদি-

পুরীতে বাস অবশ্য কর্ত্তব্য। অরুণোদয়কালে দশমীবিদ্ধ একাদশীতে বৈষ্ণবগণ উপবাস করিবেন না। সূর্য্যোদয়কালে সপ্তমীবিদ্ধ অষ্টমীও উপবাসযোগ্য নহে, এইরূপ রামনবমীপ্রভৃতি বুঝিতে হইবে॥ ৬

लोकसंग्रहमन्विच्छन्नित्यनैमित्तिकं बुधः।
प्रतिष्ठितश्चरेत् कर्म भक्तिप्राधान्यमत्यजन्॥ ७

कान्तिमाला

लोकेति। स्वनिष्ठः परिनिष्ठितो निरपेक्षश्च इति त्रिविधो भक्त्यधिकारी। तत्र, स्वनिष्ठः स्वाश्रमः (१) स्वविहितान्यहिंसाणि कर्म्माणि आफलोदयं निष्कामः सन् कुर्य्यादेव। निरपेक्षो हरिनिरतः, तेन मानसिकान्येव हर्य्यर्च्चनान्यनुष्ठेयानि। इति निराश्रमस्य तस्य स्वरूपेण कर्म्मत्यागः। परिनिष्ठितस्तु आश्रमस्थः प्रतिष्ठितो लब्धमहदासनश्चेत् तानि लोकसंग्रहाय कुर्य्याद् गौणकाले, भक्तिं तु तात्पर्य्येण अनुतिष्ठेत्। इति सुसूक्ष्मे (२) भाष्ये, श्रीगीताभूषणे च विस्तृतम्। भक्तिसन्दर्भेऽपि एवमेव विस्तृतं (३) द्रष्टव्यम्॥ ७

दश नामापराधांस्तु यत्नतः परिवर्जयेत्॥ ८

कान्तिमाला

यानादिकृतहरिमन्दिरगमनादयः सेवापराधा वाराहादौ कथिताः। ते तु सन्ततसेवया मार्ज्जनीयाः स्युरिति ते वर्ज्जनीया एव। ये च नामापराधा दश, पाद्मे दर्शिताः, तेषां तु सन्ततनामावृत्त्या विमार्ज्जनं स्यात्, तादृशनामावृत्तेश्च दुःशकत्वात् ते दश यत्नात् परिवर्ज्जनीयाः—इत्याह—दश इति। ते च,—सतां निन्दा।१। श्रीविष्णोः सकाशात् शिवनामादेः स्वातन्त्र्यमननम्।२। गुर्व्ववज्ञा।३। श्रुतितदनुयायिशास्त्रनिन्दा।४। हरिनाममहिम्नि अर्थवादमात्रमेतदिति मननम्।५। तत्र प्रकारान्तरेणार्थकल्पनम्।६। नामबलेन पापे प्रवृत्तिः।७। अन्यशुभक्रियाभिर्नाम्नां साम्यमननम्।८। अश्रद्दधाने विमुखे च नामोपदेशः।९। श्रुतेऽपि नाम्नां माहात्म्ये तत्राप्रीतिः।१०। इति। ते चैते सनत्कुमारेण नारदं प्रति उपदिष्टा बोध्याः॥ ८

प्रभा

लोकेति। बुधः पण्डितः प्रतिष्ठितः परिनिष्ठितश्चेत्तदा लोकसंग्रहमन्वि-

---

(१) 'साश्रमः' इति 'ग' पुस्तके।
(२) 'ससूक्ष्मे'—इति 'घ' पुस्तके।
(३) 'विवृतं'—इति 'घ' पुस्तके।

च्छन् लोका अप्येवमनुतिष्ठेयुरिति अभिलषन् नित्यं नैमित्तिकञ्च कर्म चरेदनुतिष्ठेत्। लोकसंजिघृक्षया ह्यर्च्चनरूपान् स्वधर्मान् आचरन् हरिभक्तिनिरतः परिनिष्ठितः। किं कृत्वा? भक्तिप्राधान्यमत्यजन् अत्यक्त्वा। अत एव राद्धान्तः श्रीमज्जीवगोस्वामिचरणानामर्च्चनप्रकरणे—'अर्च्चनं द्विविधं शुद्धं कर्ममिश्रञ्च। तयोः पूर्वं निरपेक्षभक्तानां श्रद्धावतां दर्शितम्। कर्ममिश्रञ्च व्यवहारचेष्टाऽतिशयया दृच्छिकभक्त्यनुष्ठानवत्तादिलक्षणलक्षितश्रद्धानां तथा तद्विपरीत्यलक्षितश्रद्धानामपि प्रतिष्ठितानां तद्भक्तिवार्ताभिज्ञबुद्धिषु साधारणवैदिककर्मानुष्ठानलोपोऽपि माऽभूदिति लोकसंग्रहपराणां गृहस्थानां दर्शितम्। यथा 'न ह्यन्तोऽनन्तपारस्ये'(भा० ११।२७।६)त्यादौ।

'सन्ध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे।
पूजां तैः कल्पयेत् सम्यक्संकल्पः कर्मपावनीम्॥' (भा० ११।२७।११)

इत्यादि।

श्रीनारदपञ्चरात्रे चैवमेव श्रीनारायणवाक्यं श्राद्धकथनारम्भे—

'नाचरेद् यस्तु सिद्धोऽपि लौकिकं धर्ममग्रतः।
उपप्लवाच्च धर्मस्य ग्लानिर्भवति नारद!॥
विवेकज्ञैरतः सर्वैर्लोकाचारो यथा स्थितः।
आदेहपाताद् यत्नेन रक्षणीयः प्रयत्नतः॥' इति।

अत्र पाद्मोक्ता दश अपराधाः परित्यक्तव्याः। यथा—

'सतां निन्दा नाम्नः परममपराधं वितनुते
यतः ख्यातिं यातं कथमपि सहते तद्विगर्हाम्।
शिवस्य श्रीविष्णोर्य इह गुणनामादिकमलं
धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः॥'

गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं
तथार्थवादो हरिनाम्नि कल्पनम्।
नाम्नो बलाद् यस्य हि पापबुद्धि-
र्न विद्यते तस्य यमैर्हि शुद्धिः॥'

'धर्मव्रतत्यागहुतादि सर्वं
शुभक्रियासाम्यमपि प्रमादः।

অশ্রদ্দধানে বিমুখেঽপ্যশৃণ্বতি
যশ্চোপদেশঃ শিবনামাপরাধঃ ॥'
'শ্রুত্বাঽপি নামমাহাত্ম্যং যঃ প্রীতিরহিতোঽধমঃ।
অহংমমাদিপরমো নাম্নি সোঽপ্যপরাধকৃৎ ॥' ইতি ॥ ৭—৮

বঙ্গানুবাদ

পরিনিষ্ঠিত পণ্ডিত ব্যক্তি লোকসংগ্রহ করিতে অভিলাষী হইলে ভক্তির প্রাধান্য রক্ষা করিয়া নিত্য ও নৈমিত্তিক কর্ম্মের অনুষ্ঠান করিবেন, আর যে দশটী নামাপরাধ শাস্ত্রে উক্ত হইয়াছে, তাহা যত্নপূর্ব্বক পরিত্যাগ করিবে ॥ ৭-৮

কৃষ্ণাবাপ্তিফলা ভক্তিরেকান্তাবাভিধীয়তে।
জ্ঞানবৈরাগ্যপূর্ব্বা সা ফলং সদ্যঃ প্রকাশয়েৎ ॥ ৯

ইতি প্রমেয়রত্নাবল্যাং বিশুদ্ধভক্তের্মুক্তিপ্রদত্বপ্রকরণং
নামাষ্টমং প্রমেয়ম্ ॥ ৮

কান্তিমালা

উপসংহরতি—কৃষ্ণেতি। একান্তেতি। তদন্যফলতায়াং তু অনৈকান্ততা ইত্যর্থঃ। সা চেৎ জ্ঞানাদিপূর্ব্বা স্যাৎ, তদা কৃষ্ণাবাপ্তিলক্ষণং ফলং সদ্যস্ত্বরয়া প্রকাশয়েৎ, অন্যথা তু বিলম্বেন।
"তচ্ছ্রদ্দধানা মুনয়ো জ্ঞানবৈরাগ্যযুক্তয়া।
পশ্যন্ত্যাত্মনি চাত্মানং ভক্ত্যা শ্রুতগৃহীতয়া ॥" (ভাগ০ ১।২।১২)
ইত্যাদিস্মৃতেঃ। জ্ঞানং শাস্ত্রীয়ম্ ॥ ৯

ইতি বিশুদ্ধভক্তের্মুক্তিপ্রদত্বপ্রকরণং ব্যাখ্যাতম্ ॥ ৮

প্রভা

কৃষ্ণেতি। অত্র কৃষ্ণাবাপ্তিফলা শ্রীকৃষ্ণপ্রাপ্তিরেব ফলং যস্যাঃ সা। সা চ কৃষ্ণাবাপ্তিফলরূপা ভক্তির্মুক্তপ্রগ্রহবৃত্ত্যা শ্রীকৃষ্ণাকর্ষণ্যামেব পর্য্যবস্যতীতি ভাবঃ। তথা চ শ্রীভাগবতে—
'ন সাধয়তি মাং যোগো ন সাংখ্যং ধর্ম উদ্ধব !
ন স্বাধ্যায়স্তপস্ত্যাগো যথা ভক্তির্মমোর্জিতা ॥' (১১।১৪।২০) ইতি।
একান্তা একনিষ্ঠা কৃষ্ণান্যতাৎপর্য্যরহিতাঽভিধীয়তে ভক্তিশাস্ত্রবিদ্ভি-

रिति शेषः। सा भक्तिर्ज्ञानपूर्वा वैराग्यपूर्वा च सद्यस्तत्स्वयं फलं कृष्णावाप्तिरूपं प्रकाशयेत्। तथा च श्रीभागवते—

'वासुदेवे भगवति भक्तियोगः प्रयोजितः।
जनयत्याशु वैराग्यं ज्ञानञ्च यदहैतुकम्॥' (১।২।৭) इति।
'तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया।
पश्यन्त्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया॥' (১।২।১২)इति च।

ज्ञानवैराग्ययुक्तया नाम स्वात्मजाभ्यां ताभ्यां सेवितयेत्यर्थः—इति ग्रन्थकृत्॥৯

বঙ্গানুবাদ

যে ভক্তির ফল শ্রীকৃষ্ণপ্রাপ্তি, তাহাকে একান্তা ভক্তি বলে। সেই ভক্তি যদি জ্ঞানপূর্ব্বক অথবা বৈরাগ্যপূর্ব্বক হয়, তাহা হইলে শ্রীকৃষ্ণপ্রাপ্তিরূপ ফল শীঘ্রই আবির্ভূত হয়॥ ৯

नवमप्रमेयम्

प्रमाणत्रित्वप्रकरणम्।

अथ प्रत्यक्षानुमानशब्दानामेव प्रमाणत्वम्।

यथा श्रीभागवते—

"श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयम्॥" (১১।১৯।১৭)

इति। (क)

कान्तिमाला

त्रीण्येव प्रमाणानि इति वक्तुमाह—अथ प्रत्यक्षेति। प्रमाणानां त्रित्वमत्र प्रमेयम्। एवकारादेतदन्येषामुपमादीनामेषु त्रिष्वन्तर्भावान्नाधिक्यमिति वेदान्तस्यमन्तके प्रमाणनिरूपणे द्रष्टव्यम्। श्रुतेः प्राधान्यमभिप्रेत्य पूर्वं तामाह—श्रुतिरिति॥ (क)

प्रभा

अथेति। प्रत्यक्षम्, अनुमानं शब्दश्चेति त्रीणि प्रमाणानि।

श्रुतिरिति। श्रुतिर्वेदः। अर्थसन्निकृष्टं चक्षुरादिकमिन्द्रियं प्रत्यक्षम्।

अज्ञातवक्तृकं पारम्पर्यप्रसिद्धमैतिह्यम्। यथा इह वटे यक्षः प्रतिवसतीति। अनुमितिकरणमनुमानम् ॥ (क)

বঙ্গানুবাদ

প্রত্যক্ষ, অনুমান ও শব্দ এই তিনটীই প্রমাণ।

ভাগবতে কথিত হইয়াছে—শ্রুতি, প্রত্যক্ষ, ঐতিহ্য ও অনুমান এই চারিটী প্রমাণ॥ (ক)

प्रत्यक्षेऽन्तर्भवेद् यस्मादैतिह्यं तेन दर्शिकः।
प्रमाणं त्रिविधं प्राख्यत् तत्र मुख्या श्रुतिर्भवेत् ॥१

कान्तिमाला

नन्वैतिह्यमधिकं पठितं, त्रयं प्रमाणं कथमिति चेत्? तत्राह—प्रत्यक्षेऽन्तरिति। अनिर्दिष्टवक्तृकनागतपारम्पर्यप्रसिद्धमैतिह्यम्। यथा "इह वटे यक्षो निवसति" इति। तस्यादिमेन पुंसा दृष्टत्वात् प्रत्यक्षान्तर्गतमिति त्रयमेव प्रमाणम्। दर्शिको मध्वमुनिः। मनुश्चैवमाह—

"प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥" (१२।१०५) इति।

तत्र त्रिषु प्रमाणेषु मध्ये, श्रुतिरपौरुषेयवाक्यसंहतिर्मुख्या भवेत्, परमार्थप्रमापकत्वात् ॥ १

प्रत्यक्षमनुमानञ्च यत्साचिव्येन शुद्धिमत्।
मायामुण्डावलोकादौ प्रत्यक्षं व्यभिचारि यत् ॥२
अनुमा चातिधूमेऽद्रौ वृष्टिनिर्वापिताग्निके।
अतः प्रमाणं तत् तस्य स्वतन्त्रं नैव सम्मतम् ॥३

कान्तिमाला

मुख्यत्वं दर्शयितुमाह—प्रत्यक्षमिति। यत्साचिव्येन यस्य (१) साहाय्येन शुद्धिमत् प्रमाजनकम्। यथा, दृष्टचरमायामुण्डस्य पुंसः भ्रान्त्या सत्येऽप्यविश्वासे तदेवेदमित्याकाश-

(१) 'शब्दस्य' इत्यतिरिक्तः पाठः 'ग' तथा 'घ' पुस्तके।

वाच्या प्रत्यक्षं परिशुद्धम्। यथा च 'भोः शीतार्ताः पथिकाः! माऽस्मिन् वह्निं सम्भावयत, दृष्टं मया वृष्ट्याऽत्राऽधुना सनिर्वाणः। किन्तु अस्मिन् (१) धूमोद्गारिणि शैले सोऽस्ति' इत्यनुमानं च परिशुद्धम्। स्वतन्त्रे तु ते सव्यभिचारे भवत इत्याह—मायेति। यथा मायावी कश्चन मुण्डं (२) मायया दर्शयित्वा आह—'चैत्रस्य मुण्डमिदं'मिति। न च तत् तस्य। इति प्रत्यक्षस्य व्यभिचारः। वृष्ट्या तत्क्षणनिर्वापितवह्नौ (३) चिरमधिकोद्गिलद्धूमे (४) शैले, 'वह्निमान् धूमवत्त्वात्' इत्यनुमानस्य व्यभिचारः। नैतज्ज्वालाकरत्वादिधूमलक्षणं चावात्येव। अत इति स्फुटार्थम्॥ २—३

अनुकूलो मतस्तर्कः शुष्कस्तु (५) परिवर्जितः॥४

कान्तिमाला

तर्ह्यनुमानं परित्याज्यमिति चेत्? तत्राह—अनुकूल इति। श्रुत्यर्थपोषकोऽनुकूलः। तद्विरोधी तु प्रतिकूल इत्यर्थः। तर्कस्य व्याप्तिग्रहे शङ्कानिवर्तकत्वेनानुमानाङ्गकत्वात् (६) तदस्वीकारेण तदङ्गिनोऽनुमानस्याप्यस्वीकारो बोध्यः॥ ४

प्रभा

प्रत्यक्ष इति। भागवते ऐतिह्यस्य प्रमाणत्वाङ्गीकारे स्वीयं प्रमाणत्रित्वमसङ्गतमित्यत आह—प्रत्यक्षेऽन्तर्भवेदिति। तदैतिह्यं यस्मात् प्रत्यक्षे प्रमाणेऽन्तर्भवेत्, तेन देशिको मध्वाचार्यस्त्रिविधं प्रमाणं प्राख्यत् प्रोवाच, तत्र तेषु त्रिषु प्रमाणेषु श्रुतिर्मुख्या भवेत्। यत्साचिव्येन यस्याः श्रुतेः सहकारित्वेन प्रत्यक्षमनुमानञ्च शुद्धिमत् विशुद्धं प्रमाजनकमिति यावत्, भवेत्। श्रुतिविरुद्धं प्रत्यक्षमनुमानञ्च हेयमिति भावः। कथं प्रत्यक्षं प्रमाणेषु ज्येष्ठमुपजीव्यञ्च भवदपि स्वशुद्धौ श्रुतिसाचिव्यमपेक्षत इत्यत आह—मायेति। यद् यस्मात् कारणात् प्रत्यक्षं प्रमाणं मायामुण्डावलोकादौ ऐन्द्रजालिकच्छिन्नमुण्डदर्शनादौ व्यभिचारात्। आदिपदेन खद्योतपङ्क्तिष्वग्निभ्रान्तिर्ग्राह्या। प्रत्यक्षं हि

(१) 'अमुष्मिन्' इति पाठः 'ग' तथा 'घ' पुस्तके।

(२) 'किञ्चिन्मुण्डं' इति पाठः 'ग' पुस्तके।

(३) 'तत्क्षणनिर्वापिते वह्नौ'—इति 'घ' पुस्तके।

(४) 'चिरमधिकोद्गिलधूमे' इति 'ग' पुस्तके।

(५) 'शुष्कन्तु परिवर्जयेत्' इति 'ग' पुस्तके पाठः।

(६) 'शङ्कानिवर्तकत्वेनानुमान[illegible]भात्' इति 'ग' पुस्तके।

बहुषु स्थलेषु व्यभिचारग्रस्तं, न तत्र सम्यक् समाश्वासः, श्रुतिस्तु पुरुषदोष-रहिता परमप्रमाणपदवीं भजते। अनुमेति। वृष्टिनिर्वापिताग्निके—वृष्ट्या निर्वापितोऽग्निर्यत्र तस्मिन्नतिधूमे धूमबहुलेऽद्रौ पर्वतेऽनुमाऽनुमानं व्यभिचारिणी। न च सर्वत्र धूमाद् वह्नेरनुमानं भवितुमर्हतीति भावः। अपि च वेदविरुद्धमनुमानमपि बाधितम्। न च प्रत्यक्षेणानुमानेन चालौकिकं वस्तु निर्णेतुं शक्यते। अतस्तदनुमानं प्रमाणमपि स्वतन्त्रमिति न विदुषां सम्मतम्। तर्ह्यनुमानं किं सर्वथा वर्ज्यमित्यत आह—अनुकूल इति। अनुकूलो वेदाविरुद्धो वेदार्थपरिपोषकश्च तर्को मतः, शुष्कस्तु—'वेदवाक्यमप्रमाणं वाक्यत्वात् कालिदासादिवाक्यवत्' इत्यादिः परिवर्जितस्त्यक्तः। तथा चोक्तं श्रीलघुभागवतामृते श्रीरूपगोस्वामिभिः—

> 'यतस्तैः 'शास्त्रयोनित्वात्' इति न्यायप्रदर्शनात्।
> शब्दस्यैव प्रमाणत्वं स्वीकृतं परमर्षिभिः॥
> किञ्च 'तर्काप्रतिष्ठानात्' इति न्यायविधानतः।
> अमीभिरेव सुव्यक्तं तर्कस्यानादरः कृतः॥' इति।

'व्याप्यारोपेण व्यापकारोपस्तर्कः, यद्ययं निर्वह्निः स्यात्तदा निर्धूमः स्यादित्येवंरूपः। स च व्याप्तिशङ्कां निरस्यन् अनुमानाङ्गं भवेदिति तर्कशब्देनानुमानं ग्राह्यम्। चेदेवं, तर्हि 'मन्तव्यः' इति श्रुतेः का गतिरिति चेत्? स्वानुसारितर्कपरा सेति गृहाण; 'शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिस्मृती' इति भारतवाक्यात्। तथा च वेद एव व्यासस्य प्रमाणं, तर्कश्च तदनुसारी न निवार्यते, शुष्कतर्कस्तु प्रहेय एवेति तदनुयायिनो मे तदेव।' इति तट्टीकायां ग्रन्थकृत्॥ १—४

বঙ্গানুবাদ

শ্রীমদ্‌ভাগবতে ঐতিহ্যনামক একটী অতিরিক্ত প্রমাণ স্বীকৃত হওয়ায় নিজ মতে তিনটী প্রমাণ, ইহা কিরূপে সঙ্গত হয়—এইরূপ আশঙ্কা করিয়া গ্রন্থকার তাহার উপপাদন করিতেছেন, যথা—ঐতিহ্যনামক প্রমাণটী প্রত্যক্ষের অন্তর্গত বলিয়া মধ্বাচার্য্য ত্রিবিধ প্রমাণ বলিয়াছেন, তন্মধ্যে শ্রুতিই প্রধান প্রমাণ। যে শ্রুতির সহায়তা অবলম্বন করিয়া প্রত্যক্ষ ও অনুমান প্রমাণ হইয়া থাকে।

ঐন্দ্রজালিক মায়াকল্পিত মিথ্যা মুণ্ড দেখাইয়া থাকে, তথায় সেই প্রত্যক্ষ যথার্থ বলিয়া বোধ হয়, কিন্তু প্রকৃতপক্ষে তাহা নহে, এইরূপ খদ্যোতে বহ্নিজ্ঞান-প্রভৃতি বহু স্থলে প্রত্যক্ষ ব্যভিচারগ্রস্ত। পর্ব্বতে বৃষ্টির দ্বারা অগ্নি নির্ব্বাণ প্রাপ্ত হইলে পর যে ধূম দৃষ্ট হয়, সেই ধূমের দ্বারা অগ্নির অনুমান ব্যভিচারগ্রস্ত। অতএব শ্রুতিই একমাত্র নিরপেক্ষ স্বতন্ত্র প্রমাণ, প্রত্যক্ষ ও অনুমান স্বতন্ত্র প্রমাণ বলিয়া বিদ্বদ্গণের সম্মত নহে। বেদের অনুকূল তর্ক গ্রাহ্য, শুষ্ক তর্ক হেয় ॥ ১-৪

তথাহি বাজসনেয়িন:—

"আত্মা বা অরে দ্রষ্টব্য: শ্রোতব্যো

মন্তব্যো নিদিধ্যাসিতব্য: ॥" (বৃহ০ ২।৪।৫) ইতি। (ক)

কান্তিমালা

অনুকূলতর্কাঙ্গীকারে শ্রুতিমাহ—আত্মেতি। অরে মৈত্রেয়ি! আত্মা হরির্দ্রষ্টব্য: সাক্ষাৎকর্তব্য:। তত্র সাধনমাহ—শ্রোতব্য:—বৈদিকগুরুমুখাৎ শ্রোত্রেণ গ্রাহ্য:। মন্তব্য:—বেদানুযায়িনা তর্কেণ নিশ্চেতব্য:। নিদিধ্যাসিতব্যো ধ্যাতব্য:। অত্র ধ্যানমেব বিধেয়মপ্রাপ্তত্বাৎ স্বাধ্যায়বিধিপ্রাপ্তত্বাৎ শ্রবণস্য তৎপ্রতিষ্ঠার্থত্বান্মননস্য চানুবাদ এব ॥ (ক)

প্রভা

আত্মেতি। যাজ্ঞবল্ক্য: স্বভার্য্যাং মৈত্রেয়ীং প্রোবাচ—অরে মৈত্রেয়ি! আত্মা ভগবান্ শ্রীহরির্দ্রষ্টব্য: সাক্ষাৎকর্তব্য:। কেনোপায়েনেত্যাকাঙ্ক্ষায়ামাহ—শ্রোতব্য ইতি। শ্রোতব্যো গুরুমুখাৎ শ্রবণেন, মন্তব্য: বেদানুকূলমননেন তর্কেণেত্যর্থ:, নিদিধ্যাসিতব্য:—ধ্যানেনেত্যর্থ:। তথা চোক্তম্—

'শ্রোতব্য: শ্রুতিবাক্যেভ্যো মন্তব্যশ্চোপপত্তিভি:।

মত্বা চ সততং ধ্যেয় এতে দর্শনহেতব: ॥' ইতি।

তত্র ধ্যানং বিধেয়ং, শ্রবণমননয়োস্ত্বনুবাদ: ॥ (ক)

বঙ্গানুবাদ

অনুকূল তর্ক যে গ্রাহ্য, এই বিষয়ে বৃহদারণ্যক-শ্রুতির উদাহরণ—দিতেছেন—'হে মৈত্রেয়ি! আত্মসাক্ষাৎকার অবশ্য কর্ত্তব্য, তাহার উপায় গুরুর মুখ হইতে শ্রবণ, অনন্তর মনন অর্থাৎ বেদানুকূল তর্ক এবং নিদিধ্যাসন অর্থাৎ ধ্যান করিবে ॥ (ক)

काठकाः—

"नैषा तर्केण मतिरापनेया

प्रोक्तान्येन सुज्ञानाय प्रेष्ठ ॥" (२।९) इति । (ख)

कान्तिमाला

प्रतिकूलतर्कत्यागे श्रुतिमाह—नैषेति । हे प्रेष्ठ ! हे नचिकेत ! एषा ब्रह्मज्ञानार्थी मतिस्त्वया शुष्केण तर्केण नापनेया न भ्रंशनीया । तर्हि(१) ज्ञानं कथं भवेत् तत्राह—प्रोक्तेति । अन्येन वैदिकेन गुरुणा प्रोक्ता उपदिष्टा सती सा सुज्ञानाय प्रमायै भाविनी इत्यर्थः ॥ (ख)

प्रभा

'नैषेति । हे प्रेष्ठ ! प्रियतम नचिकेतः ! एषा ब्रह्मोपासनयोग्या मतिस्त्वया तर्केण नापनेया न घटनीया । अन्येन वैदिकेन गुरुणा प्रोक्ता उपदिष्टा सती सुज्ञानाय ब्रह्मानुभवाय भवति ।' इति ग्रन्थकृत् ॥ (ख)

বঙ্গানুবাদ

এই বিষয়ে কঠশাখিগণও বলিয়া থাকেন—এই ব্রহ্মের উপাসনাযোগ্যা বুদ্ধি শুষ্ক তর্কের দ্বারা যোজনা করা উচিত নহে। এই মতি বৈদিক-গুরুগণকর্তৃক উপদিষ্ট হইয়া ব্রহ্মানুভবের নিমিত্ত হইয়া থাকে ॥ (খ)

स्मृतिश्च—

"पूर्वापराविरोधेन कोऽन्वार्थोऽभिमतो भवेत् ।

इत्याद्यमूहनं तर्कः शुष्कतर्कन्तु वर्जयेत् (२) ॥" इति । (ग)

कान्तिमाला

उक्तां व्यवस्थां प्रमाणयति—पूर्वापरेति ॥ (ग)

प्रभा

पूर्वेति । पूर्वापराविरोधेन—पूर्वेण वाक्येन सह परस्य वाक्यस्याविरोधेनात्र कोऽर्थोऽभिमतो भवेदित्येवंरूपं यदूहनं स तर्कः, शुष्कतर्कं वेदविरुद्धन्तु वर्जयेत् त्यजेत् ॥ (ग)

---

(१) 'मे' इत्यतिरिक्तपाठः 'घ' पुस्तके ।

(२) 'शुष्कन्तु परिवर्जयेत्' इत्यपि पाठः ।

বঙ্গানুবাদ

স্মৃতিতে উক্ত হইয়াছে যথা—পূর্ব্ব বাক্যের সহিত পর বাক্যের বিরোধ পরিহার করিয়া কোন্ অর্থটী এখানে অভিমত—এইরূপ উহের নাম তর্ক। শুষ্ক তর্ক ত্যাগ করিবে॥ (গ)

নাবেদবিদুষাং যস্মাদ্ ব্রহ্মধীরুপজায়তে।
যচ্চৌপনিষদং ব্রহ্ম তস্মান্মুখ্যা শ্রুতির্মতা॥ ৫

কান্তিমালা

অন্বয়ব্যতিরেকাভ্যাং চ শ্রুতেঃ প্রাধান্যং দর্শয়ন্ উপসংহরতি—নাবেদেতি। অবেদবিদুষাং বেদজ্ঞানরহিতানাং তার্কিকাদীনাং যস্মাদ্ ব্রহ্মধীর্নোপজায়তে—ইতি ব্যতিরেকঃ। যচ্চৌপনিষদং ব্রহ্ম—ইত্যন্বয়শ্চ॥ ৫

প্রভা

নেতি। যস্মাৎ কারণাদবেদবিদুষাং বেদজ্ঞানহীনানাং ব্রহ্মধীঃ ব্রহ্মজ্ঞানং ন উপজায়তে নোৎপদ্যতে, যচ্চ ব্রহ্ম ঔপনিষদম্ উপনিষৎপ্রতিপাদ্যং, তস্মাদ্ধেতোঃ শ্রুতিঃ প্রমাণেষু মুখ্যা মতা॥ ৫

বঙ্গানুবাদ

যেহেতু বেদজ্ঞানরহিত তার্কিকগণের ব্রহ্মজ্ঞান উৎপন্ন হইতে পারে না, আর ব্রহ্ম হইতেছেন [illegible] ঔপনিষদের প্রতিপাদ্য, অতএব শ্রুতিই প্রধান প্রমাণ—ইহা সর্ব্ববাদিসম্মত॥ ৫

তথাহি শ্রুতিঃ—

"নাবেদবিন্মনুতে তং বৃহন্তম্॥" ইতি।

"ঔপনিষদং পুরুষং পৃচ্ছামি॥" (বৃহ০ ৩।৯।২৬) ইতি চ। (ক)

ইতি প্রমেয়রত্নাবল্যাং প্রমাণনিরূপকরণং নাম

নবমপ্রমেয়ম্।

কান্তিমালা

নাবেদেত্যাদ্যুক্তার্থম্॥ (ক)

ইতি প্রমেয়রত্নাবল্যাং প্রমাণনিরূপকরণং ব্যাখ্যানম্॥ ৯

प्रभा

नेति। अवेदविद् वेदज्ञानरहितः पुमान् बृहन्तं महान्तं तं परमात्मानं न मनुते।

औपनिषदमुपनिषत्प्रतिपाद्यं पुरुषं परमात्मानं पृच्छामि॥ (क)

বঙ্গানুবাদ

এ বিষয়ে শ্রুতিপ্রমাণ আছে, যথা—বেদজ্ঞানহীন পুরুষ পরমাত্মাকে মনন করিতে পারে না। আমি উপনিষৎপ্রতিপাদ্য পুরুষসম্বন্ধে জিজ্ঞাসা করি॥ (ক)

एवमुक्तं प्राचा—

श्रीमन्मध्वमते हरिः परतमः सत्यं जगत् तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधन-
मक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः॥ १

इति।

कान्तिमाला

यानि अस्मत्पूर्वाचार्येण प्रमेयान्युपात्तानि तान्येवात्र मयापीत्याह—एवमुक्तं प्राचेति। श्रीमदिति। अनुचराः दासाः, नित्याश्च (१)। नीचोच्चभावं साधनभेदैः फलतारतम्यम्। मुक्तिर्नैजेति। "मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः" (२।१०।६) इति श्रीभागवतात्। वैमुख्यरचितं (२) देवमानवादिभावं तत्साम्मुख्येन हित्वा, साक्षात्कृतेन चित्सुखेन विज्ञातृत्वा स्वरूपेण स्थितिर्मुक्तिः इत्यर्थः। अणुविज्ञानसुखं विज्ञातृहरेर्दासभूतं जीवस्य नैजं रूपम्। दास्यं च तदङ्घ्रिलाभाविनाभूतमिति "मोक्षं विष्णुङ्घ्रिलाभम्" इत्यनेनाविरुद्धम्। विकसितार्थमन्यत्॥ १

---

(१) 'नित्याश्च' इति पाठः 'ग' पुस्तके नास्ति।

(२) 'भगवद्वैमुख्यरचितं' इति 'घ' पुस्तके।

प्रभा

एवमिति। प्राचा पूर्वाचार्य्यैवमुक्तम्। श्रीमन्मध्वमते हरिः परतमः परतत्त्वरूपः, जगत् तत्त्वतः स्वरूपतः सत्यं भेदश्च सत्यः, जीवगणाः जीवसमूहा हरेः कृष्णस्यानुचराः सेवकाः, नीचोच्चभावमुत्कृष्टापकृष्टभावं गताः प्राप्ताः साधनतारतम्येनेति शेषः। नैजसुखानुभूतिः—स्वसुखानुभव एव जीवस्य मोक्षः। 'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः' इत्युक्तदिशा स्वरूपानन्दानुभव एव। स्वरूपेण व्यवस्थितिर्नाम स्वरूपसाक्षात्कारः। स्वरूपश्चात्र मुख्यं परमात्मलक्षणं, रश्मिपरमाणूनां सूर्य्य इव परमात्मैव जीवानां परमोऽंशिस्वरूपः। यथोक्तं ब्रह्माणं प्रति श्रीमता गर्भोदशायिना—

'यदा रहितमात्मानं भूतेन्द्रियगुणाशयैः।
स्वरूपेण मयोपेतं पश्य स्वाराज्यमृच्छति॥' इति।

अमला ज्ञानकर्माद्यनावृता भक्तिः, तत्साधनं तस्य मोक्षस्य साधनमुपायः। अक्षादित्रितयं प्रत्यक्षमनुमानमागमश्चेति त्रितयं प्रमाणम्। हरिराम्नायैकवेद्यः केवलवेदादिशास्त्रगम्यः॥ १

বঙ্গানুবাদ

পূর্ব্বাচার্য্য এরূপ বলিয়াছেন—মধ্বাচার্য্যমতে ভগবান্ শ্রীহরিই পরতত্ত্ব, জগৎ বাস্তবিকপক্ষে সত্য, ভেদও সত্য, জীবগণ শ্রীহরির সেবক, তাহারা সাধনতারতম্যবশতঃ উৎকর্ষ ও অপকর্ষ প্রাপ্ত হইয়াছে। স্বরূপানন্দানুভবের নাম মুক্তি। শুদ্ধা ভক্তিই মুক্তির উপায়। প্রত্যক্ষ, অনুমান ও শব্দ—এই তিনটী প্রমাণ, শ্রীহরি একমাত্র বেদাদিশাস্ত্রপ্রতিপাদ্য॥ ১

आनन्दतीर्थैं रचितानि यस्यां
प्रमेयरत्नानि नवैव सन्ति।
प्रमेयरत्नावलि-रादरेण
प्रधीभिरेषा हृदये निधेया॥ २

कान्तिमाला

ग्रन्थमुपसंहरन् स्वसोपादेयत्वमाह—आनन्देति स्फुटार्थम्॥ २

प्रभा

आनन्देति। यस्यां प्रमेयरत्नावल्याम् आनन्दतीर्थैर्मध्वाचार्यैः रचितानि नव एव प्रमेयरत्नानि रत्नभूतानि प्रमेयानि सन्ति। एषा प्रमेयरत्नावली तदाख्या ग्रन्थो रत्नमाला च प्रधीभिः सुधीभिरादरेण हृदये निधेया रचनीया ॥२

বঙ্গানুবাদ

যে প্রমেয়রত্নাবলীগ্রন্থে নয়টী প্রমেয়রূপ রত্ন আছে, সুধী ব্যক্তিগণ আদর-সহকারে সেই প্রমেয়রত্নাবলী হৃদয়ে ধারণ করুন ॥ ২

नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥ ३

इति श्रीभगवत्कृष्णचैतन्यसम्प्रदायाचार्य-श्रीमद्बलदेवविद्याभूषण-कृता प्रमेयरत्नावली (१) पूर्तिमगात् ।

कान्तिमाला

अन्तेऽपि हृदि स्वाभीष्टस्फुरणं मङ्गलमाचरति—नित्यमिति। अत्र श्रीकृष्णः श्रीकृष्ण-चैतन्यः स्वपूर्वचतुर्थो रसिकमुरारिश्च इति त्रयः प्रतिपाद्यन्ते (२)। प्रथमपक्षे (३) चैतन्यात्मा चिद्विग्रहः। गजपतिर्ग्राहग्रस्तो गजेन्द्रः। द्वितीये चैतन्यनामा आत्मा विग्रहः शच्यां जगन्नाथमिश्रात् प्रकटः। गजपतिः प्रतापरुद्रो नृपतिः। तृतीये चैतन्यात्मा शचीसुतनिविष्टचित्तः (४)। गजपतिर्गोपालदासाख्यः कविः ॥

वेदान्तवागीशकृतप्रकाशा प्रमेयरत्नावलिकान्तिमाला ।
गोविन्दपादाम्बुजभक्तिभाजां भूयात् सतां लोचनरोचनीयम् ॥ १

इति कृष्णदेववेदान्तवागीशकृता प्रमेयरत्नावल्यां कान्तिमाला टीका (५) सम्पूर्णा ॥

---

(१) 'पूर्त्तिमागता' इति 'ग' पुस्तके ।

(२) 'प्रतिपाद्यन्ते' इति पाठः 'क' तथा 'ख' पुस्तके नास्ति ।

(३) 'प्रथमे' इति 'ग' पुस्तके ।

(४) 'शचीसूनुनिविष्टचित्तः' इति 'ग' पुस्तके ।

(५) 'टिप्पनी' इति पाठः सर्वत्र ।

प्रभा

पुनरपि अभीष्टदेवतास्मरणरूपं मङ्गलमाचरन् ग्रन्थमुपसंहरति—नित्यमिति । चैतन्यात्मा श्रीकृष्णचैतन्यमूर्तिः मुरारिः कृष्णः नोऽस्माकं हृदये नित्यमनुदिनं निवसतु इति प्रार्थना । यस्य श्रीकृष्णस्यानुकम्पया गजपतिः ग्राहग्रस्तो हस्ती उत्कलाधीशः प्रतापरुद्रो वा निरवद्यस्त्यक्तपशुभावस्त्यक्तराज्याभिमानो वा निर्वृतिमान् सुखी अभूत् ॥ ३

इति भारद्वाजश्रीमद् अक्षयकुमारशर्मशास्त्रिविरचिता
प्रभा नाम टीका ।

বঙ্গানুবাদ

চৈতন্যস্বরূপ শ্রীকৃষ্ণ আমাদের হৃদয়ে চিরদিন বাস করুন। যাঁহার কৃপায় কুম্ভীরধৃত হস্তী পশুভাব ত্যাগ করিয়া অথবা উৎকলাধিপ প্রতাপরুদ্র রাজ্যাভিমান ত্যাগ করিয়া সুখী হইয়াছিলেন ॥ ৩

প্রমেয়রত্নাবলীর বঙ্গানুবাদ সমাপ্ত।

वैष्णवशास्त्रमाहात्म्यम्

स्कान्दे श्रीब्रह्मनारदसंवादे—

'वैष्णवानि च शास्त्राणि ये शृण्वन्ति पठन्ति च ।
धन्यास्ते मानवा लोके तेषां कृष्णः प्रसीदति ॥
वैष्णवानि च शास्त्राणि येऽर्चयन्ति गृहे नराः ।
सर्वपापविनिर्मुक्ता भवन्ति सर्ववन्दिताः ॥
सर्वस्वेनापि विप्रेन्द्र ! कर्तव्यः शास्त्रसंग्रहः ।
वैष्णवैस्तु महाभक्त्या तुष्ट्यर्थं चक्रपाणिनः ॥
तिष्ठते वैष्णवं शास्त्रं लिखितं यस्य मन्दिरे ।
तत्र नारायणो देवः स्वयं वसति नारद ! ॥
पौराणं वैष्णवं श्लोकं श्लोकार्द्धमथवापि च ।
श्लोकपादं पठेद् यस्तु गोसहस्रफलं लभेत् ॥
देवतानामृषीणाञ्च योगिनामपि दुर्लभम् ।
विप्रेन्द्र ! वैष्णवं शास्त्रं मनुष्याणाञ्च का कथा ॥'

इति हरिभक्तिविलासः

मुद्राप्यमाणग्रन्थाः—

१। आनन्दलतिका—सपत्नीक-कृष्णनाथविरचितं कृष्णराधाविषयकं चम्पूकाव्यम्।

२। छान्दोग्यमन्त्रभाष्यम्—सायणपूर्व्ववर्त्तिगुणविष्णुकृतम्।

मुद्रापणार्थं गृहीता ग्रन्थाः—

१। समञ्जसावृत्तिः—अनुपनारायणशिरोमणिकृता ब्रह्मसूत्रवृत्तिः।

२। दूतकाव्यसंग्रहः

३। मेघदूतम्—(राजसंस्करणम्)

४। उद्वाहतत्त्वम्—(रघुनन्दनकृतम्)—नवीनरीत्या सम्पाद्यमानम्।

5. Selections from Sanskrit Inscriptions.

6. Descriptive Catalogue of the more Important Manuscripts in the Parishat.

	मूल्यम्	
	साधारणानाम्	सदस्यानाम्
कालीतन्त्रम्—सटीकानुवादम्	॥৵০)	॥০)
शङ्करीसङ्गीतम्—शङ्करीविषयकं गीतगोविन्दानुकरणकाव्यम्	।৵০)	।০)
मुक्तिवादः—गदाधरभट्टाचार्य्यविरचितः टीकाद्वय भाष्यानुवादसहितः	२)	१॥০)
দুর্গোৎসবতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্ শারদীয়দুর্গোৎসবপ্রমাণপ্রয়োগতত্ত্বরূপম্	১।০	১৲
पितृदयिता—अनिरुद्धभट्टकृता सामवेदीयसन्ध्याश्राद्धादिपद्धतिरूपा	१।৵০)	१)
দুর্গোৎসবনিবন্ধকদম্বম্—দুর্গোৎসববিবেকাদিগ্রন্থপঞ্চকাত্মকম্	॥০	।৵০
कारकोल्लासः—भरतमल्लिककृतः सोदाहरणकारकनिर्णयरूपः	৵০)	৵০)
ऋग्वेदभाष्योपक्रमणिका—सायणकृता आङ्गलभाषाटिप्पणसमेता	॥।০)	॥৵০)
গ্রহযাগতত্ত্বম্—রঘুনন্দনভট্টাচার্য্যকৃতম্	।৶০	।৵০
प्रभाकरविजयः—नन्दीश्वरविरचितः प्रभाकरसम्प्रदायानुसारमीमांसाग्रन्थः।	१।০)	१)
তীর্থতত্ত্বম্ রঘুনন্দনভট্টাচার্য্যবিরচিতম্	।৶০	।৵০
पवनदूतम्—टिप्पनीपाठान्तरादिभिः समलङ्कृतम्। धोयीकविकृतम्	॥।০)	॥৵০)
नलदमयन्तीयम् (नाटकम्)—परिषदाचार्य्य-श्रीकालीपद तर्काचार्य्यकृतम्।	१।০)	१)
प्रशस्तपादभाष्यम्—जगदीशसूक्तिसहितम्, सम्पादककृतया सूक्तिदीपिकया भाषाभाष्येण च समलङ्कृतम्	२)	१॥০)
যাত্রাতত্ত্বম্—রঘুনন্দন ভট্টাচার্য্যকৃতম্ বৈষ্ণবদ্বাদশযাত্রাপ্রমাণ প্রয়োগতত্ত্বরূপম্	১৲	৸০
ऋग्वेदप्रातिशाख्यम् (शौनकीयम्)—	२॥০)	२)
प्रमेयरत्नावली—गौडीयवैष्णवदर्शनप्रकरणग्रन्थः	१।০)	१)